08

16
652

तिरुपति-राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला-संख्या. ५४

Rashtriya Sanskrit Vidyapeetha, Tirupati Series No. 54

पौष्करसंहिता

PAUṢKARA SAṀHITĀ

पुण्यपत्तनस्थदक्षिणमहाविद्यालये
संस्कृतकोशविभागे संपादकपदमधितिष्ठता
डा. वि. पि. आप्टे महोदयेन
पाठभेदादिभिः संशोध्य संपादिता

[redacted]

12
82:23/

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
१९९१

₹ 97=00

पौष्करसंहितायाः प्रथमखण्डस्य विमर्शात्मिकेयभावृत्तिः षड्विंशाध्यायात्मिका मण्डलाकृतीनाम् आलेखन-रञ्जन विधिविषये पौष्करभगवतोर्मध्ये संवादरूपेण निरूपिता विद्यते। पञ्चरात्रागमस्य रत्नमये मणिमध्यभूतायाः अस्याः संहितायाः संशोधनात्मकं ग्रन्थसंपादनं चिरकाङ्क्षितमासीत्। ग्रन्थस्यास्य प्रकाशनेन अनुसन्धातृणां जिज्ञासा पूर्यते। प्राचीनमण्डलाकृतीनाम् इदप्रथमतया संपादकेनानेन ग्रन्थगतयथार्थाशयग्रहणपूर्वकं तासां पुनरारचनं यद् विहितं तदेवास्य ग्रन्थस्य विशिष्टं महत्त्वमिति वक्तुं शक्यते। सार्धसहस्रैकवर्षपर्यन्तँ प्राचीनानां कलाशिल्पविषयिणी या प्रज्ञा ग्रन्थेऽस्मिन् निगूढा आसीत् सा संपादकेनानेन बहिरानीता। तद्द्वाराच कलाशिल्पविषयकानुसन्धातृणां कृते नूतनं द्वारमुद्घाटितम्।

अनेन संपादकेन विदुषा नैकासु आगमपरिषत्सु तथा अन्तराष्ट्रियसंस्कृतपरिषत्सु बहवोऽनुसन्धाननिबन्धाः प्रस्तुताः। तथैव ख्यातासु प्राच्यविद्यापत्रिकासु विद्वज्जनसेव्याः बहवो विमर्शात्मकाः लेखाः प्रकाशिताः सन्ति। ग्रन्थस्य ग्रन्थकर्तुश्च महत्त्वं योग्यतां च मनसि निधाय इदमाशास्यते यत् ग्रन्थोऽयं विदुषां परितोषाय कल्पेनेति।

652

Tantra

तिरुपति-राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला-संख्या [redacted]

Rashtriya Sanskrit Vidyapeetha, Tirupati Series No. 54

पौष्करसंहिता

PAUSKARA SAMHITĀ

पुण्यपत्तनस्थदक्षिणमहाविद्यालये
संस्कृतकोशविभागे संपादकपदमधितिष्ठता
डा. पि. पि. आप्टे महोदयेन
पाठभेदादिभिः संशोध्य संपादिता

[redacted]

राष्ट्रीय संस्कृतविद्यापीठम् तिरुपतिः

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

१९९१

₹ 97=00

[redacted]

प्रथमं संस्करणम्

प्रकाशनवत्सर : १९९१

सर्वेधिकारा: तिरुपति-राष्ट्रियसंस्कृतविद्यापीठेनस्वायत्तीकृता :

मूल्यम् 197-00

तिरुपति राष्ट्रियसंस्कृत विद्यापीठेन
(मानित विश्वविद्यालयेन)
प्रकाशिता

मुद्रापक :
श्री सत्यसाई प्रिन्टर्स्, तिरुपतिः

Rashtriya Sanskrit Vidyapeetha, Tirupati Series No. 54

[redacted]

PAUSKARA SAMHITĀ

Critically edited by

Dr. P. P. APTE

Editor, Sanskrit Dictionary,
Deccan College, Pune

RASHTRIYA SANSKRIT VIDYAPEETHA
TIRUPATI
1991

197 = 00

First Edition 1991

Copy Rights Reserved

Price : Rs. 197=00

Published by
Rashtriya Sanskrit Vidyapeetha
(Deemed to be University)
Tirupati

Printed by
SRI SATYASAI PRINTERS
Tirupati

आमुखम्

रत्नत्रयमिति प्रसिद्धे अतिप्राचीने पाञ्चरात्रतन्त्रान्तर्गते संहितात्रये पौष्करसंहिता अन्यतमा। भाषाशैल्या प्राचीनत्वमस्याः स्पष्टम्। एतत्संहितान्तर्गतवचनानि श्रीभाष्यकारैः भगवद्रामानुजाचार्यपादैः उदाहृतानीति अस्याः प्रमाणतमत्वं सिद्धम्। इयं संहिता पञ्चाशद्वर्षेभ्यः प्राक् मेलुकोटै यतिराजसम्पत्कुमारजीयर्मठाधिपतीनां पूर्वाश्रमपुत्रैः आगमग्रन्थेषु कृतभूरिविमर्शैः आसूरिश्रीनिवासाचार्यैः देवनागराक्षरैः मुद्राप्य प्रकाशिता, ये खलु १९६४-१९७० मध्ये विद्यापीठेऽस्मिन् आगमकोशकर्मणि नियुक्ताः बहुकार्यं कृतवन्तः। इदानीं ते तुरीयाश्रमिणः तस्यैव मठस्याधिपत्यं वहन्ति। तस्याः संहितायाः प्रतयः इदानीं दुर्लभाः अतिप्राचीनत्वादेव अशुद्धयः बहवः अस्यां संहितायामुपलभ्यन्ते। अतः यावच्छक्यमुपलभ्यमानमातृकापरिशीलनपूर्वकं शुद्धतरं द्वितीयं संस्करणमस्याः पौष्करसंहितायाः आवश्यकमभूत्।

आगमकोशनिर्माणकर्मणि सहायतया प्रकल्पितायाम् अमुद्रितानां मुद्रितानामप्यशुद्धिबहुलानां पाञ्चरात्रग्रन्थानां संपादनयोजनायां पौष्करसंहितायाः पुनः सम्पादनाख्यं कर्म डा. पी. पी. आपटेमहोदयेभ्यः दत्तम्। एतेऽप्यस्मिन् विद्यापीठे पूर्वम् आगमकोशनिर्माणे व्यापृताः अभवन्। अपि च बहोः कालात् पाञ्चरात्रागमे बहुविधमनुसन्धानं कृत्वा बहून् निबन्धान् प्राचीकशन्। इदानीं पुण्यपत्तनस्थदक्षिणमहाविद्यालये प्रोफसरपदमधितिष्ठन्तः संस्कृतकोशकर्म निर्वहन्ति। उपलभ्यमानमातृकाणामाधारेण पाठभेदादिनिर्देशपुरस्सरं पौष्करसंहितायाः नवीनं सम्पादनं कृत्वा आगमलोकस्य महान्तमुपकारमकुर्वन्। न केवलं सम्पादनमात्रम्, पौष्करसंहितायाः आङ्गलभाषायाम् अनुवादमपि कृत्वा तेन सह प्रकाशयन्तीति महानयमनुसन्धातृणां लाभः। एतत्संहितायाः

प्रकाशनेन विद्यापीठस्य प्रतिष्ठा च वर्धते। अस्यां संहितायां चक्राब्जादिमण्डलानां वृत्तादिबिम्बानां च लक्षणानि विस्तरेण प्रतिपादितानीति विशेषः। एतत्संहितामधिकृत्य वक्तव्यं सर्वं सम्पादकैः आप्टेमहोदयैः उपोद्घाते विस्तरेणोक्तमिति नेह पिष्टं पिष्यते।

यथावकाशं महता परिश्रमेण अस्याः संहितायाः नवीनं सम्पादनं कृतवद्भ्यः डा. आप्टे महोदयेभ्यः उत्तरोत्तरश्रेयांसि अभिलष्यन्ते।

16–5–91

तिरुपति:

एन्. एस्. रामानुजताताचार्यः

कुलपतिः

राष्ट्रियसंस्कृतविद्यापीठम्

तिरुपतिः

श्रीमत्परमहंसेत्यादिबिरुदाङ्कितैः श्रीयदुगिरि यतिराज संपत्कुमाररामानुजमुनिभिः संप्रेषितमाशीर्वचनम्”

प्रायः सप्तपञ्चाशत् संवत्सरात् प्राक् श्रीपौष्करसंहितायाः प्रथमं नागरलिपिगतं प्रचुरणं तत्कालीनपीठाधिपतिभिः (अस्मत्पितृचरणैः संस्कृत्य संपादितमासीत्। तदस्माभिः प्रकाशितम् १८५७' शाके (ख्रि. १९३४) संवत्सरे। यदुगिरिनगर्यां यतिराजसंपत्कुमारमुनिभिः संशोधिता सा पौष्करसंहिता बंगवरतः प्रकाशिता यतो हि बंगळूरावृत्तिनाम्ना विख्याता। श्रीपाञ्चरात्रागमस्य रत्नत्रयाभिधमभिजातसंहितात्रयं ‘सात्वतं पौष्करं जयाख्यं च’ काञ्ची (१९.०२) बंगळूर (१९३४) बरोडा (१९३६) मध्ये प्रकाशितं विदुषाम् अध्ययनविषयीभूतम्। अनन्ताचार्यैः काञ्चीतः प्रकाशिता सात्वतसंहिता, अस्माभिः प्रकाशिता पौष्करसंहिता बी. भट्टाचार्यैः बरोडातः प्रकाशिता जयाख्यसंहिता तथैव डॉ. एफ्. ऑटो श्राडरमहाभागैः अडयार (मदरास) तः प्रकाशिता अहिर्बुध्न्यसंहिता विदुषां विमर्शकार्ये बहु सहयोग प्रत्येकं प्रत्येकं दत्तवती। सात्वतसंहितायाः चातुरात्म्यं, विशाखयूपसंकल्पना, पौष्करसंहिताया मण्डलाकृतीनां भौमितिकं विशदवर्णनं, जयाख्यसंहितायाः मन्त्रोध्दारप्रकरणम् इत्येते विषयाः आधुनिकविमर्शकार्ये बहु सहयोगं कुर्वन्ति। अमेरिकादेशीयि, डॅनयलस्मिथ महाभागः त्रिंशत्संवत्सरात् प्रागस्माभि सह पाञ्चरात्रागमविषये भूरि परामर्शं कृतवान्। तेन प्रकाशिता पाञ्चरात्रसंहितानां सूचिः विमर्शकार्ये साहाय्यभूता विद्यते।

प्रभाकर आपटे महाभागेन पौष्करसंहितायाः वास्तुमण्डलाकृतिविषये मण्डलाकृतीनाम् आरेखन रञ्जनविधौ च महती रुचिः प्रदर्शिता। तदर्थं 'पौष्करसंहिता तेन बहुवारं पठितास्मन्निकटे विंशति संवत्सरात् प्राक्

तिरुपति नगरे। पौष्करसंहितायाः नूतनसंस्करणं कर्तुमस्माभिः यह संमील्य तेन महान् प्रयासः कृतः। स एव प्रयासः, सत्यपि विलम्बे अधुना सफलीभवति। पौष्करसंहितायां तावत् मण्डलाकृतीनां वर्णनं तथा विहितं यथा चत्वारिसंवत्सरीयः चित्रकालायाः अध्ययनक्रमः कलाविद्यालये तदाधारेण विधातुं सुशकः स्यात्। किंतु परंपरायाः त्रुटितत्वात् महानत्र ग्रन्थपातः। तथापि आपटेमहाभागेन मण्डलविषयकः पौष्करांशः सावधानमधीतः। मण्डलाकृतीनां विवरणं समधिगन्तुं विशिष्य प्रयत्नः कृतः। तदीयविवरणं च साकल्येन समधीत्य तेन तासां मण्डलाकृतीनां पुनरारेखनं रञ्जनं च कृतं विद्यते। तदर्थं बहुषु स्थलेषु कोष्ठगणनदृष्टया पाठसंशोधनमावश्यकमिति तस्य मनसि निर्धारणं संजातम्। तदनुसारं तेन तत्र तत्र पाठशोधनं सूचितं वर्तते। तदर्थं च पाठशोधनपूर्वं कंसान्तर्गतप्रश्नचिह्नस्य उपयोजनं तेन कृतम्। चिकित्सितावृत्तेः संपादनकर्मणि नूत्नोऽयं कल्पः तेन ग्रन्थविमर्शनक्षेत्रे विहितः इति कथने नातिशयोक्तिः। पाञ्चरात्रागमस्य जयाख्यसंहितायां द्वाविंशे पटले वर्णिनेषु वैष्णवानां कतिपयप्रकारेषु अन्यतमः शास्त्रज्ञः नाम। तस्य च लक्षणमीदृशम् प्रणष्ठपाठवाक्यानां कृत्वा वस्तुविचारणम्। तज्ज्ञैः सह प्रयत्नाद्वै ह्यागमं संस्करोति यः॥ अतन्द्रितः सदा विध्दि तं शास्त्रज्ञं हि वैष्णवम् ॥22.52–53॥

तस्माद् ननु पौष्करसंहितायाः चिकित्सावृत्तेः संपादकः आपटे महाभागः सर्वथा शास्त्रज्ञवैष्णवबिरुदमर्हति इत्यस्मन्मतम्।

अस्माभिः बंगळूरु आवृत्तौ प्रस्तावनायां काचन विमर्शोपयोगिनी सामग्री महता यत्नेन संकलिता मुद्रिता च वर्तते। तस्याः प्रस्तावनायाः केचन मुख्यांशाः प्रस्तुतवाचकानामपि लाभाय भवेयुरिति तेषां समावेशः

अस्या: आवृत्ते: प्रस्तावनायामवश्य विधेय:। पौष्करसंहिताया: द्वितीयो भाग: शीघ्रमेव प्रकाशं यातु इत्यस्माकं शुशंषसनम। एव प्रथमो भाग: संपादककृताङ्गलभाषानुवादसहित: मण्डलाकृतीनां चित्रै: सहितश्च केन्द्रीय संस्कृतविद्यापीठेन प्रकाशनं नीयमान: विदुषामनुमोदनमावहतादिति श्रीमन्नारायणचरणयो: प्रार्थना। इति शम्।

यदुगिरि मेलक्कोटे
वैकुण्ठ एकादशी
शके १९१२.

FOREWORD

In the Fourth Meeting of the Publication committee of Rashtrīya Sanskrit Samsthan held on the fifth June 1976 at New Delhi, it was resolved that materials from the three Āgamas–Vaikhānasa, Pāñcarātra and S'aiva–should be collected and placed before the Publication Committee for compiling the Āgama Kos'a.

In early 1968 when I joined the Tirupati Vidyapeetha as Reader and Head of the Research and Publication wing, I observed that the material extracted from Pāñcarātra Saṁhitas for the Āgama–Kos'a, contained dubious readings and consequently the critical editions of the important text have to be undertaken by that wing. Dr. B.R. Sharma, the then Director suggested that critical editions of the Vis'vāmitra–,Nāradīya–, Mārkandeya–,S'rīpras'na–, Vās'ṇutantra–, and Pauṣkar-Saṁhitas might be brought out by the Research wing. The last mentioned Saṁhita was assigned to Dr P. P. Apte (the then Lecturer in the wing). Its publication was approved in a meeting of a publication committee 3–2–1986.

That in view of the importance of the Pauṣkar–Saṁhitā in the Pāñcarātra–Canon, Critical edition of the text is a pressing need, was candidly admitted by

H. Daniel SMITH in an article entitled, "The three gems of the Pāñcarātra-Canon-an appraisal" published in Vol I, Part I of the Vimars'a (pp. 45-51) of the K. S. Vidyapeetha (Tirupati 1972).

The Pauṣkar-Saṁhitā (hereafter abbreviated to PS) contains about 5900 slokas, divided into 43 chapters, and it runs as a dialogue between Pauṣkara and Bhagawan on the technique of marshalling the Maṇḍala designs and their significance in the first 26 chapters.

In this edition, Dr. APTE has utilised two Mss. of PS—one from India office Library London and the other Supplied to him by Asuri Srinivas Ayyengar, who after entering into the Sanyāsa-order is now known as HH Sri Yatiraja Sampatkumar Ramanuja Muni of Melkote.

The affiliation of the Pauṣkara-Pārames'vara to S'rirangam temple in the south, is obviously known from the Jayakhya (12cd) citation.

Sātvatam Yadus'ailendre
S'rirange Pauṣkaram tathā ।

To put it particularly, the worship of Hari is carried out in accordance with Sātvata-Ī'vara in Melkote, Pauṣkara-Pārames'vara in S'rirangam and Jayākhya-Pādma in Kanchi.

Dr. Apte is specially qualified to undertake the responsibility of ending the PS because of his qualifications, training and experience, He obtained a doctorate degree in the Pāñcaratra, from the university of Poona, worked for about three years in the Āgama Kos'a wing of the Tirupati Vidyapeetha as Lecturer and attended several Āgama conferences organised by the illustrations sage of Kañci at several temple centres in Kāñci and other centres in Andhra Pradesh.

I trust the text of PS with its simple translation will go a long way to whet the appetite of students of temple religion in general and Vaiṣṇavism in particular.

Tirupati
Yugadi S'ake 1913
17-3-91

Sdl. Malladi Balasubramanyam
Former Principal
Kendriya Sanskrit Vidyapeetha

*

Dr. [illegible] is specially qualified to under[illegible] particularly [illegible] the PS because of his scienti[illegible] training and experience. He obtained a degree [illegible] in the PS [illegible] from the University of [illegible] worked for about three years in the Agama [illegible] Tirupati. His speeches and [illegible] there and attended several Agama conferences organised by the [illegible] at several temple centres in [illegible] centres in Andhra Pradesh.

I trust the text of PS with the English translation [illegible] a long way to meet the needs of students of [illegible] in general and Vaikhanasa in particular.

Tirupati   Sd. [illegible]
[illegible]   Former Principal
[illegible]   Kendriya Sanskrit Vidyapeetha

INTRODUCTION

An attempt has been made to reconstruct the scheme of 25 Maṇḍalas described in 'Pauṣkara Saṁhitā' of the Pāñcarātra Āgama. 'Pauṣkara Saṁhitā' is one of the three main canonical 'saṁhitā' texts of the Pāñcarātra doctrine– a Vaiṣṇavite religious sect in India. The three classical Saṁhitās of the Pāñcarātra Āgama are : Sāttvata Saṁhitā, Pauṣkara Saṁhitā and Jayākhya Saṁhitā, and these texts date back to 3rd to 5th Century A D.

Though maṇḍala worship is described and mentioned in all three texts, it happens to be the central theme of 'Pauṣkara Saṁhitā' – which describes in great detail the technical construction of the maṇdalas to be drawn for the purpose of 'Maṇḍalārādhana' (Maṇḍala worship) as part of the initiation and progress of the spiritual aspirant seeking admission to the cult, with the final aim of attainment of Mokṣa.

The Pāñcarātra religious sect is still one of the important religious sects in the South India, however, the elaborate procedure of 'Maṇḍalārādhana' as an independent institution as described in Pauṣkara Saṁhitā has been relegated to the background in the course of centuries and forgotten.

The present reconstruction of Pauṣkara Saṁhitā maṇḍalas with the help of original textual description represents an important addition to the literature regarding 'Maṇḍala' worship, as the date of Pauṣkara Saṁhitā makes them among the oldest maṇḍalas in the world.

*

MAṆḌALĀRĀDHANA IN PĀÑCARĀTR ĀGAMA

India has been a land of cultural interactions and integrations. The heritage of the Vedic tradition was supplemented by Tantric and local traditions in the religio-cultural field of social life, in addition to the influences of Buddhism and Jainism etc. The Mokṣadharmaparvan of the 'Mahābhārata' has stored encyclopaedic information on various religious sects. S'aiva, Pāñcarātra, Pās'upata etc. The Pāñcarātra docrine believing in one and only God 'Viṣṇu' and instructing the Sāttvata mode of worship, has occupied an important place in this parvan being allotted a separate Nārāyanīya section for this cult variously named as Ekāntidharma or the Sāttvata or Bhāgavatavidhi. The Gīta verses 'Imam Vivasvate yogam'.. (4.1–7) apparently refer to this Ekāntidharma tradition. This tradition seems to have developed into the temple-oriented phase of the Pāñcarātra in the post-Mahābhārata period. An integrated scheme of worship called 'Catuḥ-sthāna-arcana' came to be accepted in the temple religion. This scheme includes in addition to the image worship, invocation and worship in Kumbha (water-pot), Maṇḍala (mystic diagram), and Kuṇḍa (fire-pit).

Maṇḍalas are said to be mystic diagrams-mystic in the sense they are used in a mystic way or for a mystic purpose often connected with tantrism. The diagrams known as Yantra-Cakra-Bhadra etc. form an allotropy of mystic symbolisms of which Maṇḍala is one.

The Maṇḍala worship is found prescribed in all the three classical saṁhitās of the Pāñcarātra Āgama: Sāttvata, Pauṣkara and Jayākhya of 3rd to 5th Century A D That the worship of God with the aid of mystic diagrams was incorporated in the Pāñcarātra ritualism from its earliest phase is evidenced from the canonical text Sāttvata Saṁhitā referring to a wheel inscribed with mantras (mantra-cakra) in 2:12 सक्रिये मन्त्रचक्रे तु वैभवीये विलोकिनाम'. It explains further a form of worship in the maṇḍala diagrams (Maṇḍlārādhana). It is quite likely that this practice was adopted in the Pāñcarātra religion from tantric tradition. But soon after adoption in the Pāñcarātra family, it has been fully and finally Vaiṣṇavised and has developed and maintained its personality as such with sectarian characteristics all along

The scheme of Maṇḍalas happens to be the central theme of the Pauṣkara Saṁhitā. The temple institution having a very firm footing in the South India owes allegiance to the classical Saṁhitās of admittedly northern origin especially in Kashmir.

The Vaiṣṇavism apparently remodelled the tantric elements of Mantras, Maṇḍalas and Mudrās to suit their inherent tenets and practices. The Pauṣkara Saṁhitā reflects the clarity of vision of the Pāñcarātra seers evolving the scientific and elaborate scheme of Maṇḍalārādhana which might be said to be a prototype of Ālayārādhana or the temple-worship later on incorporating and preserving the maṇḍala-worship along with the Agni and Kumbha worships under the 'Catuṣthānārcana' curriculum of rituals.

For understanding the topic of Maṇḍalas, the Pauṣkara Saṁhitā (PS- c. 300-400 (A D) which is next in authority to Sāttvata Saṁhitā (SS) is extremely important, since it elaborates the technical aspect of these diagrams and serves as a source book for later Pāñcarātra religion, on the subject of Maṇḍalārādhana. Jayākhya Saṃhitā (JS) the third canonical text also gives one specimen : Navapadmamaṇḍala and the rest of the Saṃhitās I post classical and later ones describe one or more such diagrams. The Pauṣkara Saṃhitā is of special value because here one gets a detailed scheme of sketching, designing and colouring of the Maṇḍalas.

The place of Maṇḍala worship in the historical Pāñcarātra religion especially the temple cult in South India is as an impotant component of the fourfold worship offered to God who is invoked in image, pitcher, maṇḍala and fire (Bimba, Kumbha, Maṇḍala and Agni). From PS, however, it appears that the Maṇḍala worship, in those days was not a part of the temple ritual only, but often maintained its independent existence like the sacrificial institution. And for that ritual known as Yāga, a special pandal was erected on a site chosen on a mountain or in a forest or by the side of a hermitage or on the bank of a river or inside temple premises (PS 2.4.5.). The formal purpose of the Maṇḍalārādhana is the initiation and progress of the spiritual aspirant seeking admission to the cult and the final goal is obviously the attainment of Mokṣa. PS (Chapter I) prescribes four main classes of Maṇḍalas : Padmodara or lotus-hearted, Aneka-kajagarbha or multi-lotus, Cakrābja or lotus-surrounded-by-circle, and Mis'racakra or of complex-wheels. These are meant for aspirants passing through various grades of progress: Samayī, Putraka, Sādhaka and Ācārya. The aspirant practises some sort of Yogic-cum-tantric process of self-restraint with the help of the diagrams aiming at the final liberation. It is assured that the aspirant by entangling himself in these diagrams really frees himself of all bondages. The merit of the Maṇḍalārādhana accrues by even witnessing, worshipping it or meditating upon it. These Yāgas continue for a period extending up to forty days or more.

At a later stage, the human tendency to utilise the mysterious powers for personal visible benefit seems to have outweighed the urge for spiritual uplift and the Maṇḍala worship was yoked for mercinary ends as seen from S'rīpras'na Saṁhitā (52:56–63): 'निधिप्राप्तये वल्मीकसमीपे भद्रमण्डलपूजाविधिः।'. The diagrams were sometimes drawn on canvas or wall instead of being drawn on the ground.

The elaborate procedure of 'Maṇḍalārādhana' as an independent institution has gradually been relegated to the background in the course of time. The Pauṣkara Saṁhitā which has been preserved as an article of faith has suffered a lot in faithful preservation of the portions dealing with the technical niceties of sketching and colouring of elaborate patterns of complicated geometrical descriptions.

Both the approaches, the grammatical of the Sanskritist or the geometrical of the technologist often fall short in interpreting these passages. All the same persistent efforts by researchers do yelld valuable results. It is felt that this chapter of our rich cultural heritage revealed by this interpretative methodology would interest the scholars and designers alike.

*

THE PAUṢKARA SAMHITA : MAṆḌALAS

The Pauṣkara Saṁhitā opens with the entry of a spiritual aspirant approaching a Guru for initiation, who advises him to procure some amount of money for performing of Maṇḍala-Yāga. Thereafter follows a description of four pattern-set classes of maṇḍala-designs, prescribed for a four year progressive course of spiritual graduation leading the initiated entrant through annual qualifying examinations of Samayī, Putraka, Sādhaka and Ācārya. The teacher is advised to transfer the essence of his knowledge to a deserving disciple before parting this mortal body so that the continuity of doctrinal lineage is kept uninterrupted.

The four classes are called : 1. Padmodara, 2. Anekakajagarbha, 3. Cakrābja and 4. Mahākhya Navanābha. The first one has got lotus at the centre and this category gives twenty-five maṇḍalas beginning with Bhadra of 7×7 = 49 square units and increasing by arithmetical progression upto Paramānanda of 31×31 = 961 sq. units. The central lotus correspondingly grows in number of petals from 3 to 27 also by arithmetical progression. Apart from religio-spiritual aspect and the allied aspect of mantra-occultism, the technical aspect of sketching, colouring and architectural implications in itself is a tough job for the teacher and the taught.

Besides, the preliminaries of the Maṇḍala Yāga require quite a complicated constructional technology of examination and survey of the selected site, orientation and drawing of the ground plan: the Vāstu-maṇḍala, errection of a Yagamandira, an enclosed structure· a pandal or a hall· The Pauṣkara Saṁhitā which is not a text on architecture is seen indulging in the niceties, intricacies and accuracies of the soil–testing techniques, the astronomical calculations for exact determination of the Eastern direction by accounting for the seasonal and geographical position of the place and time of the performance of the Yāga, and elaborate architectural instruction for construction of the Yāgas'ālā with its floor, pillars, roofs, doors and other accessories.

The maṇḍala–designs themselves involve the structural aspect varying from squares and bisections of square–units, equi–lateral triangles, the technique of concentric circles, drawing of spokes of wheels etc· and the lotus designs with varying number of petals and filaments, budding and blooming petals all based on geometrical devices and the colour scheme of primary colours and shades, the symmetry and colour combinations, the similies used for pinpointing a precise shade, as for instance, the word 'Go–kṣīra-pāṇḍu' to denote yellowish white of cow's milk shade; or 'S'arad-gagana- saṅkās'a' for deep sky blue of autumnal shade; all these descriptions dive deep into the field of art–technology far difficult for a layman of devotional bias to grasp.

It is proposed here to introduce this topic of Maṇḍalas primarily through the approach of art-appreciation, explaining the scheme of specimens of maṇḍalas showing the evolution of designs and structural patterns presently focussing the analytical study of the first category of Padmodara maṇḍalas having lotuses at the centre. The illustrations are entirely based on the modest attempt of reconstruction with the help of textual interpretation to the extent it has been possible·

Persistent efforts have been made to resolve difficult spots and such spots which are yet to be resolved are left blank in the diagrammatic reconstruction shown in the illustrations. Various beneficial fruits are assured for the worship of each of the 25 maṇḍalas which bear appropriate titles indicative of the respective fruits·

THE STRUCTURE OF THE DIAGRAMS

1· Selection of site :

The site for the Yāga session of the Maṇḍalas is selected on a mountain or a river bank or in a park or in any other place mentioned already above· The selected place is first purified and ploughed, seasoned and levelled.

2. Orientation :

First of all, the eastern direction is settled with the help of an instrument called S'aṅku and then the rest of the directions and sub-directions are easily obtained.

3. Vāstupuruṣamaṇḍala :

A square diagram with 8×8 or 9×9 equal units is prepared for the convenience of architectural purpose. Each of these units is named after a divinity. From religio-spiritual point of view, these deities are unseen powers controlling the success of the construction as well as worship and hence these portions are allotted to them as a token of the sense of belonging. From architectural point of view, however, the naming of various parts of the ground plan is meticulous and elaborate improvement on the scheme of naming the directions and sub-directions after divinities, e.g., Pūrva (East) Indra's direction and so on.

4. Erection of Pandal (Maṇḍapa-nirmāṇa) :

A special paṇḍal with walls and roofs is erected on the chosen site for the performance of the Maṇḍalayāga. In this pandal, the central portion is allotted for the sketch of the diagram and a smooth and levelled pavement is prepared there for the purpose.

5. Sūtrapāta : Draught manship :

The Śilpin chalks out along x axis and y axis parallel lines in rows and columns cutting each other to form a chess-board design, with the help of cords dipped in sandalwood-paste vermillion and the like. The number of parallel lines required for rows or columns is always one more than their number. Thus, for example, 8 parallel lines make 7 rows or columns. The arcs are technically called 'Candra-lāñchana' and the intersection of arcs is called 'matsya-cinha'. With the help of these processes the x and the y axis is to be obtained.

6. Padmodara Class of Designs :

Pauṣkara Saṁhitā gives a scheme of 25 types of maṇḍalas belonging to the Padmodara class. However, the text as come down to us has lost the description of the 25th maṇḍala called Paramānanda. The first and the smallest maṇḍala called Bhadra measures 7×7=49 units and the last one measures 31×31=961 units.

7. The Names of the Maṇḍalas :

The names suggest the fruit or merit derived from worshipping the particular diagram. But from the scanty information found in the Saṃhitā text the reason for naming them as such is not clear. As for the relation of the shape or structure of these designs with the titles, one finds only two examples the first one the Bhadraka and the sixteenth the svastika, apt.

8. The parts of Maṇḍalas :

The following are the parts of a maṇḍala: 1. Padma (Lotus); 2. Pīṭha (Pedestal or seat of the Lord); 3. Vīthi (passage surrounding the pīṭha and meant for going round in a conventional manner keeping the deity always to the right i.e., Pradakṣina); 4. Dvāra (entrances on all directions); 5. S'obhā (offset design on the enclosure adjacent to the entrance on both sides); 6. Koṇa (the corner portion of the enclosure).

Besides these main parts, there are some allied parts, namely: 1. Upapītha (outer pedestal adjacent to the central seat); 2. Upadvāra (side entrances which are eight in number two on either sides of the main entrances). 3. Upas'obhā (re-entrances or recesses or the inverted counterparts of the offsets occupying the space in between offsets and corners of the enclosure); 4. Pīṭha-Gātra and Pīṭha-Koṇa (the portions of the pīṭha on four sides and four corners respectively); 5. Bimba (sub divisions of any of the parts given above).

9. Koṣtha = Aṁs'a = Pada = Unit

It is the basic square unit. By combining these units in a given number and by a given method, various geometrical figures are obtained. After taking a fixed number of units as per textual instructions, one has to erase the border-line of the units failing within that area. The units are calculated from centre to the enclosure from inner to outer rows in succession. The square unit as a rule is not further divided but exceptionally in one or two cases there occurs a diagonal bisection.

10. Padma and Padma-kṣetra (Lotus & Lotus Area)

The central portion of a maṇḍala reserved for sketching a lotus is called Padma-kṣetra. A circular area has to be demarcated inside that square for drawing a lotus. The first step is to draw four concentric circles by dividing the radius in four equal parts. The innermost circle is allotted for the Karṇikā, i e., the pericarp of lotus. The area of the second circle circumscribing the inner one is covered with filaments (Kesara) of the lotus. The number of filaments is two or three times the number of petals. The third circle remains blank and in the fourth circle, the petals are drawn in such a way as to make their ends touch the outer circumference, and the joints of two petals the inner circumference. The lotuses in the 25 maṇḍalas have 3 to 27 petals in ascending order. The number 6,8, and 12 however corresponds with the number of syllables in the mantras of Viṣṇu, Nārāyaṇa and Vāsudeva. The syllables of mantras are written on petals as well as filaments and the basic syllables (bījākṣaras) in the places of the seeds of the lotus inside the pericarp.

11. Pīṭha (Divine Seat)

This is a diagram supporting the lotus-seat of the Lord. Its symmetrical parts situated on the four sides are called Piṭhagātras and the corner portions of the right-angle shape are called Pīṭha-koṇas (or pādas or caraṇas). The pīṭha is sometimes supported by a sub-seat or exterior or lower pedestal called Upa-pīṭha which also has sometimes corresponding division into Upapīṭha-gātra and Upapīṭhakoṇa. In the larger diagrams, the pitha has futher decorative divisions : pīṭhagātra-bimba and pīṭhakoṇa-bimba. The shapes of the pīṭhagātra-bimbas in various maṇḍalas resembles either Roman capital lettar 'I' or a' + ' (cross mark).

12. Vīthi (Passage) :

This is an open space formed with one or more rows surrounding the pīṭha. This is meant for 'Pradakṣ ṇa' a round walk to be taken by a devotee keeping the deity always to his right. Gamamārga and Bhramaṇī are synonyms to Vīthi. The passage should be decorated with flowers, leaves and foliages and should never be left blank, as per textual instructions. The passage connects the divine seat with the entrances on all sides; as such it plays the role of a connecting link between the inner and the outer parts of the maṇḍala design.

13. Entrance (Dvāra) :

The entrance, the offsets, and the corners together share the space allotted to the enclosure, in the outermost rows; they occupy two rows in smaller maṇḍalas and three in the bigger ones. The inner part of the entrance is narrow, like a neck; hence it is named as gala or kaṇṭha (or in some places karṇa); the outer portions which opens wide outside the enclosure is called outer neck (or jaw) upa-gala, upa-kaṇṭha (or upa-karṇa). The entrance in the three rows is supplemented by an outer support called ādhāra.

In the larger diagrams, we find two side-entrances on each direction-one each on either side of the main entrances. In such cases, the total number of entrances is twelve. The side entrance is called upadvāra and it reminds us of side doors in big temples.

14. S'obhā :

The S'obhā or offset is a pyramid like construction adjusted in the space left out by the entrance. With its broad-base resting on the inner row, it goes on tapering outwards especially in the case of three-row enclosures.

Upa-s'obhā is like a re-entrant or recess which stands in between the s'obhā and outer koṇa and is, as it were, an inverted image of s'obhā.

Sūkṣmas'obhā or a miniature offset is a s'obhā which occupies only two rows in an enclosure of three rows.

In the larger designs, we find all parts in series : dvāra, s'obhā, upas'obhā, anya-s'obhā and koṇa or sūkṣmas'obhā and upadvāra.

15. Koṇa (Corner) :

This is the corner portion. The number of units for this part is the remainder left after allotment to Dvāra, S'obhā, Upas'obhā etc., in the order of priority, is over. The units are counted in 'L' shaped rows from inside to outside. Koṇa being a remainder, forms a shape with its leglike ends either in a projecting or in a receding state. Whenever the space admits of elaboration, Koṇa is supplied with bimbas (decorative limbs). Koṇas are also decorated with divine emblems like S'aṅkha, Cakrā etc.

16. Āvaraṇa (Outer border) :

The entire maṇḍala is often decorated with border strips in one or more colours.

17. Conjectural reconstruction :

The Pauṣkara Saṁhitā provides to the student of maṇḍala-scheme an opportunity to test his understanding, as it were, by omitting the description of the twentyfifth maṇḍala. If one has grasped the scheme with analytical perception, he would be able to achieve an conjectural reconstruction of the twenty-fifth maṇḍala named Paramānanda.

COLOUR SCHEME

1. Technical Terms :

The words used for colour are : Varṇa, Rāga, Rañjana etc. and the verbs used for the process are 'lapayet'. 'rañjayet'.

Direct denotation of colour :

Following words are used to denote the colours directly : Sita = s'veta = s'ukla = white; Pīta = yellow; Rakta = Red; and Kṛṣṇa = black; Nīla = blue; and shades like Aruṇa-orange; [Raktāruṇa = reddish orange; Paṇḍurakta = whitish red etc.

The suffix ujjvala indicates brightness of colour, e.g., Raktojjvala, Pītojjvalla etc.

Indirect denotation : Some shades are denoted by similies of visible objects such as natural elements, birds, flowers, minarals and precious stones etc. In some cases there is a combination of direct and indirect denotation as in 'Gokṣirapāndu' where whiteness is qualified by the shade of cow's milk. The suffixes showing resemblances are: Abh, vat, shmkash, nibha etc. Curiously enough one may note the suffix 'ākār' which ordinarily means shape, is used in the sense of shade, e.g , marakātākār.

Pauṣkara Saṁhitā alone uses about fifty-two technical terms denoting in all twenty-two distinct shades.

2. Basic Colours :

Sectarian and philosophical background of the Pañcarātra has played important part in the building up to the colour scheme of the maṇḍalas. The four vyūhas, i.e., manifestation of God : Vāsudeva, Saṅkaraṣana, Pradyumna and aniruddha, are described as bearing white, red, yellow and black complexions. They have again special affiliation with the four yugas and the four varṇas (i.e. caste divisions). The term varṇa denotes both: social status as well as colour. The Agamas allot the same colours to the members of the respective castes while prescribing choice of land etc. Thus, Sitadicatuska includes Sita, Rakta, Pita and Kriṣna (White, red, yellow and black) as basic colours. The other shades are derivatives of these four; and perhaps these basic colours are found in easily available powders known in Marathi as Rangoli, Kumkum, Halad and Bukka. That these powders were prescribed for colouring is supported by the statement in Pauṣkara Saṁhitā (1.6) :

सूगमित्वा विधानेन पूजमित्वा रजै : शुभै : ।
लिरिवत्मा कुङ्कुमाद्यैर्वा चालिख्य घटिकादिभि : ॥

Besides these powders, precious material was also introduced whenever the worshipper could afford.

भूमौ हेमशलाकाद्यैर्विताभावात्त्रयत्नत : ।
पूजयै।फलपुष्पाद्यैध्दाध्यैनित्यसम्भवै : ॥

Specially where transparent shades of precious stones are prescribed, one has to think of studding or embedding of those parts.

3. Rājapāṣāṇa and other difficult terms :

This word also spelt as Rājās'ma, Rājopala, Nṛpas'aila etc. seems to be a variety of stone with regal majesty. It may be assumed that this must have been the king of stones. But the royalty of stones is as it were the privilege of diamond. (Lakṣmītantra, 41-42). V. Krishnamurty in Lakṣmītantra interpretes Rājopala as Vajra = diamond or thunderbolt. All these things denote a shade which is bright white. But from the context and by applying the method of elimination, one comes to the conclusion that Rājās'ma is a brilliant dark black shade (compare swastika pattern in swastika maṇḍala no. 16).

Another term is Pras'āntāgnisamāna. If it means flameless or smokeless fire, then it would present a reddish tint. But if it means extinguished fire, then it would be a heap of ash, therefore the shade would be of ash colour S'uklapakṣopama is one more such term which is not capable of easy interpretation. Bright fortnight is not a good simile for denoting colours In this case, a variant reading in one manuscript of Pauṣara Saṁhitā gives a clue. The reading is S'ukapakṣopama, ie., resembling the wings of a parrot. This is a rational simile and finds a parallel in the same context in Cāsapakṣanībha. In the former case the colour is green and in the latter it is blue. Similarly the reading Madhye tu kamalam sthitham' may be corrected with the help of colour analysis as : 'Madhye tu Kamalam sitam' indicating a colour shade.

4. Symmetry :

Various colour combinations : matching, contrasting, gaudy, mild, glittering etc. appealing to various tastes are found in the maṇḍalas. Unsymmetrical shmmetry a favourite modern trend is also seen in some maṇḍalas where four sides have four distinct colours.

5. Transparent shades : As already mentioned the denotation of transparent shades may include use of transparent objects like diamond, emerald, crystals etc. for embedding in the surface.

6. Colour Manufacturing : There is no reference in Pauṣkara Saṁhitā to manufacturing of dyes or paints or of the materials used in them.

RESUME

1. The entire scheme of maṇḍalas is very scientific and viewed from artistic point alone, it exhibits the high proficiency of Āgamic teachers and students in that field.

2. From architectural point of view, one may evaluate these diagrams as potential groung plans of twentyfive patterns of temple structures. The words; Pīṭha, Vīthi, Dvāra, S'obhā, upas'obhā, koṇa are all common terms in the sphere of the maṇḍala design and temple architecture (compare Pārames'vara Saṁhitā). Besides, the diagonal bisection of of square units hints at a contour structure of the divine seat, and also of the S'obhā etc.

3. **Conjectural Reconstruction:** As already discussed, conjectural reconstruction of any diagram with missing text would also help a student to interprete similar passages elsewhere, describing artistic or architectural specimens.

4. **Textual Reconstruction :** Finally, colour scheme as well as the arithmetic tally of units etc. are useful to correct the readings, fill in the lacunae as also to reconstruct verbally some omitted portions as in the case of 5th maṇḍala (compare the reconstructed Sanskrit verses of the present author).

Part I of the Pauṣkara-Saṁhitā, comprising of the first 26 chapters which is divided into two sections one Sanskrit and to other English, each running over about 340 pages is being published now, alongwith English translation. The text as if has come down to us, is full of lacuna and corrupt readings and in this regard it has to be noted that collation of various manuscripts could not help the editor in improving the same. However this part mainly contains the subject of site selection, orientation, sketching of the Vāstu-Maṇḍal, erection of a pendal for Maṇḍal worship, classification of various types of Maṇḍal designs, the Sketching and colouring of the Maṇḍals and various Motifs contained therein and lastly the description of the worship to be conducted with the help of various Mantras, inscribed thereover Consequently the interpretation of the text required the knowledge of technical aspect of reconstructing the arts specimen, having the architectural potential. It has to be noted here that due to discontinuance of the practice of sketching and colouring of the Maṇḍal designs in the existing temple traditions, no objective evidence was available to the editor for comparison.

The editor was struggling over two years to interpret the text for pictorial reconstruction of the Maṇḍal design with the help of Sri Asuri Srinivas Ayyengar, the publisher of the first edition of this Saṁhitā in 1934. His persistent efforts succeeded, throgh partially, in sketching and colouring of the designs of Maṇḍals, which have been incorporated here without colours, due to some obvious limitations. The group of geometrical calculations has helped the editor in improving the text to a considerable extent and reconstructing the text at places. The editor has noted his amendations in brackets with a querry marks.

With regard to the translation of the text, the editor was labouring under certain obvious limitations especially from chapters VI to XI wherein the lacuna are important and the subject matter pertains to complicated design pattterns and hence the translation could not be continuous and consistent. For this reason, the translation of major portion of VII and VIII chapters, running over 10 verses each had to be left out altogether. An elaborate note on the structure and colours of the Maṇḍal designs, along with illustrations is incorporated in the translation section. The sanskrit section covers preface and exhaustive introduction.

Tirupati
1 -3-1991 (P.P. Apte)

*

प्रस्तावना

प्रस्तावनायामस्याम् संक्षेप विस्तरेण केचन सामान्यविशेषविषय: ये परामर्शमर्हन्ति तेषामूहापोह: कर्तव्यो भवति। तत्र संस्कृतवाङ्मये आगमसाहित्यस्य स्थानम्, तत्र च वैष्णवागमानां तत्रापि पाञ्चरात्रागमस्य स्थानं तत्रापि अभीजातसंहितात्रयस्य, रत्नत्रयापरनाम्न: सात्वतपौष्कर-जयाख्य संहितानाम, एतेष्वपि मणिमध्यभूतस्य पौष्करसंहिताया: विशिष्य स्थानं, रत्नत्रयस्यार्थोपपादकरूपेणाविर्भूतम् अभिजातोत्तरसंहितात्रयम्: ईश्वर-पारमेश्वर-पाद्मसंहिता: या: खलु प्रकर्षेणालयाभिमुखा: तेषां विवरणं, संहितानां विषयविभागानुसारं पादचतुष्टयेषु: ज्ञान-योग-क्रिया-चर्यापादेषु विभजनं तद्विभजनस्यादर्शरूपेण संरक्षितस्य प्राय एकस्यैव पाद्मसंहिताग्रन्थस्य स्थूलावलोकनम् एतादृशा: विषया: सूचयितव्या: भवन्तस्यां प्रस्तावनायाम्।

भारतीयसांस्कृततिकपरम्परायां निगमागमसंज्ञितं विभागद्वयं प्रचलितं वर्तते। तत्र निगमसंज्ञया प्रायोयज्ञयागादिरूपा वैदिकपरम्परा, आगमसंज्ञया च मन्दिरान्तर्गत मूर्तिपूजादिरूपा धार्मिकसांस्कृतिकपरम्परा अभिज्ञेता वर्तते। श्रीमद्भि: यामुनाचार्यैः आगमप्रामाणाख्ये तेषां ग्रन्थे आगमशब्देन काश्मीरागमस्य नाम सात्वत-पाञ्चरात्रागमस्य स्पष्टो निर्देश: कृत:। आगमानां प्रामाण्यं प्रतिपादयद्भि: तै: साक्षान्नारायणमुखोद्भूतस्य पाञ्चरात्रागमस्य, 'यस्य निश्वसितं वेदाः' इत्युपवर्णितानां वेदानां प्रामाण्येन तुल्यं तेषामपि प्रामाण्यं विद्यते इति समुद्घोषितम्। तत्र पाञ्चरात्रसंहिताग्रन्थेषु ईश्वर-संहितायां, पारमेश्वरसंहितायां च शास्त्रावतरणवर्णने सात्वत-पौष्करजयाख्य संहितानामेकायनवेदस्य आविष्काररूपेण वर्णनं कृतमस्ति। एता: संहिता: प्रायो देवालयाभिमुखाः। तत्रापि तासां संहितानामर्थोपपादनार्थमा-

विर्भूतम् अभिजातसंहितात्रयम् ईश्वर-पारमेश्वर-पाद्म संज्ञं ततोऽधिकमालयाभिमुखम्।

दक्षिणभारते आगमसंकल्पनायां वैखानस-पाञ्चरात्रशैवागमानामन्तर्भावो भवति। शैववैष्णवागमयोर्मध्ये सत्यपि उपास्यदैवतभेदे ज्ञानयोग-क्रिया-चर्यापादेषु विभज्यमाना : विषया : प्राय : समाना : सन्ति। वैष्णवागमान्तर्गत पाञ्चरात्रवैखानसागमयोस्तावत् तान्त्रिक-वैदिक प्रभावानुरोधेन विशेषत : मन्त्र-विनियोगविषये भूयान् भेद : भवति। मूर्तिपूजाविषयिणी संरचना उभयत्र समाना। तथापि वैखानसागमे वैदिकमन्त्राधारेण सर्वमपि आगमिकं विधिजात निर्वह्यते। पाञ्चरात्रे तु वैदिक-तान्त्रिकमन्त्राधारेण सकलमपि कार्यजातं संपाद्यते। तथैव षडक्षर-अष्टाक्षर-द्वादशाक्षर-नाममन्त्रैरपि केचन विधिविषया : सम्पादिता :। शैवागमे तु प्रायस्तान्त्रिका एव मन्त्राः समायोगिता : सन्ति। पाञ्चरात्रागमे प्रतिष्ठाविधौ स्नपनविधाने च वैदिकमन्त्राणां विनियोग : प्रचुरो दृश्यते। श्रौतवाङ्मये यज्ञयागादि क्रियाकलापस्य निर्वहणार्थं श्रौतगृह्यशुल्ब धर्मसूत्रादिसामग्री विरचिता। तथैव मन्दिरान्तर्गत मूर्तिपूजाया : क्रियाकल्पस्य निर्वहणार्थं ज्ञान-योग-क्रिया-चर्यापादैर्युता : संहिताग्रन्था : साकल्येन समाजजीवनस्य विविधानङ्गान् संस्पर्शयन्त : ज्ञानकोशात्मका : संवृत्ता : सन्ति। सैद्धान्तिकदृष्टया आगमोक्त : एकदैवतविचार : आगमिकै : मूलवेदरूपेणाथवा 'एकायन' वेदरूपेण संकल्पितः वर्तते। तस्यैव वेदस्य संहितारूपेण विभजनं सात्वत-पौष्कर-जयाख्य संहिताग्रन्थेषु प्रादुर्भूतमिति तेषां मनोधारणा। महाभारतस्य भीष्मपर्वणि समुल्लिखितस्य सात्वतविधे : प्रतिनिधिरूपेण संरक्षित : पारम्परिकग्रन्थ : महाभारत ग्रन्थोत्तरकाले सात्वतसंहितारूपेण प्रथित : स्यात्। डॉ. ओटो. एफ्. श्राडरमहाभागेन निर्धारित : पाञ्चरात्रागमस्य प्रमुखसंहितानां कालखण्ड : ख्रिस्ताब्दस्य आतृतीयात् आ-अष्टमशताब्दपर्यन्तं वर्तते। तदन्तर्गतः

आदिम : कालखण्ड: तृतीयतः पञ्चमशताब्दस्यान्तं यावत् अभिजातसंहितात्रयस्य नाम सात्वत–पौष्कर–जयाख्य संहितानां रचनाकाल: इति मन्तुं शक्यते। अनया कल्पनया विद्यमान संहितानां संधानं सात्वतसंहिताद्वारा भीष्मपर्वोक्त सात्वतविधिना साकं संमुपकल्पयितुं सुशकम्।

श्राडर महाभागै: दत्तं सात्वत-पौष्कर-जयाख्य संहितानां पौर्वापर्यं पौष्करसात्वतजयाख्यरूपं वर्तते। किंतु संहितान्तर्गतप्रमाणानुसार च सात्वत संहिता एव प्राचीनतमा। पौष्करसंहितायां एकोन चत्वारिंशेऽध्याये सात्वत-संहिताया: प्राचीनत्वं प्रमाणितं यथा हि—

आद्यं सर्वागमानां च पारमेश्वरमागमम्।
प्रमाणपरिशुद्धं च हितमब्जज सात्वतम् (39. 18)

श्राडरमतानुसारेण पांचरात्रागमस्य प्रमुखानां संहितानां कालखण्ड: ख्रिस्ताब्दस्य तृतीयत: अष्टमशतकपर्यन्तं वर्तते। तस्माद् रत्नत्रयस्य कालखण्ड: तृतीयत: पञ्चमशताब्दि पर्यंतं निर्धारितुं शक्यते. यतो हि जयाख्यसंहिताया: काल: वी. भट्टाचार्यमहोदयै: पञ्चमशतके निर्धारित: (जयाख्य संहिता: प्रस्तावना)। तस्माद् रत्नत्रयस्य मणिमध्यभूतेयं पौष्करसंहिता ख्रिस्ताब्दस्य तृतीयचतुर्थशतकयो: संधिकाले विरचितास्यादिति धारणे न कोऽपि प्रत्यवाय:।

आधुनिकविमर्शदृष्टया सात्वत–पौष्कर–जयाख्यसंहितानां एकैकश: विशिष्टं योगदानं वर्तते। तत्र सात्वतसंहितायां पाञ्चरात्रस्य व्यूहसिद्धान्त: प्रथमत: प्रतिपादित: सम्यग्विवृत्तश्च। असौ हि सिद्धान्त: महाभारतस्य मोक्षपर्वणि पञ्चरात्रस्य दार्शनिकसिद्धान्तरूपेण एकव्यूहत: चतुर्व्यूहपर्यन्तं क्रमिकविकासरूपेण निरूपितो वर्तते। भीष्मपर्वणि तत्पूर्वं च सात्वतविधिरूपेण

यो हि धर्मः समुल्लिखितः स एव परं पराप्रवाहेण प्रचलितः सन् सात्वतपौष्कर जयाख्यसंहितारूपेण देवालयेषु विद्यमानार्चना परंपरया च अद्ययावत् समुपलभ्यते। तिसृष्वेतासु संहितासु प्रायः आलयार्चनाविधिकृते उपयुक्ता प्रायः सर्वेऽपि विषयाः अन्तर्भाविताः सन्ति। अभिजातसंहितोत्तरकालीनसंहितासु एतेषामेव विषयाणां ज्ञान-योग-क्रिया-चर्यापादेषु विस्तृतो विभागः कृतो विद्यते।

सात्वतसंहितायां मण्डलाकृतीनामुदाहरणद्वयं प्रस्तुतं वर्तते। पौष्करसंहितायां तावत् मण्डलानां वर्गीकरणं तेषामालेखन-रञ्जनविषयिणि समग्रा योजना निरूपिता वर्तते। निरूपणमिदं तथा सुविशदं वर्तते यस्याधारेणैव सार्धैकसहस्रवर्षानन्तरं परंपरायां खण्डितायां सत्यामपि, अस्य ग्रन्थस्य संपादकः पौष्करसंहितायां वर्णितानां प्रायः सर्वासामपि मण्डलाकृतीनां पुनरालेखन रञ्जने समर्थोऽभवत्। एतासां मण्डलाकृतीनां चित्राणि सर्वाणि ग्रन्थेऽस्मिन् मुद्रितानि सन्ति। अस्पृष्टपूर्वोऽयमंशः ग्रन्थस्यास्य विशिष्टं योगदानमिति कथने नातिशयोक्तिः। ख्रि. १९३४ मध्ये प्रकाशितायाः बेंगलूर-आवृत्तेरपेक्षया अस्यामावृत्तौ ग्रन्थस्याङ्गानुवादः, मण्डलाकृतीनां भौमितिकं विवरणं तदनुगुणं पाठसंशोधनं च मण्डलाकृतीनां पुनरालेखितचित्राणि इह प्रथमतया यदत्र प्रस्तुतानि विद्यते तदेवास्य ग्रन्थस्य संपादनवैशिष्ट्यम्। अस्मिन् संपादनकर्मणि बं लूगवृत्ते! प्रकाशकानां श्रीमतं श्रीनितास-अय्यंगार महोदयानां इदानींतनयदुगिरिस्थ यतिराजमठाधिपतीनां संपत्कुमाररामानुजमुनिवराणां विशिष्योल्लेखार्हं साहाय्यं संपादकेनानेन लब्धम्। अपरं च रत्नत्रयान्तर्गततृतीयायां जयाख्यसंहितायां पौष्करोक्तानेककजगर्भप्रकारस्यैकैकमुदाहरणं नवपद्ममण्डलाख्यं पूजाविधिसहितं विवृतं विद्यते। ततैव मन्त्रोद्धारप्रकरणे यानि अकारादिवर्णसंकेतनामानि प्रस्तुतानि विद्यन्ते तेषामाधारेण जयाख्यसंहितासंपादकेन पुटाभिलेखदृष्ट्या जयाख्य-

संहितायाः कालनिर्णयः कृतः विमर्शसामग्रीस्रोतत्वेन रत्नत्रयस्य योगदानं गणनार्हं विद्यते।

बेंगळूरावृत्तेः संपादकानां यतिवराणां मुद्रितांशाः केचन प्रकाशकानामादेशानुसारेणत्र पुनः प्रस्तूयन्ते।

“अस्तु वा यत्किमपि, उपलब्धग्रन्थशरीरे यावत्त्रुटितग्रन्थोपभागोपलब्धिर्न जायते तावत् चोद्यपरिहारौ न सुप्रतिष्ठितौ भवतः; प्रायः अनुगततया प्रतिपाद्यार्थप्रतिपत्तिरपि दुरवसेया। किं बहुना—

वक्ता स भगवान् श्रोता पौष्करश्च न शक्नुतः।
मन्ये स्वीयेत्यभिज्ञातुमीदृशीं संहितामिमाम्॥

तदत्र लुप्तभागोपलब्धये तस्मिन्नेव भगवति प्रार्थनैव साधीयसी। इयं पौष्करसंहिताग्रन्थानुपूर्वी भगवता पौष्करायोपदिष्टा इदं प्रथमावतारशरीरा नाऽनुवादपर्युषितोनि सन्तानवाही प्रमाणसंप्रदायावगमः जागर्ति, अमुनेवार्थं द्रढयति एनामेवोपजीव्य प्रवर्तिता पारमेश्वरसंहिता, तत्रैव सप्तमाध्याये–‘पौष्कराख्ये विशेषेण देवदेवेन विस्तृतम्। विधानमेतद्विपेन्द्र पोक्तं पुष्करजन्मने (७.२३९)’। ,पारमेश्वरसंहितायां विशिष्य सप्तमाध्याये पौष्करश्लोकाः वृन्दशो दृश्यन्ते।”

(पौष्करसंहिता बंगळूरावृत्ति प्रस्तावना पृ. ६५)

इत्येतादृशो यतिवराणामभिप्रायः पौष्करार्थकलने संपादनकार्ये बहूपयोगी सिद्धः। अत्र निर्देशार्होंऽशः पीठवीथीद्वारकोणरूपः मण्डलावयवसूचकः पारमेश्वर संहितायां मन्दिरावयवसूचकः श्रीरङ्गम्–स्थितरङ्गनाथालयस्थावयवैः साधर्म्य भजते। तथा च अघनिर्मोचनादि पौष्करोक्तमण्डलनामानि पारमेश्वरे मन्दिरसालाभिधानानि वर्तन्ते। तेन हि मण्डलाकृतीनां मूल्याङ्कनं स्थापत्यशास्त्रान्तर्गत–स्थलालेखरूपेण

कर्तुमपि शक्यते। पौष्करसंहितोक्त मण्डलाकृतीनां विमर्शार्हि त्रिविधांशः भौमितिकचित्रारेखनकला, रञ्जनविधौ वर्णसमायोजकला, मण्डलाकृतीनां विशिष्य च वास्तुमण्डलाकृतेः स्थापत्योपयोगिता इत्यादिरूपः तन्त्रविज्ञानशास्त्रीयविमर्शकानां पुरतः स्थापितेऽस्यामावृत्तौ।

बंगळूरुवृत्तेः प्रकाशकैः श्रीनिवासायंगार महोदयैः तैरेव प्रकाशितायामविरुद्ध संहितायां (मैसूरु १९५६) सात्वतपौष्करसंहितावलम्बित्वं सूचितं प्रस्तावनायाम्। "अस्यामनिरुद्धसंहितायां पौष्करसंहितोक्तप्रकारः सात्वतोक्तप्रकाशश्चावलम्बितः इति ज्ञायते। यथा-

पौष्करोक्तप्रकारेण यन्त्र विष्णुमथापि वा। वासुदेवाख्ययन्त्रं वा सात्वतोक्तमथापि वा॥ २४-२६. इति।

पौष्करसंहितायाः प्रकाशनं नीयमानेऽस्मिन् प्रथमभागे भूपरीक्षादिक्सिद्धि-वास्तुमण्डललेखन-मण्डपनिर्माण-मण्डलाकृतीकां रचनेत्यादिनः वास्तुशिल्पशास्त्रोपयोगिनो विषयाः विस्तरेण वर्णिताः। द्विनीयभागे तावत् सप्तत्रिंशाध्यायतः त्रिचत्वारिंशाध्यायपर्यंत श्राद्धविधानादिकाः स्वयंव्यक्तक्षेत्रादिकाः; आढ्यविद्यापीठादिप्रतिष्ठानादिकाः विषयाः सन्ति यत्र हि आकृतिकल्पनस्यावकाशो न विद्यते। अचिरादेव पौष्करसंहितायाः आङ्गालानुवादसंहितो द्वितीयो भागः प्रकाशनार्थं सिद्धो भविष्यति। प्रथमभागेऽस्मिन् ग्रन्थपातबाहुल्यं पूर्वतनैरेव संपादकैरनुभूतं तत्प्राह्यर्थं भगवानेव शरणमिति सूचितम्। तदभावो हि पूरयितुमसंभव इति ज्ञात्वा संपादनकार्ये तृतीय एव पन्थाः अवलम्बितोऽत्रास्माभिः। सो हि मण्डलाकृतीनां पुनरारेखनं तद्द्वारातु प्रांशपूरणयत्नश्च। पञ्चमाध्याये पञ्चविंशतितम-मण्डलाकृतौ पूर्वमण्डलाकृतीनां रचनाध्ययनद्वारा संकल्पपूर्वं मण्डलाकृतेः पुनर्निर्माणं तदाधारेण च तद्विषयक श्लोकानां पुन-

निर्माणं विहितमस्माभिः। तत्सर्वं समाविष्टं वर्ततेऽस्मिन् ग्रन्थे। किंतु यत्नोऽयमद्यापि न पूर्णः। सप्तमाऽष्टमाध्याये केचनानुवादाशा : अपूर्णाः सन्ति। प्रस्तावनायां प्रतिपाद्याः अन्ये विषयाः श्राडर, डेंनियलस्मिथ भट्टाचार्यप्रभृतिभि : पूर्वमेव तत्रतत्र परामृष्टा इति न विमृश्यन्तेऽत्र पुनरुक्तिदोषभयात्।

कृतज्ञता

तिरुपति, युगादिः शालिवाहन शाके १९१३ प्रभाकर पांडुरंग आपटे
१७–३--१९९१

*

कृतज्ञताविष्कारः

सार्धहस्ता द्विहस्ताश्च तदा सार्धद्विहस्तकाः ॥ १२ ॥

वीथिका स्वल्पविस्तारा यागानां समुदाहृता ।
अधमं मध्यमं [2]हस्तौ यागानां सा त्रिहस्तका ॥ १३ ॥

अधिका सार्धहस्तेन[3]वीधी शुभतरा मता ।
कार्या विस्तीर्गमानानां यागानां सा भिन्नरूपिणांम् ॥ १४ ॥

गमनेमिचतुर्हस्ता षड्गोलक[4]युताऽथवा ।
[5]युगाख्यस्य च चक्रस्य अन्तेग्रद्विसमा ? स्मृता ॥ १५ ॥

स्वैव सांवत्सरी यस्य द्वादशाङ्गुलकैर्विना ।
बलि[6]पुष्पा.........भूस्ताभ्यां विविक्तां परिकल्पयेत् ॥ १६ ॥

[7]अस्त्राति.........यं प्रणीतमया च ते ? ।
भूभागे संमितं कुर्यात् सर्वेषां च पृथक् पृथक् ॥ १७ ॥

---

1. क-ग-तैवेद्य
2. ख-हस्तं
3, क-ग-विधिश्शुभ
4. ख-युता तु वा
5. क-ग-युगाभ्यास्य च
6. क-ख-पुष्पास्य
7. ख-ग-अस्त्रातिष्वति......मतं

वितानानां च यागानां [1]स......र्धसमं भवेत् ।
कुर्याच्च भूमिविस्तारमस्त्राद्युक्तं भ्रमान्तिकम् ॥ १८ ॥

हस्तादिपञ्चहस्तान्तं यागमानं च सङ्गतम् ।
ऊनाधिकं च षड्ढस्ता[2]न्मा (न) मस्य प्रजायते ॥ १९ ॥

यावद्द्वादशहस्तं स्यात् किञ्चिद्धीनं तु [3]त्वाऽधिकम् ।
मध्यमं[4]विद्धि तन्मानं ततोर्ध्वं तु स्मृतं महत् । ॥ २० ॥

प्रमाणमेवमादौ तु चिन्तयित्वा प्रयत्नतः ।
[5]यागवेश्म.........कुर्यात्तस्य तु लक्षणम् ॥ २१ ॥

स्वल्पमण्डलगेहानां हस्येनैकेन कल्पयेत् ।
[6]वैपुल्यं विप्र भित्तीनामथवार्धाधिकेन तु ॥ २२ ।

द्विहस्तं मध्यमानां तु [7]भित्ति......... ।
विस्तीर्णा यागवेश्मानां भित्तिविस्तारमब्जज ॥ २३ ॥

कुर्याद्धस्तचतुष्केण पञ्चकेनाथवेच्छया ।
षट्सप्ताष्टसमोच्छ्राया महीयं सङ्गवेषु च ॥ २४ ॥

---

1. ख–सकलोत्थसमं ग–सकगोर्धसमं
2. क–ग–न्मास...............प्रजा........
3. ख–साधिकं ग–वाधिकं
4. क–विहितं ग–विधितन्मानं
5. ख–ग–यागयेन्मस्तहरणं
6. ख–वैपुल्यं इत्याद्यर्धचतुष्टयं गलितम्
7. प–भित्तिममातिमशा भवेत्

नवहस्ता द्विजश्रेष्ठ दशैका [1]दशधोच्छ्रिता।
[2]भक्ति (? भित्ति) सङ्घं तु सम्पाद्य मध्यमानं तु सर्वदा ॥ २५ ॥

करद्वादशदीर्घं च तथैवैकाधिकं तु तत् ।
चतुर्दशोच्छ्रितं वाऽपि विततानां प्रकल्पयेत् ॥ २६ ॥

अस्य न्यूनाति वा हि (? पि) स्यान्माण्डलीयस्य सर्वदा ।
त्रिविधं भित्तिमानं तु [3]मध्याह्ने तद्व्यपेक्षया ॥ २७ ॥

कल्पनीयं............माया संख्यया कमलोद्भव ।
उत्तरोत्तरया चैव [4]वैपुल्येन सहैव हि ॥ २८ ॥

काष्ठपक्वेष्टकामिश्रं सुधालेपाय सात्विकम् ।
यागमण्डपनिर्माणं प्रशस्तं सर्वसिद्धिदम् ॥ २९ ॥

यथाकालं यथादेशं कुर्याद्वित्तानुरूपतः ।
स्वल्पानां यागवेश्मानां द्वारमेकं प्रकल्पयेत् ॥ ३० ॥

मध्यतः पूर्वदिग्भागे पश्चिमे ह्येवमेव च ।
दिगन्तरपरित्यागात् [5]कृत (? दतद्) द्वारमसिद्धिदम् ॥ ३१ ॥

---

1. क–दश.... ताम्
2. क–भक्त
3. क–मध्या व्यपेक्षया ग–मध्याह्न व्यपक्षया
4. क–ख–वैपुलेन
5. क–ग–घ–त्यागं

तस्माद्दिक्षु प्रयत्नेन मध्यतो विनिवेशयेत् ।
मध्यप्रमाणगेहानां द्वे द्वारे पूर्वपश्चिमे ॥ ३२ ॥

अतिविस्तीर्णमानानां प्राकाराणां प्रकल्पयेत् ।
दिक्षु द्वारचतुष्कं तु प्राकाराणां तथैव हि ॥ ३३ ॥

अस्त्रत्रयेण न्यूनानां कुर्यात् सार्धेन चोच्छ्रितम् ।
स्वविस्ताराच्च मध्यानां चतुर्थांशेन कल्पितम् ॥ ३४ ॥

अन्येषां पश्चिमांशेन द्वारोच्छ्रायं प्रकल्पयेत् ।
त्रिभागेनाथ वधेन ? (? वार्धेन) [1]सोच्छ्रायाद्धि विविक्तता ॥ ३५ ॥

द्वारीयशाखायुग्मस्य उदुम्बरयुगस्य च ।
उच्छ्रायात् पश्चिमांशेन न्यूनानां विस्तृतिर्भवेत् ॥ ३६ ॥

चतुर्थांशेन मध्यानामथोर्ध्वानां त्रिभागतः ।
विस्तरार्धेन बाहुल्यं [2]शङ्क्वादींस्तान् समाचरेत् ॥ ३७ ॥

पञ्चसप्तक्रमाच्छाखानवकेनान्वितं तु तत् ।
द्वारे द्वारे तु शाखाभ्यां चतुर्थांशे व्यवस्थिते ॥ ३८ ॥

द्वारस्थं[3]द्विति (? भित्ति) स्थितिं कुर्यात् स्वदिग्भागक्रमेण तु ।
वज्रनाभं हरीशं च पूर्वस्यां दक्षिणोत्तरे ॥ ३९ ॥

---

1. ख–सोच्छ्रायाद् विद्धि वित्त
2. क–शङ्खादी......समाचरेत्
3. सर्वत्र 'द्वितिस्थ' इत्येदास्ति

शङ्खचक्रधरं चैव वज्रवेत्रलताधरम् ।
निषेधाभिनयोपेतं श्रोणीतटकरार्पितम् ॥ ४० ॥

हव्यस्वरूपसदृशं नेत्रवृन्दं यदेव हि ।
क्रूरं [1]दृगद्भुतोपेतं वज्रनाभं प्रकल्पयेत् ॥ ४१ ॥

एवमेव हरीशं च निषेधाभिनयोज्झितम् ।
प्रवेशाभिनयाख्येन पाणिना किन्तु चिह्नितम् ॥ ४२ ॥

एको ह्यत्र निषेधं च स्वभक्तानां करोति वै ।
भक्तानामपरश्चैव प्रवेशं संप्रयच्छति ॥ ४३ ॥

द्वारे द्वारे प्रतीहारद्वयस्यैव प्रयोजनम् ।
धर्माध्यक्षो नियन्ता च [2]दक्षिणे दक्षिणोत्तरम् ॥ ४४ ॥

बाणकार्मुकमेकस्मिन् [3]पाणौ पाशं तथापरे ।
कुर्यादन्तकसादृश्यौ पूर्ववद्भुजभूषितौ ॥ ४५ ॥

किन्तु दण्डगदाहस्तौ वज्रचक्रविवर्जितौ ।
शुद्धाक्षममृतानन्दं प्रतीच्यां दक्षिणादितः ॥ ४६ ॥

[4]बाणकार्मुकमेस्मिन् पाणौ पाशं तथापरे ।
अन्यत् करचतुष्कं यदन्यग्रं पूर्ववद्भवेत् ॥ ४७ ॥

---

[1] क–ग–दृग्गतोतोपेतं

[2] ख–दक्षिणे दक्षिणोत्तरं इत्यक्षराणि दृश्यन्ते । इदं प्रमादपतितं समनन्तरार्धस्य अन्त्य पादगतम्

[3] श्लो. ४७ अंशः

[4] ख–इदमर्धं गलितम्

आकृतौ जलनाथस्य सदृशो सर्वदैव हि ।
वसुनाथं सुधानन्दमुदग्दिग्दक्षिणोत्तरे ॥ ४८ ॥

खड्गमुद्गरहस्तौ च प्राग्वच्छेषं चतुष्टयम् ।
कराणामनयोः कार्यं [1]रूपेणोडुपतेस्समौ ॥ ४९ ॥

ततस्सारसकह्लारसचक्रं कम्बुपालिमिः ? ।
........वनमालाविभूषितम् ॥ ५० ॥

स्वस्ति[2]राम रक्षीश........यमुनान्वितम् ।
पूर्णकुम्भश्रियोपेतं नागेन्द्रैस्सारसान्वितैः ॥ ५१ ॥

भूषयेद्द्वारशाखाभ्यामूर्ध्वो[3]दुम्बरकं द्विज ।
व्यालसिंहगजाश्वाद्यैरुदुम्बरमतस्तितम् ॥ ५२ ॥

पूर्वं (? र)णीयं ? न पूर्वोक्तैर्युक्तं कुर्यात् कदाचन ।
त्रिभागेनोन्नतद्वार उच्छ्रायार्धेन सम्ययत् ? ॥ ५३ ॥

शाखाद्यैर्द्वारवत्युक्तं गवाक्षगणमीदृशम् ।
[4]दिक्कलीकं (? कीलकं) समापाद्य द्विचतुष्षट्कसंख्यया ॥ ५४ ॥

द्वाराणां सगवाक्षणां कपोतौ सुमनोहरौ ।
विचित्रचित्रौ पङ्क्तौ च [5]निसृतौ वा प्रकल्पयेत् । ॥ ५५ ॥

---

1. क–ग–रूपेण सुपतैः
2. ख–गं–रामपरक्षीशस्तदीवीयमुना
3. ख–दुम्बरके
4. क–दिक्क......समापाद्य
5. क–ख–ग–घ–निश्रमौ

दार्वायसाङ्गोपेतरवद्वारादिकं द्विज ।
भित्तिबन्धं विनिश्चित्य विचिन्वीयात् क्रमेण तु ॥ ५६ ॥

स्तम्भविन्यासमधुना मण्डपानां निबोध तु ।
यागागारगणस्वल्पं [1]यत्तत् स्तम्भविवर्जितम् ॥ ५७ ॥

शेषस्तम्भयुतं कुर्याद्यथा तत् कथयामि ते ।
बलिभूमिसमीपानां यागभूमेस्समन्ततः ॥ ५८ ॥

त्यक्त्वा भू (? भ्र) मणिभूभागात् स्तम्भविन्यासमुच्यते ।
[2]प्रच्यादिदिक्चतुष्कं तु मध्यसूत्रेण पौष्कर ॥ ५९ ॥

समीक्षयित्वा तान् सर्वांस्तत्र स्तम्भावलिं न्यसेत् ।
पूजार्थमुपविष्टस्य स्तम्भेन स्याद्यथाक्रमम ॥ ६० ॥

स्तम्भानामन्तरं चैव सन्ततस्संख्यया यजेत् ।
चतुष्कमष्टकं चैव चतुष्कं च द्विरष्टकम् ॥ ६१ ॥

त्रिरष्टकं च स्तम्भानामथवा चतुरष्टकम् ।
तत् सार्धे द्विगुणं वाऽथ ज्ञात्वा मण्डपविस्तृत (? ति) म् ॥ ६२ ॥

[3]स्तम्भानि च सुवृत्तानि अष्टाश्राण्यथवा द्विज ।
द्विषट्कषोडशाश्राणि नानाकर्मयुतानि च ॥ ६३ ॥

---

1. ख–तत्तस्तम्भ
2. क–ग–प्राच्याद्य
3 क–ग–स्तम्भानिव सुवृत्तानि

शिष्टानामर्ध[1]विस्तारात् तद्भिर्यं वाऽथवा द्विज ।
स्थूलान्यथ यथालाभं तथा रव्य (? चायव्य)पेक्षया ॥ ६४ ॥

अथ भित्तिसमाविष्ट आसनादिविभूषितम् ।
चतुरभ्यधिकं चैव स्तम्भेभ्यः कन्यकागणम् ॥ ६५ ॥

नियोनियम ? (? नियमोऽप्यतु) सर्वत्र नियमोऽयं न पौष्कर ।
यत्र स्तम्भो नरजितास्तत्र स्तम्भसमन्वितम् ॥ ६६ ॥

[2]चतुरश्रचतुष्पष्टिसंख्यास्तम्भा[3]विव........ ।
अन्यपूर्णानि धामानि चतुष्कं कन्यका न्यसेत् ॥ ६७ ॥

स्तम्भानां रचनाद्यानां स्तम्भाव्यास ? महामते ।
द्व्यर्धभागप्रमाणेन तासां विस्तारमाचरेत् ॥ ६८ ॥

त्रिभागेन स्वविस्तारं तद्बाहुल्यं तु पद्मज ।
एवमादीनि सङ्घेन [4]युग्मास्स्तम्भगणाः पुरा ॥ ६९ ॥

कृत्वा तदूर्ध्वगं पश्चात् समारोप्यस्तुलागणः ।
ऊर्ध्वं तच्छादनार्थं तु यथा तद्वदतश्शृणु ॥ ७० ॥

भित्तिबन्धं पुरा कृत्वा युक्तितः कन्यकागणम् ।
बन्धैः [5]कार्ष्णायसाद्यैस्तु यथादो ल्यमग्रजम् ॥ ७१ ॥

---

1. क-विस्तार......यं वा
2. क-ग-चतुरष्टचतु
3, ख-विवर्जनम् ग-विवर्जया
4. क-ग-युगास्तम्भ
5. ख-काष्ठायसा

शक्यन्ते [1]हारमु.........न यात्युन्मूलता यथा ।
त्रिचतुःपञ्चहस्ताद्वा प्रमाणं चतुरङ्कणम् ॥ ७२ ॥

स्तम्भानामग्रतस्ताक्ष्यों यागभूमे[2]र्द्विजो ध्वजः ।
सन्धार्य बलवंशैस्तु सुस्पष्टैस्सुदृढैस्ततः ॥ ७३ ॥

स्तम्भकन्याशिरोबन्धं कृत्वा यत्नेन वेतुला ? ।
पुरा मूलं न्यसेद्भित्ति नो[3].........र्गतम् ॥ ७४ ॥

वेधयित्वा ततो मूलं तस्मिन् काष्ठे भुजं न्यसेत् ।
भित्तिजं लम्बमानस्य स्थूलतुर्यांश्लक्षणम् ॥ ७५ ॥

दृढकाष्ठसमुद्भूतैस्सस्थूलैर्बहुभिस्तथा ।
स्तम्भानां कन्यकानां च तुल्यानां तु तथा द्विज ॥ ७६ ॥

बन्धश्च सदृशं दद्यात् पात्रैश्चायसनिर्मितैः ।
शङ्कुभिश्शृङ्खलाद्यैश्च बहुभिस्स्याद्यथाचलम् ॥ ७७ ॥

तुलामूलप्रदेशेऽथ भित्त्यादुपरि पौष्कर ।
इष्टकाभिः सुधालेपैः [4]कुर्याच्छीर्षगणं महत् ॥ ७८ ॥

अथ चन्द्रसमाकारमथवाङ्क (? म) [5]लसारवत् ।
क्रममाणविलाकाशं ? तदूर्ध्वें खं विराङ्गणम् ॥ ७९ ॥

---

1. हारमुद्गौर्सु .....
2. ध्वजो द्विज इति चेत् साधु
3. ख–ग–नो किं चिदेवि
4. क–कुर्यादृषिगणं
5. क–सारयल्

[1]त्रिमण्याख्यं कृतं मार्गं भित्तेस्स्तम्भावसातन (? नक)म् ।
तुलानामूर्ध्वगं सर्वं भित्तिभूमिं समापयेत् ॥ ८० ॥

सह मृत्काष्ठवर्गैस्तु चूर्णेन क्षीयते न तु ।
तुलाशयस्यैवमेवं स्थितिं कृत्वा च[2]वर्ण्मतः ॥ ८१ ॥

कुर्यात्तदग्रतो भूयस्थितिं चावलसिद्धयेत ? ।
स्तम्भप्रदेश[3]कण्ठानां रोप्यो बहुगुणो दृढम ॥ ८२ ॥

निर्गतं च तुलान्तं यत् तच्छिरोपरि विन्यसेत् ।
तुलया सह तद्बाहुं प्रायश्शस्त्रेण बन्धयेत् ॥ ८३ ॥

किन्नरोरगगन्धर्वयक्षविद्याधरैस्सह ।
क्रीडमानास्स्वकान्ताभिस्ते च कार्यास्तुलाधराः ॥ ८४ ॥

ततस्तुलानामग्रे तु सुलग्नां स्तम्भसन्ततिम् ।
किञ्चित् समुच्छ्रितं दत्त्वा परितः पद्मसम्भव ॥ ८५ ॥

[4]शङ्को..........छादनस्य स्थितस्य च ।
स्तम्भानामूर्ध्वगं दद्यान्नियुतं तु तुलागणम् ॥ ८६ ॥

तच्चूलामूर्ध्वगं दद्याद्बाहुं कुब्जप्रसारितम् ।
सुगन्धमावसेनैव विश्रान्तं प्राक् तुलोपरि ॥ ८७ ॥

---

1. क–क्रमव्याख्यं तु तम्मार्गं
2. ख–वर्गतः
3. ख–कर्णानामाप्यो
4. ख–शङ्कोश्शनार्थमुतीव ग–शङ्कोश्शनार्थमुत्थीय

तस्यापि [1]पूर्ववद्द्याद्बन्धं च तुलया सह ।
उपबाहुद्वयेनापि तिर्यग्युक्तेन [2]सार्यताम् ॥ ८८ ॥

प्राक् पूर्वं च तुलाग्रस्थं दद्यादग्रभुजं पुनः ।
पश्चादुपतुलानां तु अग्रतो वंशसन्तति ॥ ८९ ॥

रोप्यं संकोपयेदग्रमप्रसुप्तमिवाम्बुजम् ।
तिर्यक् प्रसारितैर्वंशैर्लघुभिर्लघुभिः क्रमात् ॥ ९० ॥
प्रपूर्यमन्तिकं तं तु छादनीयं च तत्ततः ।
तनुभिर्लघुभिश्चैव काष्ठगैश्च गणैर्दृढैः ॥ ९१ ॥

[3]वर्गैरूर्णमयैर्वाथ कोऽय ? सन्धरणक्षमैः ।
भित्तौ भित्तौ चतुस्त्रैर्वा प्रलयानि च योज्य च ॥ ९२ ॥

मध्ये मस्तकचन्द्राणां चन्दनाधच्युतस्य च ।
कदाचित् तस्य मेघोत्थं मेघस्य [4]वहनाय च ॥ ९३ ॥

पादपृष्ठयुते देशे.........काले ह्युपार्जिते ।
क्षिप्रकर्मप्रसिद्ध्यर्थं शरकाष्ठमयं शुभम् ॥ ९४ ॥

गवाक्षकान्वितं चैव द्वारैस्तु परिभूषितैः ।
छन्नं वितानकेनोर्ध्वे प्राकारं परिकल्पयेत् ॥ ९५ ॥

---

[1] ख–पूर्ववद्दत्वा बन्धं

[2] ख–साध्यतां

[3] क–वर्गै......सन्धारण

[4] सर्वत्र 'वाहनाय च' इत्येव वर्तते

रजोनिर्मुक्तयागानां [1]दिक्.........पलिखितात्मनाम् ।
गैरिकाकुङ्कुमाद्यैश्च स्त्रीणां नानाविशेषतः ॥ ९६ ॥

दीर्घकालीयकानां तु कुर्यात् पक्वेष्टकादिकैः ।
प्राकारं गोपनार्थं तु प्रोन्नतं सुदृढं महत् । ९७ ॥

चतुरश्रं [2]सुवृत्तं च त्रिकोणं वा मनोहरम् ।
सदृशं पूज्ययागस्य [3]तज्ज्ञानकलितं दृढम् ॥ ९८ ॥

कृत्वैवं मण्डपं युक्त्या तन्मध्ये तु प्रकल्पयेत् ।
दृढां समां तदाकारामीषत् प्रागुत्तरप्लवाम् ॥ ९९ ॥

प्रोच्छ्रितां च विशेषेण स्थलां दर्पणसन्निभाम् ।
[4]सामान्या न भवेद्येन मेदिनी मण्डपस्य तु ॥ १०० ॥

तत्तु पूजोत्सुकामानां ? कुर्यादीनां ? तु पौष्कर ।
विविक्तेनाङ्गुलानां तु प्रोन्नतेर्यावदष्टकम् ॥ १०१ ॥

एकवृद्ध्याल्पवेश्मानां नित्यं कुर्यात् स्थलागणम् ।
नावाङ्गुलोन्नतेस्तद्वद्यावत् पञ्चदशाङ्गुलम् ॥ १०२ ॥

प्रोन्नतत्वं स्थलानां च मध्यमेषु गृहेषु च ।
चतुर्विंशत्यङ्गुलान्तमुच्छ्रायं षोडशाङ्गुलम् (लात्) ॥ १०३ ॥

---

1. ख–ग–दिक्पलोल
2. ख–सुवृत्तं तु
3. क–ग–तन्मान
4. ख–सामान्या तु

प्राग्वच्च वृद्धया कर्तव्यं ज्येष्ठाकारं गणस्य च ।
एतदुच्छ्रायमानं तु कथितं ते स्थलासु च ॥ १०४ ॥

पादमर्धं तु हस्तं वा विस्तारात्त सर्वदिक्षु वै ।
स्थलानामिष्टकाद्यैश्च चिन्वीयात् प्रथमं ततः ॥ १०५ ॥

मृदा संपूर्य तन्मध्यमीषद्वालुकयाऽन्वितम् ।
परीक्ष्य केशकीटादीनारोग्यं तदनन्तरम् ॥ १०६ ॥

यावद्भवति पूर्वोक्तं लक्षणं वा विशेषतः ।
स्थलां मध्योदितां रम्यां [1]सप्तमाहं परिक्ष्य च ॥ १०७ ॥

न ददाति यथा भेदं यागयोग्या भवेत्ततः ।
प्रतिष्ठाप्य ततो ब्रह्मन् वेदिकातोरणान्वितम् ॥ १०८ ॥

बहिश्चतुष्किकाश्राणां समीपे न तु दूरतः ।
चतुष्पादसमायुक्तमनेकाङ्घ्रियुता यदि ॥ १०९ ॥

चतुर्वेशाच्चतुर्दिक्षु सुसमेष्वन्तरेषु च ।
कुर्याद्वै पादविन्यासं वेदैर्वेदविदां वर ॥ ११० ॥

चतुर्द्वादशपादा सा विंशत्यङ्घ्रिसमन्विता ।
अष्टाष्टाधिकवृद्धया वा संयुगापादसन्तते ॥ १११ ॥

क्षमाविस्तारजेनैव भिन्नैराधेयविंशकैः ।
तस्मिन् यागगृहे दत्ता पुरा स्तम्भावली शुभा ॥ ११२ ॥

---

[1] सप्तमासं

चत्वारि तोरणान्यस्मिंश्चतुर्दिक्षु नियोज्य च ।
त्रीणि त्रीण्यथवा सम्यगेकैकस्यां न्यसेद्दिशि ॥ ११३ ॥

बुद्ध्वा मण्डपविस्तारपञ्चकं सप्तकं तु वा ।
वेश्मनि स्तम्भहीने तु वेदिकातोरणैस्सह ॥ ११४ ॥

कार्या लक्षणसंयुक्ता यादृक् तदवधारय ।
पूर्वं सामान्यमानेन सविशेषेण वै ततः ॥ ११५ ॥

पावनैर्यज्ञकाष्ठैश्च सुदृढैस्सरलैस्समैः ।
तुलायामोच्छ्रितैर्दण्डैस्स्वस्वरांशविवर्धितैः ॥ ११६ ॥

वेदवेदविदां श्रेष्ठ प्रोच्छ्रायेण भवेच्छुभः ।
तेनैवायामयोगेन कुर्यात् पादाधिकेन च ॥ ११७ ॥

तोरणानां समुच्छ्रायं तत्त्रिभागेन विस्तृतिः ।
तद्दण्डनिचयं सर्वमूर्ध्वदण्डगणं विना ॥ ११८ ॥

त्रिधा कृत्वा समैर्भागैरूर्ध्वगा वर्तुला भवेत् ।
तदधस्तद्द्वितीयं यत् तदष्टाश्रं समापयेत् ॥ ११९ ॥

चतुरश्रं तृतीयं तु [1]भागात्तत्तदधः स्थितम् ।
सर्वाण्याधेयदण्डानि सर्वतो वर्तुलानि च ॥ १२० ॥

चतुरश्राणि वा कुर्यान्नानाक्युता च ।
सपुष्पमञ्जरीपत्रविहगैरन्वितानि च ॥ १२१ ॥

---

[1] ख–भागंतत्तदधः

त्रिचतुःपञ्चषट्सप्तस्थौल्यादष्टाङ्गुलानि च ।
अष्टमाशायो (? मांशैर्यो) घिकस्तु वेदैस्तन्निखने क्षितौ ॥ १२२ ॥

तत्समं तोरणं चान्यन्न्यस्येद्भूमौ द्विजांशकम् ।
इति सामान्यमानेन युक्तयुक्तं च लक्षणम् ॥ १२३ ॥

वेदश्चरणदण्डानां [1]तद्विशेषान् शृणुष्व भोः ।
[2]हरेरूर्ध्वात् षडंशं तु त्यक्त्वा पञ्चांशसंमितम् ॥ १२४ ॥

एतद्द्वादशमांशेन तोरण मानमब्जज ।
सममध्यत्रिभागं च सर्वदण्डेषु भूगतम् ॥ १२५ ॥

मुख्योन्नतेभ्यस्सारेभ्यः प्राकारेष्वथ वेश्मवत् ।
मन्दिरे स्तम्भसंयुक्ते तोरणोच्छ्रायमब्जज ॥ १२६ ॥

स्तम्भायामसमं [3]कुर्यात्तद्दण्डौ विन्यसेत् क्षितौ ।
स्तम्भमस्तकमानेन साधिकेन तदेव हि ॥ १२७ ॥

[4]स्तम्भपादोन्नतस्थेन प्रमाणेन प्रकल्प्य च ।
वैपुल्यं तोरणानां च स्तम्भाभ्यन्तरगास्थितम् ॥ १२८ ॥

तद्देवेन्द्रस्वरूपेण कार्या वेदविदां वर ।
चक्रद्वितयमध्यस्थं [5]पक्षमण्डलमण्डितम् ॥ १२९ ॥

---

[1] क–ग–तद्विशेष......शृणु
[2] क–ख–..........षडंशं तु
[3] ख–त्तद्दण्डं
[4] ग–स्तम्भपादां ततस्तेन
[5] क–ग–पक्ष्म

तोरणे तोरणे कुर्याद्गरुडं चोर्ध्वसंस्थितम् ।
[1]तूपेरश्रमपारं ....सचित्रं चित्रयेत् ततः ॥ १३० ॥

मुनिसिद्धामर [2]प्राप्तैरनेकाद्भुतदर्शिभिः ।
दिशापालवनोद्यानैर्बहुभि[3]र्मृगयूथपैः ॥ १३१ ॥

तद्यागवेश्म सकलं रञ्जनीयं प्रयत्नतः ।
कुर्यात् सुधाविलिप्तं वा भूषयेत्तदनन्तरम् ॥ १३२ ॥

दर्पणैश्चामरैर्वस्त्रैर्दुकूलैर्विविधोज्ज्वलैः ।
घण्टाभिरर्धचन्द्राचैरातपत्रैर्मनोरमैः ॥ १३३ ॥

विचित्रेण वितानेन सुसितेनोज्ज्वलेन वा ।
कर्णिकाजालयुक्तेन वेदेरूर्ध्वं तु भूषयेत् ॥ १३४ ॥

प्रागुत्तराच्चु दिग्भागाद्यावत्कोणं तु मारुतम् ।
सितादिवर्णभेदोत्थाः पताकास्तत्र योजयेत् ॥ १३५ ॥

एवं रागविभागेन प्रत्यग्भागाच्च वै पुनः ।
दक्षिणाशाविधिर्यावद्द्वितीयं च चतुष्टयम् ॥ १३६ ॥

एकेन [4]सर्वाणि च.........उभौ कुर्याद्वितानके ।
तीरणं यो वितानं च समानं विनिवेशनम् ॥ १३७ ॥

---

1. ग–कूपेरश्रम
2. ख–प्रान्तै
3. क–ग–गुरूयूथपैः
4. ख–सर्वपर्णी च

ध्वजाष्टकं समारोप्य यथा तदवधारय ।
वह्निकोणात् समारभ्य यावत्कोणं तु शाङ्करम् ॥ १३८ ॥

सितारुणे च पीतं च कृष्णं कुर्याच्चतुष्टयम् ।
भूयश्चोत्तरदिग्भागा यावद्दिक्पश्चिमं द्विज ॥ १३९ ॥

[1]तथाविधाश्चतुष्कं तु ध्वजानां परिकीर्तितम् ।
राजपाषाणवर्णाभं चक्रपक्षीश्वरोपगम् ॥ १४० ॥

वैजयन्तीत्रयं कुर्यात् तोरणे पूर्वदिक्स्थिते ।
दक्षिणे स्फटिकाभं तु प्रत्यक् सिन्दूरवर्चसम् । ॥ १४१ ॥

हेमाभं चात्तरे कुर्यात् तोरणे ध्वजकत्रयम् ।
चतुष्केण पताकानां युक्तं श्वेतादिकेन तु ॥ १४२ ॥

एकैकं तोरणं यत्र त्रितयं पञ्चकं तु वा ।
अर्धेन तोरणायामात् पताकानां च [2]दीर्घता ॥ १४३ ॥

विस्तारं[3]सार्धभागेन तासां कुर्यात्तु सर्वदा ।
ध्वजानां तु स ह्लायं पूर्वोक्तमथवाऽब्जज ॥ १४४ ॥

---

1. ख–तथाविधं पातकं तु
2. क–ग–दीर्घिका
3. ख–स्वार्ध

तोरणार्धसमं कुर्यात् त्र्यंशेन [1]स्वैव विस्तृतिः ।
ध्वजास्त्रवाहनोपेता [2]भागेष्वनुचरैर्विना ॥ १४५ ॥

कार्या दिग्देवतास्सर्वा [3]यथाध्य.........विनिर्मिता ।
एवमेव प्रकारेण द्वारेषु सुसमेषु च ॥ १४६ ॥

चण्डाद्यं च सुभद्रान्तं बहिरङ्गगणाष्टकम् ।
[4]कुमुदाद्यन्तरङ्गं च भूतानामष्टकं परम् ॥ १४७ ॥

तोरणं तुर्यभागेन दैर्घ्यं तेषामुदाहृतम् ।
दैर्घ्यं चतुर्थभागेन विस्तारस्य[5]......... ॥ १४८ ॥

शतधामनिभं ध्यायेच्चतुर्बाहुं पुरन्दरम् ।
[6].........संस्थं तु [7]सुतीक्ष्णं कुलिशोद्यतम् ॥ १४९ ॥

अजारूढं [8]स्मरेद्रक्तं शक्तिपाणिं हुताशनम् ।
सहस्रार्चिभिराकीर्णं सहस्रादित्यभास्वरम् ॥ १५० ॥

---

1. क–सैव
2. ख–भागैः स्वानु
3. ख–यथाध्याय ग–यथाध्यवा
4. ख–कुमुदाद्यं द्विरङ्गं च
5. ख–पतगेषु च ग–स्याप्तगेषु च
6. क–सुवि......तु ख–श्वेतद्विपस्य ग-सुवितद्विपलब्धं
7. ख–सुकीर्ति
8. क–ग–स्मरेद्वृत्तं

महामहिषसंस्थं तमञ्जनाद्रिसमप्रभम् ।
सुभीमं दण्डहस्तं तु स्मरेद्देवमपीश्वरम् ॥ १५१ ॥

दंष्ट्राकरालवदनं कृष्णमेघसमप्रभम् ।
घोरं प्रेतासनं ध्यायेत् खड्गधृग्राक्षसेश्वरम् ॥ १५२ ॥

मुक्ताफलद्युतिसमं हिमपाशकरोद्यतम् ।
नागकन्यासहस्राढ्यं मकरस्थमपांपतिम् ॥ १५३ ॥

नीलतोयदसङ्काशं महाध्वज[1]पदाङ्कितम् ।
ध्यायेत् समीरणं देवं संस्थितं हरिणोपरि ॥ १५४ ॥

सोमं तारागणोपेतं शङ्खगोक्षीरपाण्डरम् ।
बृहच्छशकपृष्ठस्थं शशिं रात्रिकरं स्मरेत् ॥ १५५ ॥

सितभूतिविलिप्ताङ्गं त्रिनेत्रं वृषवाहनम् ।
त्रिशूलायुधहस्तं च ईशानं ज्ञानिनं स्मरेत ॥ १५६ ॥

पातालदिग्गतं ध्यायेत् [2]कूर्मारूढं हलायुधम् ।
सितं सहस्रफणभृ[3]द्योऽनन्तो नाम नागराट् ॥ १५७ ॥

[4]भूचक्रं भ्राम्यमाणं तु दण्डहस्तं प्रजापतिम् ।
हंसारूढं [5]स्वसंस्थं च ध्यायेद् ध्रुवमजं विभुम् ॥ १५८ ॥

---

1. ख–पटाङ्कितं
2. ख–कूर्मरूपं
3. क–ग–द्येनान्तो ख–द्येनन्तो
4. क–द्विचक्रं
5. ख–खगस्थं च

एते चतुर्भुजास्सर्वे अक्षसूत्रविभूषिताः ।
चिन्तयन्तः परं तत्त्वं [1]वराभयकरास्सदा ॥ १५९ ॥

दिव्याभरण[2]दिग्धाङ्गा दिव्यमाल्याम्बरान्विताः ।
दिव्यरूपधराश्चैव दिव्यगन्धवहा द्विज ॥ १६० ॥

एभ्यश्चतुर्भुजो ब्रह्मन् विज्ञातो वृषभध्वजः ।
द्विभुजाक्षकराश्चान्ये वरदाभयदास्तु वा ॥ १६१ ॥

इति लोकेश्वरेषूक्ता ? चण्डादीनामथोच्यते ।
बहिरङ्गगणानां च नं [3]सम्यक् क्रमेण तु ॥ १६२ ॥

तरुणादित्यसङ्काशो महोरस्कश्चतुर्भुजः ।
उन्नतश्चोन्नतांसश्च पूर्णाङ्गो नातिमांसलः ॥ १६३ ॥

घनोदरो निम्ननाभो रोमराजिविराजितः ।
दंष्ट्राकरालवदनः पिङ्गलश्मश्रुलोचनः ॥ १६४ ॥

मधुपिङ्गलनेत्रश्च कुटिलभ्रूलतायुतः ।
प्रलम्बलोलश्रवणः पृथुघ्राणस्मिताननः ॥ १६५ ॥

कुण्डलालङ्कृतश्चैव हारकेयूरभूषितः ।
बद्धोष्णीषललाटश्च नीलकेशाभ्यलङ्कृत ॥ १६६ ॥

---

1. क–ग–चरकायकराः
2. क–ग–सन्दिग्धां
3. ख–सर्वं क्रमेण तु

शुक्लाम्बरधरस्स्रग्वी भुजयुग्मेऽस्य दक्षिणे ।
[1]प्रोद्यतं संस्मरेच्चक्रं प्रज्वलन्तीं गदां परे ॥ १६७ ॥

श्रोणीतटनिषण्णां च विश्रान्तां वसुधातले ।
पूर्वे वामकरे शङ्खमन्यस्मिंश्चाक्षसूत्रकम् ॥ १६८ ॥

एवं गणाधिपश्चण्डो विक्रमेणापराजितः ।
क्रुद्धो विघ्नायुतानां च क्रमात् संहरणक्षमः ॥ १६९ ॥

आवाह्य मन्त्रनाथस्य तोरणे पुरतःस्थिते ।
विनिवेश्य यथा तत्र दक्षिणेन विभोर्भवेत् ॥ १७० ॥

स्याद्गुरोर्यजमानस्य वामभागे सदैव हि ।
तत्रैवापरभागे तु [2]प्रचण्डं त्वीदृशं न्यसेत् ॥ १७१ ॥

किन्तु सव्यापसव्याभ्यां भुजाभ्यां स्याद्विपर्ययः ।
भुजद्वयेन चण्डस्य वामे संपरिकीर्तितम् ॥ १७२ ॥

दक्षिणे तत्प्रचण्डस्य ध्येयं वा परिकल्प्य च ।
पद्मगर्भप्रतीकाशौ तादृशौ भीमविक्रमौ ॥ १७३ ॥

रक्ताम्बरधरौ चैव रक्तस्रगनुलेपनौ ।
गणौ धातृविधातारौ देवौ दक्षिणतस्स्थितौ ॥ १७४ ॥

---

1. ख–ध्यात्वा तं संस्मरे

2. ख–प्रचण्डसदृशं

अतसीकुसुमश्यामौ पीतमाल्याम्बरान्वितौ ।
[1]पीतोष्णीषधरौ रौद्रौ प्राग्वद्भुजविभूषितौ ॥ १७५ ॥

गणौ चण्डाकृतिधरौ दुर्दर्शौ दुरतिक्रमौ ।
जयं च विजयं नाम्ना प्रत्यग्भागे तथा न्यसेत् ॥ १७६ ॥

क्षीरकुन्दावदातौ च नीलकौशेयवाससौ ।
नीलनीरदवर्णाभैः पुष्पैर्भूषितविग्रहौ ॥ १७७ ॥

पूर्वोक्तगणसादृश्यौ नाम्ना भद्रसुभद्रकौ ।
न्यसेत्तोरणदण्डाभ्यां मन्त्रमूर्ते[2]रुदग्दिशम् ॥ १७८ ॥

एते गणेश्वरा ह्यष्टौ प्रभापुष्पाम्बरैर्विना ।
देहवक्त्राकृतेस्तुल्यौ तथैवाभरणायुधैः ॥ १७९ ॥

भक्तानां विघ्नजालस्य सर्वदिक्संस्थितस्य च ।
संसारफलदातुर्वै छेदनार्थं समुद्यतौ ॥ १८० ॥

परस्परमुखास्सर्वे स्थानकैस्संस्थितास्समैः ।
गणेशायुतलक्षैस्तु नानावर्णवपुर्धरैः ॥ १८१ ॥

अच्युताराधनपरैरेकैकं परिवारिताः ।
अथाग्रे लोकनाथस्य पूज्यौ द्वौ गणनायकौ ॥ १८२ ॥

कुमुदः कुमुदाक्षश्च प्रसन्नवदनेक्षणौ ।
तुहिनाचलसङ्काशौ प्रथमे वयसि स्थितौ ॥ १८३ ॥

---

[1] ख–बद्धोष्णीष

[2] क–ग–रुदग्भृशं

नानाभरणदिग्धाङ्गो नानाकुण्डलभूषितो ।
नानामाल्यान्वितो चैव नानामौलिधरो द्विज ॥ १८४ ॥

नानागन्धविलिप्ताङ्गो नानावस्त्रविभूषितो ।
कुमुदाख्यगणेशस्य [1]ध्यातव्यो दक्षिणः करः ॥ १८५ ॥

चन्द्ररश्मिप्रतीकाशचामरेण विराजितः ।
अभिगच्छाभयं ध्यायेद् द्वितीयं [2]दक्षिणं करम् ॥ १८६ ॥

भवभङ्गात् प्रपन्नानां परेषां गुणशासने ।
तस्यैवाद्यं वामकरं प्रबुद्धकमलोद्यतम् ॥ १८७ ॥

[3]तूष्णीं भीसूचकं ध्याये[4]द्बहिस्स्थानां करं परम् ।
एते द्वे कुमुदाक्षस्य वैपरीत्येन भावयेत् ॥ १८८ ॥

द्वाभ्यां द्वाभ्यां कराभ्यां तु अन्येषामेवमेव हि
पुण्डरीको वामनश्च द्वावेतौ हुतभुक्प्रभौ ॥ १८९ ॥

गरुडध्वजहस्तौ च शेषमन्यत् पुरोदितम् ।
कृत्वा ध्यात्वाथवा न्यस्य दक्षिणे भगवद्गृहे ॥ १९० ॥

शङ्कुकर्णाभिधानो यस्सर्वनेत्रश्च पौष्कर ।
द्वावेतौ चम्पकाभौ तु मायूरव्यजनोद्यतौ ॥ १९१ ॥

---

[1] ख–भवेयुर्दक्षिणे करे ।

[2] ख–दक्षिणे करे

[3] ख–तूष्णीं हासचतुष्कं तु

[4] क–ग–बहिस्स्थानपरं करं

महाविभूतेर्देवस्य प्रत्यग्वायुदिगास्थितौ ।
सुमुखस्सुप्रतिष्ठश्च वामभागगतौ विभोः ॥ १९२ ॥

चिन्त्यौ मुद्गफलश्यामावातपत्रकरोद्यतौ ।
नोक्तं शेषकराणां यत् तद्विद्धि कुमुदोद्यतम् ॥ १९३ ॥

एते भगवतो विप्र त्वन्तरङ्गा मयोदिताः ।
कर्मणा मनसा वाचा तद्भावगतमानसाः ॥ १९४ ॥

ज्ञानादिषड्गुणोपेतैराकीर्णाः कोटिशः परैः ।
भूतैस्सिद्धैरनन्तैश्च प्रार्थयानैः परं पदम् ॥ १९५ ॥

एवं कृते ततः पश्चाद्वेदिकातोरणैस्सह ।
[1]विलिप्य चन्दनाद्यैश्च गन्धवर्णोज्ज्वलैः क्रमात् ॥ १९६ ॥

चन्दनेन समालभ्य सेलेनोत्त[2]रदिग्गतम् ।
क्षीरेण चन्दनेनैव कुङ्कुमेन [3]कृतां स्थलीम् । ॥ १९७ ॥

रजनीचूर्णयुक्तेन ह्रीबेरेणाम्बुना सह ।
पुण्याहमोषधिभ्यां तद्द्वाराणां मण्डपावनिम् ॥ १९८ ॥

ततस्तु विविधैर्धूपैर्बहुभिर्धूपयेद् द्विज ।
वैराजभुवनाकारं श्वेतद्वीपोपमं तु वा ॥ १९९ ॥

---

[1] ख–विलिख्य

[2] ख–रदुर्गतम्

[3] ख–कृतं स्थलम्

क्लृप्त्वैवं मन्त्रमूर्तेस्तु यजतोद्यानमुत्तमम् ।
भक्तानामधिवासार्थमभिषेकावसानिकम् ॥ २०० ॥

शास्त्रोक्तभोग[1]मोक्षान्तं तत्र सर्वं समापयेत् ।
युक्तमेकप्रवेशेन यागाग्रस्थदिशं विना ॥ २०१ ॥

दिक्त्रयेऽभिमतायां वा [2]कुर्याद्भवनमण्डपम् ।
धूमनिगमनोपेतं नानाकुण्डविभूषितम् ॥ २०२ ॥

साज्यैश्च सपलाशैश्च संयुक्तं तोरणादिकैः ।
त्रिविधं कृतकौशेयं मेखलादाममण्डितम् । ॥ २०३ ॥

अभग्नमूलप्रान्तैर्हि[3]दर्भाभिः ? कमलोद्भव ।
वेदितोरणदण्डानि सर्वाणि परिवेष्ट्य च ॥ २०४ ॥

[4]भौमस्थानं यथाभागं दर्भैर्बहुशिरोरुहैः ।
विधून्वन्तमिवात्मानं सारङ्गेण समन्ततः ॥ २०५ ॥

मृदा गोमयमिश्राया ? मुपलिप्य यथाविधि ।
गुग्गुलैराज्ययुक्तैश्च धूपयेच्च हुनेत्ततः ॥ २०६ ॥

---

[1] क–मोक्षं तु
[2] ख–कुर्यात् सवन
[3] ख–द्वन्द्वाभिः
[4] ख–भौमस्थाने

ततस्सांसारिकानर्थान् सर्वान् भक्तजनस्य च ।
मन्त्रात्मा सुप्रसन्नस्तु [1]निर्दहत्यग्निमध्यतः

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
यागमण्डपलक्षणो नाम चतुर्थोऽध्यायः ।

---

[1] ख–दन्दहत्यग्नि

अथ पञ्चमोऽध्यायः

पौष्कर उवाच—

याग (? गां)स्तु देवदेवेश भद्रादीनि (? न्हि) प्रमाद्वद ।
यैर्दृष्टैस्समयी शश्वत् पुत्रवत्वं प्रपद्यते ॥ १ ॥

श्रीभगवानुवाच–

मण्डलं सर्वतोभद्रं भद्रकृत् प्रथमं स्मृतम् ।
अघनिर्मोचनं नाम द्वितीषं यस्य दर्शनात् ॥ २ ॥

अनेकजन्मोपात्तं तु कल्मषं क्षयमेति च ।
सदध्वं स्यात् तृतीयं च [1]धर्ममार्गप्रदर्शनम् ॥ ३ ॥

धर्माख्यं स्याच्चतुर्थं तु धर्मं यच्छति पूजनात् ।
पञ्चमं वसुगर्भं तु भक्तानां वसुवृद्धिकृत् ॥ ४ ॥

सर्वकामप्रदं यागं षष्ठमिच्छाफलप्रदम् ।
अमित्रध्नमतः प्रोक्तममित्रौघविनाशनम् ॥ ५ ॥

आयुष्य[2]मष्टकं (मं) प्रोक्तं यस्य पौष्करदर्शनात् ।
परमायुरवाप्नोति अपमृत्युं जहाति च ॥ ६ ॥

नवमं बलभद्रं तु बलोत्साहसमृद्धिकृत् ।
पौष्टिकं नाम दशमं पुष्टिकृत् पूजनाच्च वै ॥ ७ ॥

---

[1] ख–कर्ममार्गं

[2] सर्वत्र 'अष्टकम्' इत्येवास्ति

अथारोग्यप्रदं नाम सर्वामयविनाशनम् ।
द्वादशं च विवेकाख्यं फलं नामानुरूपकृत् ॥ ८ ॥

एतस्मात् परमं याग वागीशं नामतः स्मृतम् ।
येन संदृष्टमात्रेण वाग्विभूतिः प्रवर्तते ॥ ९ ॥

चतुर्दशं मानसं स्यात् दर्शनात् सौमनस्यकृत् ।
अतः पञ्चदशं यागं जयं नाम जयप्रदम् ॥ १० ॥

षोडशं स्वस्तिकाख्यं तु स्वस्तिकृद्विप्रपूजनात् ।
परमस्य तु यागस्य त्वनन्तं नाम कीर्तितम् ॥ ११ ॥

तदनन्तसुखावाप्तिं संयच्छत्याशुदर्शनात् ।
नित्यं नामाष्टदशमं (?) नित्यतृप्तिपदं तु तत् ॥ १२ ॥

भूतावासमतो नाम्ना मण्डलं मण्डलान्वितम् ।
यद्[1]दृष्ट्वा भविनां शश्वद्भवेद्भूतजयं (? यो) द्विज ॥ १३ ॥

अतः परममोघाख्यं यागं येन निवर्तते ।
ममता पूजितेनैव देहिनां भवसागरात् ॥ १४ ॥

सुप्रतिष्ठितमतो यो हि (? यागं) संपूजितेन वै ।
दृष्टेन परया भक्त्या मनश्शान्तिमवाप्नुयात् ॥ १५ ॥

बुद्ध्याधारमतः प्रोक्तं येन संपूजितेन तु ।
प्राप्नुयाच्च प्रतिष्ठानां बुद्धिं ब्रह्म (न्) स्वके पदे ॥ १६ ॥

---

[1] ख–घ–यं दृष्ट्वा

गुणाकर इति ज्ञेयं मण्डलं यत्र पौष्कर ।
गुणसङ्घः क्षयं याति [1]हृदि ध्यानाच्च पूजनात् ॥ १७ ॥

अस्यापरं [2]महायागं ध्रुवाख्यं च प्रकीर्तितम् ।
येनावलोकितेनैव संसारी समवाप्नुयात् ॥ १८ ॥

स्वात्मन्यवस्थितं (? ति) सम्यङ् न भूयः प्रकृतिं व्रजेत् ।
मण्डलं परमानन्दमेतत् स्यात् परमं पदम् ॥ १९ ॥

यद्दृष्ट्वा पूजयित्वा च परं पदमवाप्नुयात् ।
एतेषां क्रमशो ब्रह्मन् लक्षणं चावधारय ॥ २० ॥

क्षेत्रं कृत्वा चतुरश्रं सप्तधा विभजेच्च तत् ।
शनार्धमेकहीनं तु कोष्ठकानां तु जायते ॥ २१ ॥

मध्यतो नवभिर्भागैः पद्मं तु परिकल्पयेत् ।
पंक्तिद्वयेन द्वाराणि [3]सत्को (? सको)णानि भवन्ति हि ॥ २२ ॥

पद्मक्षेत्रसमीपात्तु [4]दक्षैरेव (? पंक्त्यैकैकं) तु मार्जयेत् ।
[5]कोष्ठक (कं) द्वारकण्ठार्धं (? र्थं) त्रीणि त्रीणि च तद्बहिः ॥ २३ ॥

---

1. क–निदिध्यानाच्च
2. क–घ–महायागतरुयज्ञं
3. क–ग–स च कोणा भवन्ति
4. ख–दीक्षैरेव
5. ख–कोष्ठैकं द्वारं

उपकण्ठप्रसिद्ध्यर्थं द्वाराण्येवं भवन्ति हिं।
षट्कं षट्कं पदानां तु प्रतिकोणं तु मार्जयेत् ॥ २४ ॥

एवं हि भद्रकं क्लृप्तं रजसा परिपूरयेत्।
व्योमवृत्तसमायुक्तं मध्ये तु कमलं [4]स्थि (? सि)तम् ॥ २५ ॥

रेखागणं तथा सर्वं श्यामलेन सितेन च।
सन्धयः पद्मपत्राणामेवमेवान्तरेष्वपि ॥ २६ ॥

किन्तु वै व्योमवृत्तस्य बाह्यादादौ क्रमेण तु।
सर्वेषां पूरणं वच्मि रजसा तु यथास्थितम् ॥ २७ ॥

[1]पाण्डुरक्तेन रागेण कण्ठाभ्यां तु यदन्तरम्।
रक्तोज्ज्वलेन कोणानि पीतान्यभ्यन्तरं तयोः ॥ २८ ॥

प्रपूर्यैवं भवेद्भद्रमघनिर्मोचनं शृणु।
क्षेत्रं कृत्वाऽष्टधा सम्यक् चतुष्षष्ट्यंशकानि तु ॥ २९ ॥

जायते (? न्ते) मध्यलः कोष्ठैश्चतुर्भिः कमलं लिखेत्।
तद्बहिर्भागपंक्त्यैकां वीथ्यर्थं परिमार्जयेत् ॥ ३० ॥

द्वाराणि वीथिबाह्यं ? ह्ये) तु तदर्धं (? र्थं) द्वयद्वंयम्।
कण्ठार्धं (? र्थं) लोपनीयं च चत्वार्युपगलात्तु वै ॥ ३१ ॥

द्वारोपगेषु स्थानेषु पूर्वमण्डल[illegible]ख्यया।
[2]विलोप्य रञ्जयेत् पश्चाद्भू (? भ्र) मणिं श्यामलेन तु ॥ ३२ ।

---

1. ख—स्मृतम्
2. क—विलेप्य

शेषं तु भद्रवच्च स्यात् सदध्वमधुनोच्यते ।
विभज्य नवधा क्षेत्रमेकाशीत्यंशकं भवेत् ॥ ३३ ॥

उत्पद्यन्तेऽनु (? मध्ये तु नव) भागानां भद्रवत् कमलं लिखेत् ।
पङ्क्त्या तु तद्बहिः पीठं रमणीयं च मार्जयेत् ॥ ३४ ॥

त्रिसंख्याकं तु भागानां [1]तस्मात् सर्वविदिक्स्थितम्
एकैकं दिक्षु संस्थाप्य भवेद् द्वाराण्यथाश्रयः । ॥ ३५ ॥

बाह्यपङ्क्तिद्वयेनैव जायन्ते ना (? ता) न्यथा शृणु ।
पीठकोणसमैर्भागैर्द्वारकण्ठं प्रकल्पयेत् ॥ ३६ ॥

पञ्चांशेनोपकण्ठं तु कोणमस्य [2]षडंशकम् ।
संमार्ज्य पूरयेत् पश्चाद्रजसा [3]राजते यथा ॥ ३७ ॥

अन्तरं व्योमपीठाभ्यां पतिरक्तोज्ज्वलेन तु
पीठदिक्स्थितभागानि श्यामलोनोज्ज्वलेन तु ॥ ३८ ॥

तदुपस्थानकोणानि पीतेन परिपूरयेत् ।
द्वाराणि सुसितेनैव पाण्डुरक्तेन चाश्रयः ॥ ३९ ॥

सदध्वं च मया प्रोक्तं धर्माख्यमधुनोच्यते ।
विभज्य दशधा क्षेत्रमंशकानां भवेच्छतम् ॥ ४० ॥

---

[1] क–तस्मात् सन्धि

[2] क–षडङ्गकम्

[3] क–राजिते

चतुर्भिः पुष्करं मध्ये पीठं पङ्क्त्या तु साधयेत् ।
परितस्तत्र भागानि रोधयित्वाऽब्जसंभव ॥ ४१ ॥

प्रदद्यात् कोणं [1]चतुर्धा जायते यथा ।
भ्रमणीं कल्पयेत् पङ्क्त्या [2]द्वारं तद्द्वितयेन तु ॥ ४२ ॥

षट् च कण्ठोपकण्ठाभ्यां भागानां परिमार्जयेत् ।
आर[3]भ्योभयपार्श्वात्तु द्वे द्वौ भागौ तु मर्दयेत् ॥ ४३ ॥

त्रयं द्वयमथैकैकं कोणात् संशोध्य रञ्जयेत् ।
पाण्डरारुणरागेण मध्यं वै व्योमपीठयोः ॥ ४४ ॥

द्वौ तु पूर्वापरौ भागौ [4]पीठात् पीतेन पूरयेत् ।
द्वारकण्ठोपगौ स्थानौ पूरयेत् पीतलेन तु ॥ ४५ ॥

व्योमपीठान्तरं यद्वत् तद्वत् कोणचतुष्टयम् ।
इत्येतत् कीर्तितं धर्म वसुगर्भमतः शृणु ॥ ४६ ॥

कृत्वैकादशाधा क्षेत्रमेकविंशोत्तरं शतम् ।
[5]उत्पद्यन्ते (? ते) च भागानां नवभिर्मध्यपङ्कजम ॥ ४७ ॥

---

1. ख–चतुष्कम्
2. द्वाराणि द्वित
3. ब–बाह्यान्तरेण
4. ख–पीठान्
5. ख–उत्पाद्यन्ते

मार्जयित्वा तु पीठार्थं पङ्क्त्येकं साधयेच्च तत् ।
सूत्रपातविधानेन यथा तदवधारय ॥४८॥

पदद्वयावसाने तु कोणस्थाने निधाय वै ।
पार्श्वाभ्यां सर्वकोणे तु सूत्रमास्फालयेच्च तत् ॥४९॥

भवन्त्यनेन विधिना दिग्भागाः कर्णिकोपमाः ।
सीराग्रवच्च कोणानि ततः पङ्क्त्या तु वीथिका ॥५०॥

शिष्ट (? ष्टं) पङ्क्तिद्वयेनैव कुर्यात् कमलसंभव ।
संशोध्य (? ध्यं) भागसङ्घं तु द्वारेष्वथ सदध्ववत् ॥५१॥

द्वाराभ्यां मध्यतस्सप्तकोणदेशाच्च शोधयेत् ।
एकैकं साधयेत् कोणं ततोंऽशत्रितयेन तु ॥५२॥

कृत्वैवं पूरयेत् पश्चाद्रागेण विविधेन च ।
प्रशान्ताग्निसमानेन व्योम[1]बाह्यं रजेन तु ॥५३॥

[2]ईशकोणात् समारभ्य सिताद्यैः परिपूरयेत् ।
तद्व[3]दाप्योत्तरेन्द्रान्तकाशासु च रजः क्षिपेत् ॥५४॥

भृङ्गोदरनिभेनैव पीठबाह्यं तु पूरयेत् ।
द्वाराण्यरुणरक्तेन तयोर्मध्यं सितेन च ॥५५॥

---

[1] ख–बाह्यान्तरेण

[2] कोणं समारभ्य

[3] ख–कोणे

शेषं तु दशपादाहे रञ्जयेच्छा[1]मलेन च ।
इत्युक्तं वसुगर्भं ते सर्वकामप्रदं शृणु ॥५६॥

क्षेत्रं द्वादशधा कृत्वा [2]तत्सूत्रेण च पौष्कर ।
सार्धमेकशतं चैव षडूनं जायते ततः ॥५७॥

मध्ये षोडशभिः कोष्ठैः पद्मं कुर्यात् सलक्षणम् ।
भागपङ्क्त्या तु वै पीठं तस्मात् द्वौ द्वौ तु दिग्गतौ ।५८॥

भागौ संशोधितौ ह्येवं त्रीणि त्रीणि तदाश्रिषु ।
भ्रमणीं मर्दयेत् पङ्क्त्या शेष (?षं) पङ्क्तिद्वयेन तु ॥५९॥

षड्गलोपगलेष्वत्र कोणात् कोण (? ष्ठ) द्विसप्तकम् ।
कृत्वैवं पूरयेत् प्राग्वदन्तरं व्योमपीठयोः ॥६०॥

राजोपलनिभेनैव पीठं कोणात् प्रपूरयेत् ।
तत्कोणमध्यदेशानि हेमाभेन तु रञ्जयेत् ।६१॥

शुक्ल (? क) पक्षोपमेनाथ रञ्जयेद्वीथिका (? का) द्विज ।
द्वाराणि स्फटिकाभेन रक्तरागेण वाश्रयः ॥६२॥

सर्वकामप्रदं चैव कृत्वामित्रघ्नमुच्यते ।
क्षेत्रं त्रिदशधा कृत्वा भागानां जायते शतम् ॥६३॥

---

[1] ख–लेन वा

[2] ख–तत्सूत्रेणैव

एकोनसप्तत्यधिकमम्बुजं [1]चक्रमध्यतः।
कोष्ठकैः पञ्चविंशद्भिः पङ्क्त्या पीठं तु. तद्बहिः ॥६४

Sanskrit
Gand
[redacted]

तत्र तन्मध्यतस्त्रीणि त्रीणि चैव तथाश्रिषु।
[2]पदवीं तद्बहिः पङ्क्त्यां द्वारादि द्वितये नतु ।.६५।

[3]कण्ठ भागत्रयेणैव पञ्चभिश्चोपकर्णि (? ण्ठको) कम्
[4]द्वारोपगस्य मध्याच्च अष्टौ [5]शोभाद्वये भवेत् ॥६६॥

अथ षट्केन षट्केन कुर्यात् कोणचतुष्टयम्।
कृत्वैवं व्य (? र) ञ्जयेद्व्योम बाह्यं रक्तारुणेन तु। ॥६७॥

पीठकोणानि सर्वाणि तेन चात्युज्ज्वलेन वा।
चाषपक्षसमानेन पैठीयं दिक्चतुष्टयम् ॥६८॥

राजोपलनिभेनैव पूरयेद्भ्र[6]मणीं ततः।
द्वाराणि रजताभेन तदन्तः पाण्डरं गुणम् ॥६९॥

व्योमपीठान्तरं यद्वत् तद्वत् कोणमिति स्मृतम्।
उक्तमेतदमित्रघ्नमायुष्यमधुनोच्यते ॥७०॥

---

[1] ख–चाक्र
[2] क–ग–पदपीतं
[3] ख–कर्णं
[4] ख–द्वारोभयस्य
[5] क––ग–शोभद्वये
[6] क–ग–भ्रमणं

कृत्वा द्विसप्तधा क्षेत्रं षण्णवत्यधिकं शतम्
उत्पद्यतें (? न्तें)ऽशकानां तु कजं षोडश[1]कोष्ठके ॥७१॥

मध्यतस्तद्बहिः पङ्क्त्यां पद्माधारं प्रकल्पयेत्।
तत्र द्वे द्वेंऽशके (?कैः) दिक्षु त्रीणि त्रीणि [2]तदाश्रिषु। ॥७२॥

पङ्क्तिद्वयेन परितस्तद्बहिः पदवी भवेत्।
भागपङ्क्तिद्वयेनाथ यच्छिष्टं तत्समापयेत् ॥७३॥

द्व्यंशेन [3]द्वारकण्ठं स्याच्चतुर्भिरुपकण्ठकम्।
ततः कण्ठसमीपात्तु शोभार्थं त्रीणि शोधयेत् ॥७४॥

उपकण्ठोपगं चैकमेवं शोभाष्टकं भवेत्।
मण्डलस्य चतुर्दिक्षु ततः कोणेषु शोधयेत् ॥७५॥

दशकं दशकं विप्रभागानामथ रञ्जयेत्।
जातिरिं (? हिं) कुलिकाभेन व्योमबाह्यात्तु पूरयेत्। ॥७६॥

ततो मरका (? कता) भेन पीठकोणानि रञ्जयेत्।
सर्वं रक्तारुणाभेन दिक्सङ्गं परिपूरयेत् ॥७७॥

हेमहेमाभवीथी वा द्वाराणि सुसितानि च।
नृपोपलाभेनाश्रीणि शोभानि व्योमबाह्यवत् ॥७८॥

---

[1] ख-कोष्ठकैः

[2] [illegible]-ग-तदा शुषु

[3] द्वारकर्णं स्याच्चतुर्भिरुपकर्णकम

एतदायुष्यकं प्रोक्तं बलभद्रमतः शृणु ।
क्षेत्रं त्रिपञ्चधा कृत्वा कोष्ठकानां शतद्वयम् ॥ ७९ ॥

स्यात्पञ्चविंशत्यधिकममित्रघ्नवदाचरेत् ।
पीठं च पङ्कजं भागैः पङ्क्त्या चैवोपपीठकम् ॥ ८० ॥

शिष्टैरुपगलं कुर्याच्छोभासङ्घं तु पूर्ववत् ।
एकैकादशभागानि कोणाच्छोध्यानि पौष्कर ॥ ८१ ॥

व्योमाद्यनवसानं तु पाण्डुरक्तेन पूरयेत् ।
पीठं यादृग्विधो राजा यन्त्रपीठे तथैव च ॥ ८२ ॥

दातव्यं विधिना येन तदग्रप्रोऽवधारय ।
[1]ईशकोणात् सिताद्यैस्तु चतुर्भिः परिपूरयेत् ॥ ८३ ॥

रागैस्तु पीठकोणानि पश्चिमादि ततः पुनः ।
तेनैव दक्षिणाशान्तमुपपीठं तु कथ्यते ॥ ८४ ॥

याम्याशादिसिताद्यैस्तु यावत्प्रागवसानतः ।
भ्रमणीः पाण्डुरक्तेन ततो द्वारचतुष्टयम् ॥ ८५ ॥

जाम्बूनदसमानेन पश्चाच्छोभाष्टकं द्विज ।
क्रमान्मरतका (? कता) मेन शिष्टं रक्तगुणेन तु ॥ ८६ ॥

स्यादिदं बलभद्रं तु पौष्टिकं चाधुनोच्यते ।
[2]भङ्क्त्वा षोडशधा क्षेत्रमंशकानां शतद्वयम् ॥ ८७ ॥

---

[1] ख–कोणाक्षता
[2] क–ख–म–कृत्वा

षट्पञ्चाशोत्तरं चैव भवेन्मध्येऽथ कल्पयेत्।
षट्त्रिंशद्भिस्तु कह्लारं पीठं पङ्क्तिद्वयेन तु ॥८८॥

द्वौ द्वौ दिङ्मध्यगौ भागौ पञ्च पञ्च तदश्रिषु ।
लुप्ता तु चोपपीठार्थं भागांश्च परिशोधयेत् ॥८९॥

त्रीणि त्रीणि तु कोणेषु षट्कं षट्कं दिशासु च।
मार्गं तु तद्बहिः पङ्क्त्यां द्वारादि–द्वितयेन तु ॥९०॥

गलोपगलशोभादिद्विचतुस्स्मृतये (? स्त्रयमे) ककम्।
शोभाविपर्ययेणैवमुपशोभां तु तत्समैः ॥९१॥

समीपे चोपशोभस्य षड्भिः कोणं तु मार्जयेत्।
एवं शोभाष्ठकं विप्र उ (? तू) पशोभाष्टकं तथा ॥९२॥

शोधयित्वा चतुर्दिक्षु रजसा पूरयेत्ततः।
पूर्यमाकाशवृत्तस्य बाह्यं रक्तारुणेन तु ॥९३॥

पीठस्य सर्वकोणानि हेमाभेन तु पूरयेत्।
पाण्डरारुणरागेण पूरयेद्गात्रकाणि च ॥९४॥

कोणान्यथोपपीठस्य तेनैव परिरञ्जयेत्।
तद्गात्रकाणि शुक्लेन तद्बाह्यमसितेन तु ॥९५॥

द्वाराणि सुसितेनैव शोभाश्च व्योमबाह्यवत्।
पीतेन चोपशोभानि कोणान्यथ विभूषयेत् ॥९६॥

ब्रह्मन् मरतका (?कता) भेन श्यामलेनोज्ज्वलेन च।
इत्युक्तं पौष्टिकं यागं [1]वच्म्यारोग्यकसंज्ञकम् ॥९७॥

प्राक् सप्तदशधा क्षेत्रं कृत्वांशानां शतत्रयम्।
एकादशांशहीनं तु [2]जायते वाऽथ मध्यतः ॥९८॥

पञ्चविंशतिभिः पद्मं ततः पङ्क्तिद्वयेन तु।
कुर्याद्वै पङ्कजाधारं तस्माद्दिक्षु विमर्दयेत् ॥९९॥

पद्मक्षेत्रसमीपात्तु पञ्चैकं तेषु बाह्यतः।
भवन्ति शोभातुल्यानि कृत्वैवं गात्रकाणि तु ॥१००॥

परितोऽष्टकमंशानां प्रतिकोणं तु मार्जयेत्।
भागं (? ग) पङ्क्ति[3]द्वयं (? ये) जातं संचारार्थं तु शोधयेत् ॥१०१॥

द्वयेन द्वारशोभादि ततः कुर्याद्द्विजोत्तम।
त्रीण्यर्धं (? तः) पञ्चभागानि द्वारात् कण्ठोपकण्ठयोः ॥१०२॥

शोभोपशोभकोणेषु सैकैकं तु त्रिसप्तकम्।
मार्जयित्वा तु रजसा प्रपूर्य विविधेन च ॥१०३॥

आकाशपरिधेर्बाह्यं बन्धुजीवनिभेन तु।
गोक्षीरपाण्डुरागेण पीठपादं चतुष्टयम् ॥१०४॥

---

[1] क–ग–वच्मि आरोग्यसंज्ञकम्

[2] ख–जायते चाथ

[3] ख–द्वये जातं पञ्चारार्थं

गात्रकाण्यथ सर्वाणि राजाश्मसदृशेन तु।
चीनपिष्टसमानेन वीथिकां परिरञ्जयेत् ॥१०५॥

द्वारादिन् हेमवर्णेन श्यामेनान्तः सुसंस्थितान्।
सितेन चोपशोभानि शेषं रक्तारुणेन तु ॥१०६॥

एवमारोग्यकं प्रोक्तं विवेकमवधारय।
कृत्वाऽष्टदशधा क्षेत्रमंशकानां शतत्रयम् ॥१०७॥

जायते वै चतुर्विंशत्यधिकं कमलोद्भव।
मध्ये षोडशभिः पद्मं पीठं पङ्क्तित्रयेण तु ॥१०८॥

द्विचतुष्कं तु भागानां तत्र वै गात्रकान् प्रति।
द्वौ पद्मक्षेत्रनिकट'त् पङ्क्तौ दिङ्मध्यतस्ततः ॥१०९॥

चत्वारि मध्यपङ्क्तौ द्वौ बाह्यपङ्क्तौ यथान्तरम्।
कृत्वैवं गात्रकगणं ताभ्यां मध्यान्तरे ततः ॥११०॥

त्रयोदशांशकेनैव पादं कुर्याद्विचक्षणः।
सप्तकं बाह्यपङ्क्तौ तु मध्यपङ्क्तौ तु [1]चांशकम् ॥१११॥

एकीकृत्वा ततो भागैर्बिम्बं कुर्यात्तु पञ्चभिः।
ईषत्तद्गात्रकाकारं यथा पङ्क्तिद्वयात्ततः ॥११२॥

कुर्यात् संचारमार्गं तु शिष्टं पङ्क्तिद्वयात्तु वै।
दशकं दशकं ब्रह्मन् प्रतिकोणं तु मार्जयेत् ॥११३॥

---

[1] ख–चाष्टकम्

शेषाच्छोभोपशोभानि भागेर्द्वाराणि कारयेत्।
प्रपूर्य कर्णिकाश्चातो यथा कृत्स्नैश्च तच्छृणु ॥११४॥

दाडिमीपुष्पतुल्येन पीठदेशादनन्तरम्।
गात्रकाणि सितेनैव लिम्पकान्यसितेन तु ॥११५॥

पद्मरागोपमेनैव कोणं भागाष्टजं तु यत्।
राजोपलनिभेनैव पीठाद्बाह्यं प्रपूरयेत् ॥११६॥

सितादिना चतुष्केण द्वाराद्यं यच्चतुष्टयम्।
उक्तमेतद्द्विवेकाख्यं वागीशमधुनोच्यते ॥११७॥

भागैरेकोनविंशद्भिः क्षेत्रं कृत्वा तु जायते।
शतत्रयं त्वंशकानामेकषष्ट्यधिकं द्विज ॥११८॥

कमलं पञ्चविंशद्भिः पीठं पङ्क्तित्रयेण तु।
प्राच्यारभ्योत्तराशान्तं तस्माद्वै सप्तकं क्रमात् ॥११९॥

एकांशमाद्यपङ्क्तौ तु यथा तत्पञ्च मध्यतः।
एकांशेन तृतीयेन संयुक्तं चाथ साधयेत् ॥१२०॥

ततोऽश्रिनिचयं सर्वं शेषेणांशगणेन तु।
पद्मक्षेत्रोपगात् कोणात् पूर्वपङ्क्तौ तु पञ्चकम् ॥१२१॥

मर्दयित्वाऽथ भागानां द्विषट्कं द्वितयात्तु वै।
द्वितयेन [1]भवेद्वीथी द्वारादिद्वितयेन तु ॥१२२॥

---

[1] क–ग–भवेद्वायु

ग्रीवांशं तत्र ? त्रित) येनैव पञ्चभिश्चोपकण्ठकम्।
[1]दशांशेन तु कोणानि शेषैः शोभादयस्तया ॥१२३॥

ततो रक्तोज्ज्वलेनैव बाह्यं पूर्यं खमण्डलात्।
अन्तराण्यथ पादानां हेमाभेन प्रपूरयेत् ॥१२४॥

सर्वं मरतका (? कता) भेन प्रागाद्यं दिक्चतुष्टयम्।
प्रभान्ता (? ता) भिज्ज्वलेनैव पादशेषं प्रपूरयेत् ॥१२५॥

द्विरेफरूपरागेण गममार्गं तु रञ्जयेत्।
सितरक्तारुणेनैव हेमहिङ्गुलिकं क्रमात् ॥१२६॥

चतुष्टयं च[2] द्वाराद्यं पूरणीयं तु पौष्कर।
इदमुक्तं च वागीशं मानसं कथयामि ते ॥१२७॥

क्षेत्रं द्वाद[3] (? द्विर्द) शधा कृत्वा भवेच्छतचतुष्टयम्।
भागं तत्रैव (? भागानां तत्र) यन्मध्ये षट्त्रिंशद्भिः कञ्जं
लिखेत् ॥१२८॥

बाह्यपङ्क्तित्रयेणाथ तदाधारं तु [4]लोपयेत्।
द्वौ [5]पद्मक्षेत्रनिकटात् द्वौ बाह्यं (? ह्ये) मध्यतश्चतुः ॥१२९॥

---

[1] ख–दशकेन

[2] क––ग–घ–चतुर्द्वारात्

[3] द्विगुणितदशधा इत्यर्थः

[4] ख–लेपयेत्

[5] क–ग–पत्रक्षेत्र

दिङ्मध्याद्गात्रकाणां तु लोपयेच्चरणान्वि (? दि) तः।
भागाष्टादशकेनैव सांशेनात्रावधारय ॥१३०॥

गात्रकाभ्यां समीपं (? पे) तु त्रीण्येकं त्रितयं पुनः।
मीलयेद्बहिरारभ्य सांशषट्कद्वयं तथा ॥१३१॥

बाह्यमध्यस्थपङ्क्तिभ्यां मीलयेदंशकाञ्च (? कांश्च) षट् ।
मार्जयेत्पूर्ववद्वीथीं बाह्यपङ्क्तिद्वयेन तु ॥१३२॥

शेषं स्यात्प्रमाणेन तत्र संवेशनं तु षट् ।
कण्ठोपकण्ठयोर्ब्रह्मन् षट्कषट्कं तथाशृणु (? तथा त्रिषु) ॥१३३॥

शिष्टे शोभाद्वयं कुर्यात् तदेकं चोपशोभनम्।
मध्यतो द्वारकोणभ्यां रजसा पूरयेत्ततः ॥१३४॥

पीठादाद्यं तु [1]भूभागं चीनपिष्टनिभेन च।
गात्राणि च सुपीतेन [2]तासामभ्यन्तरं तु यत् ॥१३५॥

[3]द्वादशांशैकसंभूतं वैडूर्यसदृशेन तु।
तदनन्तरं षडंशोत्थं पूरयेत् सुसितेन च ॥१३६॥

रक्तारुणेन भ्रमणो शुक्लेन द्वारसंततिम्।
द्वारोपगानि शोभानि रञ्जयेद्व्योमबाह्यवत् ॥१३७॥

---

[1] ख–भूभगात्

[2] ख–ग–ताभ्या

[3] क–ग–घ–द्वादशांशैक

हेमाभेनोपशोभानि शोभान्यन्यानि पौष्कर।
झषोदरसमानेन शेषं स्यात् पूर्वशोभवत् ॥१३८॥

इत्युक्तं मानसं यागं जयाख्यमपरं शृणु।
एकविंशतिभिर्भागैः क्षेत्रं कृत्वा तु जायते ॥१३९॥

सार्धं शतं चतुर्णां तु भागानां नवभिर्विना।
पङ्कजं पञ्चविंशद्भिः पङ्क्त्या पीठं तु तद्बहिः ॥१४०॥

चतुर्दिक्षु ततो ब्रह्मंस्त्रीणि त्रीणि तु लोपयेत्।
भागानि गात्रकाणां तु तथैव हि तदश्रिषु ॥१४१॥

तद्बहिश्चोपपीठं तु कुर्यात्पङ्क्तित्रयेण तु।
तस्माद् सप्तदशांशानि शोध्यानि प्रतिगात्रकान् ॥१४२॥

तृतीयं (? त्रितयं) मध्यपङ्क्तौ तु सप्तकं सप्तकं पुनः।
आद्यन्तपङ्क्तिद्वितयाच्चरणान्यधिकल्पयेत् ॥१४३॥

एकैकं मर्दयेत् [1]कोणं ब्रह्मन् भागा (? गै) स्त्रयोदश (?शैः)।
कृते पादगणे कुर्याद्वीथिकां द्वितयेन तु ॥१४४॥

द्विती (? त) येनाथ [2]विं (?वि) शादीन् षट्कं षट्कं तदश्रिषु।
द्वारं भागाष्टकेनैव शेषैः शोभादयोंशकैः ॥१४५॥

कृत्वैवं रञ्जयेत् पश्चादथ तच्छृणु पौष्कर।
[3]खवृत्तादवसानं यत् तत्कुर्यात् पाण्डरोज्ज्वलम् ॥१४६॥

---

1 क-ग-कोणान्
2 ख-ग विंशाषट्
3 क-ग-त्ता चसपानं

प्राक्पीठपादसंघं तु गोक्षीरधवलोपमम्।
तस्मान्मरतकाकारं दिङ्मध्यस्थं चतुष्टयम् ॥१४७॥

गात्रकाण्युपपीठस्य [1]तत्समाभेन पूरयेत्।
भिन्नसत्पद्मरागेण रूपेण चरणात् (?न्) ततः ॥१४८॥

बाह्यं वैडूर्यवत्पीठात् तद्बाह्यत्कोणसंततिम्।
रुक्माभेन तु संपूर्य ततो रक्तारुणेन तु ॥१४९॥

प्रपूर्य [2]चोपशोभानि तन्मध्यानि सितेन तु।
भग्नगोरोचनाभेन द्वाराणि परिरञ्जयेत् ॥१५०॥

इदमुक्तं जयं नाम सांप्रतं स्वस्तिकं शृणु।
द्विरेकादशधा क्षेत्रं कृत्वा संजायते द्विज ॥१५१॥

चतुरा (। र) शीतिभिर्भागैरधिकं तु चतुःशतम्।
तत्र [3]मूर्त्यासनं मध्ये षट्त्रिंशद्भिः तु कोष्ठकैः ॥१५२॥

भागपङ्क्तिचतुष्केण तदाधारं प्रकल्पयेत्।
ततो गात्रकसिध्द्यर्थं मध्यतो दिक्षु लेपयेत् ॥१५३॥

चतुरभ्यधिकान् विंशदंशकान् कमलोद्भव।
पद्मक्षेत्रसमीपात्तु पङ्क्त्या (? ङ्क्त्या) भागं (? ग) चतुष्टयम् ॥१५४॥

---

[1] ख–तत्समाने प्र

[2] क–ग–वर्णशोभानि

[3] ख–मख्यासनं

ततो तृतीयपङ्क्तौ तु [1]द्विती (? त) यं परिशोधयेत्।
एवमंशकबिम्बं च कृत्वा द्वारोपमं [2]भवेत् ॥१५६॥

तत्र (? ततस्) तृतीयपङ्क्तौ तु लोपयेदंशकद्वयम्
चतुष्टयं तु त द्वाह्याल्लोपयेत् पूर्वबिम्बवत्। ॥१५५॥

द्रावेवैतादृशं (? शौ) कुर्याच्छिष्टेनांशगणेन तु।
तिर्यग्गतौ गात्रभाजौ द्वारबन्धाकृतिं (?ती) द्विज ॥१५७॥

ततः पादचतुष्कं तु यथा कुर्यात्तदुच्यते।
एकैकं षोडशांशेन चरणं गात्रकाकृतिम् ॥१५८॥

किंतु तद्बिम्बमेकैकं चतुर्भागान्वितं भवेत्।
द्वौ बिम्बौ द्वारसदृशौ पीठात् प्रागदिशि संस्थितौ ॥१५९॥

एवमीशानदिक्प्रोक्तं संस्पर्शं तं तु लोपयेत्।
द्वितीयं हुतभुक्कोणादारभ्य परिमार्जयेत् ॥१६०॥

तत्तु (त्तः) पश्चिमदिक्कुर्याद् द्वौ (?द्वे) बिम्बौ (?म्बे) पादसंश्रिते?।
[4]समन्वयात्तु सामीरकोणयोरादितो द्विज ॥१६१॥

द्वे द्वे बिम्बे ह्युदग्याम्ये कुर्यात्त्यक्त्वा परं पदम्।
ईशानत्वग्निवायव्यकोणेषु कमलोद्भव ॥१६२॥

---

1 द्वितीयां
2 मुद्रितपुस्तकस्य १५५ द्वितीयचरणः अम १५६ द्वितीयचरणत्वेन परिवर्तितः।
3 ख–तुर्यङ्गतौ
4 ख–समं कुर्यात्तु

[1]संमुखं गात्रकाभ्यां तु द्वितीयं विम्बकद्वयम्।
भवत्यनेन विधिना शोधितेनाब्जसंभव ॥१६३॥

स्वस्तिकाष्टकसंयुक्तं कृत्वैवं कमलासन।
बाह्ये संचारमार्गं तु बाह्यपङ्क्तिद्वयेन च ॥१६४॥

शेषं पङ्क्तिद्वयेनैव यथा कुर्यात्तदुच्यते।
कण्ठोपकण्ठसंयुक्तं द्वारं षड्भागनिर्मितम् ॥१६५॥

चतुर्भागयुतं कुर्या[2]च्छोभं द्वारसमीपकम्।
शोभोपग[3]मुपद्वारं [4]भागषट्केन पूर्ववत् ॥१६६॥

उपद्वारसमीपे तु भूयः शोभं तथाविधम्।
कोणं कुर्याच्छडंशेन लुप्त्वैवं परिपूरयेत् ॥१६७॥

पाण्डुरक्तेन रजसा व्योमाख्यपरिधेः परम्।
संमुखे मध्यसूत्राणां द्वे विम्बे गात्रकाश्रिते ॥१६८॥

रम्ये मरतकाभेन तद्वद्रक्तारुणेन तु।
तिर्यग्गते तु तद्विम्बे सर्वगात्रेष्वयं [1]क्रमः ॥१६९॥

चतुर्बिम्बान्वितानां तु चरणानामथ क्षिपेत्।
तुल्यं चतुर्विधाकारं पाद्भेदेन यथास्थितम् ॥१७०॥

---

1 ख–समं खं, ख–भाग कः
2 छोभां
3 क–मुपचारं
4 ख–भागं षट्कोण
5 ख–क्रमात्

ईशकोणगते पादे प्राग्बिम्बे पाण्डरारुणम् ।
सितं याम्येऽथ राजाश्मसदृशं चैव पश्चिमे ॥१७१॥

हेमाभं चोत्तरे बिम्बे त्वथाग्नेयपदे शृणु ।
पूर्वस्यामरुणं तादृक् पीतं कृष्णं सितं क्रमात् ॥१७२॥

याम्याप्यसौम्यदेशेषु रक्षा (?क्षः) पादेऽथ वक्ष्यते ।
प्रागादौ चोत्तरान्तं च कृष्णपीतारुणैस्सितैः ॥१७३॥

तद्बिम्बेन य (?स) मापूर्य वच्मि पादेऽथ मारुते ।
ऐन्द्रात्कौबेरपर्यन्तं शुक्लकृष्णारुणा परैः ॥१७४॥

रागैर्बिम्बगणं सर्वमेवं पीठं प्रपूर्य च ।
वीथिका षट्पदाभेन द्वारं शुक्लेन पूरयेत् ॥१७५॥

शोभा (?भां) रक्तारुणेनैव पीतेन तदनन्तरम् ।
कोणोपद्वारमध्यस्थं शोभं श्यामेन् रञ्जयेत् ॥१७६॥

निर्धूमाग्निसमानेन कोणं [1]रागेण पूरयेत् ।
स्वस्तिकाख्यमिदं प्रोक्तमनन्तं कथयामि ते ॥१७७॥

त्रयोविंशतिभिर्भागैः क्षेत्रं कृत्वा भवेद्द्विज ।
शतानि पञ्चभागानां विंशद्भिस्तु नवाधिकैः ॥१७८॥

संयुक्ता चांशकैर्मध्ये पञ्चविंशतिभिः कजम् ।
पीठं पङ्क्तित्रयेणैव [2]पङ्क्त्यैका (?पङ्क्त्या वै) चोपपीठिका ॥१७९॥

---

[1] क–रागेषू
[2] क–ग–पक्वैकावोप

सप्तकं चैव भागानां संशोध्यं प्रतिगात्रकान् ।
दिक्षु स्यात्पूर्वपङ्क्तौ तु [1]भागैकं पञ्च मध्यतः ॥१८०॥

तद्रूपपङ्क्तावेकाशं ततस्सप्तदशांशकैः ।
एकैकं साधयेत् पादमुपपीठं तथोच्यते ॥१८१॥

पञ्चकं पञ्चकं दिक्षु कोष्ठकानां तु मार्जयेत् ।
विदिक्षु परिसंशोध्य सप्तकं सप्तकं ततः ॥१८२॥

पङ्क्तिद्वयेन भ्रमणीं द्वारादींस्त्रितयेन तु ।
तत्र ग्रीवमथ त्रीणि उपकण्ठात्तु पञ्चकम् ॥१८३॥

आधारमुपकण्ठस्य ससप्तांशेन तद्बहिः ।
शोभं द्वारोपगं कुर्यान्नवभिः कण्ठगैर्द्विज ॥१८४॥

तत्राधारोपगं भागमुपकण्ठोपगास्त्र[2]यः ।
[3]पञ्चांशान्युत्तरात्पङ्क्तौ ग्रीवादेशात्तु मर्दयेत् ॥१८५॥

सप्तविंशत्यथांशानि कोणदेशाद्विशोधयेत् ।
कृत्वैवं रागजालेन पूरणीयं समन्ततः ॥१८६॥

पद्मरागारुणेनैव क्षेत्रं पीठान्तरं (? रे) स्थितम् ।
जातरूपोज्ज्वलेनाथ पीठपादचतुष्टयम् ॥१८७॥

तुषारसदृशेनैव पूरयेद्गात्रकाण्यतः ।
गात्रकाण्युपपीठस्य राजाश्मसदृशेन तु ॥१८८॥

---

[1] ख–भागैकः
[2] ख–स्त्रियः
[3] क–ग–पञ्चांशात्युत्तरात् ।

प्रफुल्लकिंशुकाभेन चरणान्यस्य रञ्जयेत्।
श्वेतेन गममार्गं तु द्वाराणि व्योमबाह्यवत् ॥१८९॥

शरदाकाशसंकाशमुपशोभोपगं तु तत्।
पाण्डरारुणरागेण कोणजालं विभूषयेत् ॥१९०॥

अनन्तसंज्ञमित्युक्तं नित्याख्यमवधारय।
कृत्वा द्वादशधा क्षेत्रं द्विधा कृत्वा तु तत्पुनः ॥१९१॥

शतानि पञ्चभागानां षट्सप्तत्यधिकानि तु
भवन्ति कमलं कुर्यान्मध्ये षट्त्रिंशकांशकैः ॥१९२॥

पीठं पङ्क्तिचतुष्केण तस्य द्वे द्वे तु मध्यतः।
दिक्षु चाद्यन्तपङ्क्तिभ्यां तद्वन्मध्याच्चतुश्चतुः ॥१९३॥

पङ्क्तिद्वयाच्च संशोध्यं (? ध्य) एवं (? ह्येवं) स्याद्गात्रकं द्विजः
द्वादशांशकसंयुक्तं ततः पादं तु साधयेत् ॥१९४॥

अष्टाविंशतिभिर्भागैस्सुतनुं सुमनोरमम्।
पद्मक्षेत्रोपगात् कोणात् पूर्वपङ्क्तौ तु पञ्चकम् ॥१९५॥

द्विषट्कं मध्यपङ्क्तिभ्यामेकीकृत्य पृथक् ततः।
संशोध्यैकादशांशानि बाह्यात्पङ्क्तौ क्रमेण वै ॥१९६॥

संपाद्य चरणान्येवं वीथीं पङ्क्तिद्वयेन तु।
तृतीयेनावशिष्टं यत् कार्यं तच्छृणु पौष्कर ॥१९७॥

द्वे चतुष्षट्क्रमेणैव [1]द्वारं (? रात्) कण्ठादितो (?मृ) भजेत्।
एकांशं त्रीणि पञ्चातो बहिरारभ्य मार्जयेत् ॥१९८॥

शोभस्स्यात् (? शोभं स्यात्) द्वारनिकटे त्वेवं रम्यं ततोऽब्जज।
चतुर्भागान्वितेनैव कुर्याच्छोभोपशोभके ॥१९९॥

ज्येष्ठशोभासमीपात्तु बाह्यं (?ह्य) पङ्क्तिद्वयं तु वै।
ततस्सप्तदशांशानि प्रतिकोणं तु लोपयेत् ॥२००॥

रजसा पूरयेत् पश्चाद्यथा तच्छृणु पौष्कर।
तच्छोणितारुणं दद्याद्व्योमबाह्ये [2]रजोत्तमे (मात्) ॥२०१॥

जात्या हिंकुलिकाभेन गात्रकाणि विभूषयेत्।
सितासितेन पीतेन [3]त्वन्तराद्यं पद (?दा) न्तिमम् ॥२०२॥

भागात् प्रपूर्य पादानां वीथी रत्नो (? क्तो) ज्ज्वलेन तु।
द्वारान्नृपोपलाभेन शोभां पीतेन पूरयेत् ॥२०३॥

तत्पार्श्वोत्थमुपशोभं कुर्यान्मरतकप्रभम्।
कोणोपगं तु यच्छोभं विद्धि त[4]त्पाण्डरोज्ज्वलम् ॥२०४॥

---

[1] ख–द्वारात्

[2] ख–रजोत्तमम्

[3] त्वन्तराद्यावदन्तिमम्। इति स्यात्।

[4] क–ग · पाण्डुरोज्वलं

क्रोणं सुधासमाभेन रजसा [1]राजते यथा।
इत्युक्तं नित्यसंज्ञं तु भूतावासमतः शृणु ॥२०५॥

पञ्चविंशतिभिर्भागैः क्षेत्रं कृत्वा तु जायते।
षट्शतान्यंशकानां तु पादयुक्तानि मध्यतः ॥२०६॥

एकोनेन शतार्धेन विलिख्य कमलं शुभम्।
पीठं पङ्क्तिचतुष्केण पादगात्रकभूषितम् ॥२०७॥

चतुर्विंशतिभिर्भागैर्बिम्बैः पञ्चभिरन्वितम्।
विचित्रगात्रकं कुर्यात् तत्र भागानि लोपयेत् ॥२०८॥

चतुर्थपूर्वपङ्क्तिभ्यामेकैकांशं दिगन्तरे।
त्रीणि त्रीणि तु भागानि मध्ये पङ्क्ति[2]द्वयाद् द्विज ॥२०९॥

एवमष्टांशजं बिम्बं प्रथमं गात्रकस्य तु।
चतुरंशकयुक्तानि [3]कुर्यात् तिर्यग्गतानि तु ॥२१०॥

चत्वारि यस्य विम्बानि शोभाकाराणि वै[4] ततः।
त्रीणि त्रीण्याद्यपङ्क्तौ तु पद्मक्षेत्रस्य बाह्यतः ॥२११॥

द्वितीयपङ्क्तावेकैकमेवं विम्बद्वयं भवेत्।
तत्र तृतीयपङ्क्तौ तु एकैकांशं तु लोपयेत् ॥२१२॥

---

[1] क–ग–रञ्जते
[2] ख–द्वयं
[3] कुर्यादुपगतानि
[4] सप्तमः

त्रीणि त्रीणि चतुर्थायां मार्जनाद्गात्रकं भवेत् ।
द्वादशेनांशकानां तु पादं पादमतः परम् ॥२१३॥

तत्रैकांशं ततः पञ्च सप्तकं सप्तकं पुनः ।
आरभ्य पूर्वपङ्क्तौ तु मार्जयेद्यावदन्तिमम् ॥२१४॥

संचारपदवीं कुर्याद्रागं पङ्क्तिद्वयेन तु ।
त्रितयं [1]चात्रशिष्टं यत् तत्र पञ्चदशांशजम् ॥२१५॥

द्वारं कुर्यात्तु वै पूर्वं त्रीणि ग्रीवावधौ मृजेत् ।
उपकण्ठात्तु वै पञ्च द्वाराधारं तु सप्तकम् ॥२१६॥

तत्समीपे ततः कुर्याच्छोभास्थानं तु मार्जयेत् ।
पञ्च त्रीणि तथैकांशं कण्ठदेशादितः क्रमात् ॥२१७॥

एवमेवोपशोभं तु कुर्यात् तद्विपरीतवत् ।
ततः पञ्चदशांशानि शोध्यान्यश्रिस्थितानि च ॥२१८॥

लुप्त्वैवं रञ्जयेद्रागै रमणीयैरथेदृशैः ।
क्षेत्रपीठान्तरस्थं तु कुर्याद्वै पाण्डरोज्ज्वलम् ॥२१९॥

गात्रकाणां सितं कुर्यान्मध्यस्थां बिम्बसंततिम् ।
पद्मक्षेत्रसमीपस्थे तद्बिम्बे नृपशैलवत् ॥२२०॥

रक्तोज्ज्वलेन रागेण बाह्यबिम्बद्वयं तु तत् ।
हेमाभेनैव [2]पादं तु वीथिकां रञ्जयेत् ततः ॥२२१॥

---

[1] क–ग–चापि शिष्टं
[2] ख–तत्पादं

सर्वं मरतकाभेन द्वाराणि व्योमबाह्यवत्।
पादवच्चोऽसंकाशं कोणं गात्रकमध्यवत् ॥२२२॥

भिन्नाञ्जनसमप्रख्यमुपशोभगणं च यत्।
भूतावासमिदं प्रोक्तममोघमधुनोच्यते ॥२२३॥

प्राक् [1]त्रयोदशधा क्षेत्रं कृत्वा तद्विभजेद् द्विधा।
षट्शतान्यंशकानां तु षट्सप्तत्यधिकानि तु ॥२२४॥

उत्पद्यन्ते ततो मध्याच्चतुःषष्ट्यंशकैः कजम्।
पीठपङ्क्तिचतुष्केण चित्रगात्राङ्घ्रिभूषितम ॥२२५॥

अष्टाविंशतिभिर्भागैराद्यं मध्यं तु गात्रकम्।
तत्राद्यन्तस्थपङ्क्तिभ्यां द्वौ द्वौ दिङ्मध्यतोंऽशकम् ॥२२६॥

मध्यपङ्क्ति[2]द्वयात्तद्वत् द्विद्विकं द्विद्वि कं पुनः।
एवं द्वादशभागोऽयं मध्ये विम्बं भवेच्छुभम् ॥२२७॥

तस्य चोभयपार्श्वात्तु पत्रक्षेत्रसमीपतः।
द्वौ द्वौ भागौ तु संशोध्यौ मध्यपङ्क्तिद्वयाच्च तु ॥२२८॥

द्वौ भागौ बाह्यपङ्क्तौ तु एकीकृत्य तु पोष्कर।
एकैकमष्टभागे तु एवं विम्बद्वयं भवेत् ॥२२९॥

विंशत्यंशकजं पश्चात् पादं कुर्यात् द्विविम्बकम्।
पद्मक्षेत्रस्य बाह्यात्तु मार्जयेदंशकानि षट् ॥२३०॥

---

[1] द्विधा त्रयोदशधा षड्विंशतिधेत्यर्थः

[2] ख–द्वयाच्चैतद्

पादविम्बं भवत्येकं तद्ब[1]हिस्स्थावरं भवेत्।
चतुर्दशांशकोद्भूतं वीथीं पङ्क्तिद्वयेन तु ।।२३१।।

कण्ठादीनि ततो बाह्ये कुर्यात् पङ्क्तित्रयेण वै।
द्वे चतुष्षट् तथांशानि क्रमाद् द्वारं गलादितः ।।२३२।।

कुर्याद्द्वासमीपेऽथ प्राग्वच्छोभं नवांशकम्।
उपशोभं तथा कुर्याच्छोभस्य निकटे द्विज ।।२३३।।

ततोंऽशकचतुष्केण सूक्ष्मशोभं प्रकल्पयेत्।
समीपे ह्युपशोभस्य द्वंद्वं पङ्क्तिद्वयात्तु वै ।।२३४

ततस्त्रयोदशांशेन कोणं कुर्यात्तु पौष्कर।
आदिमध्याच्छडंशानि बाह्यपङ्क्तौ तु सप्तकम् ।।२३५।।

एकीकृत्य स्वरजसा प्रपूर्य विविधेन तत्।
कमले भूमिभागे तु प्रदद्यात् पाण्डरोज्ज्वलम् ।।२३६।।

मध्यविम्बे तु गात्राणां हेमाभं तु रजः क्षिपेत्।
शेषं गात्रकभागानि नीलनीरजपत्रवत् ।।२३७।।

चरणान्तरसंस्थानि बिम्बानि सुसितेन च।
रक्तोज्ज्वलेन तद्बाह्यं परितः परिपूरयेत् ।।२३८।।

वीथीं मरतकाभेन द्वारं शुक्लेन पूरयेत्।
शोभं रक्तोज्ज्वलेनैव हेमाभेनोपशोभकम् ।।२३९।।

---

[1] ख–ग–हिष्ठावरं

संपूर्य सूक्ष्मशोभं तु वैडूर्यसदृशेन तु।
पाण्डरोज्ज्वलरागेण कोणं यत्तदुपस्थितम् ||२४०||

इदमुक्तममोघं ते सुप्रतिष्ठमतः शृणु।
सप्तविंशतिभिर्भागैः क्षेत्रं कृत्वा तु जायते ||२४१||

शतसप्तकमंशानां संयुक्तं [1]चैव पौष्कर।
एकोनत्रिंशदंशैस्तु मध्ये पद्मं प्रकल्पयेत् ||२४२||

एकाशीत्यंशकैः पीठं पङ्क्तिद्विद्वितयेन तु।
द्वात्रिंशदंशकांस्तत्र गात्रकान् परिमार्जयेत् ||२४३||

तत्राद्यन्तस्थपङ्क्तिभ्यां त्रीणि त्रीणि दिगन्तरात्।
तथा च मध्यपङ्क्तिभ्यां भागं भागं तु लोपयेत् ||२४४.|

बिम्बं स्याद्गात्रकस्यैवमाद्यं चाष्टपदान्वितम्।
भागे द्वादशकेनाथ द्वे बिम्बे तदुपस्थिते ||२४५||

तदर्थमन्तरा (?न्तिमा) दिभ्यां द्वौ द्वौ पङ्क्तिद्वयं (?ये) मृजेत्।
तत्रैव मध्यपङ्क्तिभ्यामष्टकं लोप्य मीलयेत् ||२४६||

कृत्वैवं [2]गात्रकं कुर्यात् पादं विंशतिभिः पदैः।
बिम्बं पादे भवत्याद्यं यथा तदवधारय ||२४७||

---

[1] क–ग–घ–नैव पौष्कर

[2] क–ग–भागकं

कोणावधौ कजक्षेत्रात् समारभ्य तु लोपयेत्।
त्रितयं त्रितयं ब्रह्मन् क्रमात् पङ्क्तित्रयाच्च वै ॥२४८॥

पादविम्बं भवेदाद्यं नवांशकविनिर्मितम्।
द्वितीयविम्बसिद्ध्यर्थं [1]कोणान्ये (?दे) कादशानि तु ॥२४९॥

बाह्यपङ्क्तिद्वयं (?ये) शोध्य (?ध्यं) द्विती (?त)यं नवकं क्रमात्।
पङ्क्तिद्वयेन भ्रमणीं शेषं पङ्क्तित्रयेण तु ॥२५०॥

कण्ठादित्रितयं चारात् पञ्चकं सप्तकं पुनः।
द्वारस्य निकटे प्राग्वच्छोभं कुर्यान्नवांशकम् ॥२५१॥

समीपे त्वथ शोभस्य उ (ह्यु) पद्वारं प्रकल्पयेत्।
द्वे चतुष्षट् च भागांस्तु तस्मात् कण्ठादितो मृजेत् ॥२५२॥

पञ्चांशकं ततः कोणात् पङ्क्तौ पङ्क्तौ तु मार्जयेत्।
कृत्वैवं रञ्जयेत् पश्चाद् रागैरब्जसमुद्भव ॥२५३॥

पद्मपुष्करिणीमध्ये निक्षिपेत् पाण्डरोज्ज्वलम्।
मध्यबिम्बानि गात्राणां रजसा सुसितेन तु ॥२५४॥

[2]रक्तोज्ज्वलेन शेषाणि तद्बिम्बान्यथ रञ्जयेत्।
ततो मरतकाभेन बिम्बं पादान्तरस्थितम् ॥२५५॥

तपनीयोज्ज्वलाभेन तद्बाह्यं परिपूरयेत्।
शरद्गगनसंकाशं (?श) सदृशेनाथ वीथिकाम् ॥२५६॥

---

[1] ख–कोष्ठान्येका

[2] क–रक्तोज्ज्वलानि

द्वारं कुन्देन्दुतुल्येन शोभां [1]चम्पकपुष्पवत् ।
सुसम्पूर्यमुपद्वारं चामीकरनिभेन तु ।।२५७।।

कोणं झशोदराभेन शुक्ल (श्क) पक्षोपमेन च ।
सुप्रतिष्ठमिदं प्रोक्तं बुद्ध्याधारमथोच्यते ।।२५८।।

विभज्य सप्तधा क्षेत्रं तं चतुर्थं विभज्य च ।
शतानि सप्त जायन्ते भागानामधिकेन तु ।।२५९।।

चतुराशीतिभिर्भागै[2]र्मध्यपद्मं शतेन तु ।
बहिः पङ्क्तिचतुष्केण पीठं कुर्यात्सुलक्षणम् ।।२६०।।

[3]तदात्मकं गात्रकं स्यादष्टाविंशतिभिः पदैः ।
बिम्बत्रयान्वितं [4]तस्य मध्यतो दिक्षु लोपयेत् ।।२६१।।

द्वौ द्वावाद्यन्तपङ्क्तिस्थौ मध्यस्थाभ्यां चतुष्टतुः ।
मध्यबिम्बं द्विषट्कोणभागानामेवमुद्धरेत् ।।२६२।।

तस्य पार्श्वद्वये कुर्याद्बिम्बेऽष्टांशकसंयुतम ।
ताभ्यामाद्यन्तपङ्क्तिभ्यां त्रीणि त्रीणि विशोधयेत् ।।२६३।।

एकैकमन्तरस्थाभ्यां दत्तं पादं तु तत्समैः ।
शोभा द्वे बिम्बवत्कुर्याद्यथा तदवधारय ।।२६४।।

---

[1] ख–पुष्पकैः

[2] ख–मध्ये पद्मं

[3] ख–तदे–कं

[4] ख–तस्यां

पद्मक्षेत्राक्षिनिकटादारभ्य परिमार्जयेत्।
त्रीणि त्रीणि तु भागानि प्रतिपङ्क्ति[1]त्रयं द्विज ॥२६५॥

एकीकृत्य नवांशं स्यादेकं प्राक् [2]पदविम्बकम्।
एकोनविंशत्यंशानि तद्बाह्यात्परिमार्जयेत् ॥२६६॥

आद्यपङ्क्तौ विना ब्रह्मन् शेषात्पङ्क्तित्रयात्तु वै।
द्वितीयपादविम्बार्थं [3]तद्वीथ्यर्थमत परम् ॥२६७॥

पङ्क्तिद्वयं मार्जनीयं शेषं पङ्क्तित्रयेण तु।
द्वे चतुः षट् च भागानि दिक्प्रदेशात् क्रमेण तु ॥२६८॥

शीभोपशोभौ द्वौ कुर्यात् पूर्ववन्नवभागजम् (? जौ)।
विम्बपञ्च ततः कोणं सप्तविंशपदोत्थितम् ॥२६९॥

कुर्याद्यथा [4]तद्गमतो ममाप्यग्रेऽवधारय।
समीपेऽभ्युपशोभाभ्यां द्वौ शोभौ भागवर्जितौ ॥२७०॥

संमार्ज्योन्मीलयित्वा च बिम्बं तु प्रथमं भवेत्।
सप्तादशपदाद्भूतं बाह्याद्बिम्बं तु शोभयेत् ॥२७१॥

त्रीणि द्वितीयपङ्क्तौ तु सप्तगं बाह्यपङ्क्तिगम्।
लुप्त्वैवं रागजालेन विभागोत्थेन पूरयेत् ॥२७२॥

---

[1] क–ग–त्रयाद् द्विज
[2] ख–पादबिम्बकम्
[3] तद्द्वितीयमतः
[4] सर्वत्र तद्गमतो इत्येवास्ति

कल्हारपरिधेर्बाह्यमादौ रक्तोज्ज्वलेन तु।
मध्यविम्बं तु गात्राणां विधेयं पाण्डरोज्ज्वलम् ॥२७३॥

तद्बिम्बद्वितयं कुर्यात् सितं गोक्षीरपाण्डरम्।
अन्तरा पादविम्बं तु कुर्यान्मरतकप्रभम् ॥२७४॥

बहिस्स्थं जातरूपाभ्यां [1]वीथी राजोपलप्रभा।
सुधासमानि द्वाराणि शोभानि कजबाह्यवत् ॥२७५॥

पादबाह्यसमानानि [2]तूपशोभानि सत्तम।
पादाभ्यन्तरतुल्यानि कोणेष्वभ्यन्तराणि च ॥२७६॥

गात्रमध्यसमास्सर्वा बाह्यतो मण्डलाश्रयः।
बुद्ध्याधारमिदं प्रोक्तं गुणाकरमथोच्यते ॥२७७॥

[3]एकोनेन त्रिदशधा क्षेत्रं कृत्वा तु जायते।
शताष्टकं तु भागानामेकचत्वारि (?रिंशद्) भिः पदैः ॥२७८॥

त्रिसप्तकाधिकेनैव शतेनैव तु पङ्कजम्।
पद्मक्षेत्रं समारभ्य द्विद्विपङ्क्तिष्वथासनम् ॥२७९॥

[4]तस्मिन् वै गात्रकं कुर्याच्चित्वारिंशत्पदे स्थितम्।
पञ्चविम्बान्वितं रम्यं तदर्धं (?र्थं) दिक्षु लोपयेत् ॥२८०॥

---

1 क–विधि

2 क–ग–त्रयशोभानि

3 ख–एकोनांशेन त्रिदशधा

4 क–ग–तस्मिन् ये

आद्यन्तपङ्क्तिद्वितयात् कोष्ठकानां त्रयं त्रयम्।
एकैकं मध्यपङ्क्तिभ्यामेवमष्टपदोत्थितम् ॥२८१॥

गात्रकं (?के) मध्यबिम्बं शेषाण्यष्टपदान्यपि।
तत्पार्श्वस्थानि कार्याणि यथा तच्छृणु पौष्कर ॥२८२॥

समीपं मध्यबिम्बस्य आद्यन्ताभ्यां तु मार्जयेत्।
भागं भागं द्विजश्रेष्ठ त्रीणि त्रीणी तदान्तरात् ॥२८३॥

द्वौ द्वावाद्यन्तपङ्क्तिभ्यां तद्वन्मध्यस्थितद्वयात्।
एवं गात्रद्वयं कृत्वा चरणान्यथ साधयेत् ॥२८४॥

तस्य [1]बिम्बद्वयस्याथ [2]बहिरन्यद् द्वयं भवेत्।
प्रागुत्तराभ्यां बिम्बाभ्यां निकटात् परिमार्जयेत् ।२८५॥

द्विबिम्बद्वादशोत्थं तु द्विबिम्बचरणं द्विज।
कजक्षेत्राश्रिनिकटात् [3]तदर्थं भागपञ्चकम् ॥२८६॥

पङ्क्तिद्वयात्तु संशोध्यं प्राक् पङ्क्तौ त्रितयं [4]ततः।
पदद्वयं द्वितीये[5]स्याद् बिम्बमाद्यं स्फुटं भवेत् ॥२८७॥

ततः पञ्चदशांशानि तद्बाह्यं परिशोधयेत्।
द्वितीयपङ्क्तावेकांशं तृतीयेंऽशं तु पञ्चकम् ॥२८८॥

नवांशानि चतुर्थ्यां वीथ्यां पङ्क्तिद्वये ततः।
तृतीयेनावशिष्टं यत् तत्र द्वारं गले त्रयम् ॥२८९॥

---

[1] ख–बिम्बद्वयं स्यात्तु
[2] ख–बहिरन्यत् तः कृला पर्यन्तं गलितम्
[3] ख–तदर्धं पादपङ्कजम्
[4] क–स्वतः
[5] क–ग–घ–स्यात् नः वीथीं गलितम्

पञ्चपञ्चो[1]पकण्ठं तु तदाधारात्तु सप्तकम्।
पूर्वपङ्क्तावुपस्थं च शोभं कुर्यान्नवांशजम् ॥२९०॥

तदुपस्थमुपद्वारं तत्र [2]कण्ठपथे द्वयम्।
आद्याद्वितीयपङ्क्तिभ्यां द्विद्विकं द्विद्विकं मृजेत् ॥२९१॥

द्विदेहाच्च (?हंच) ततोऽश्रि (? श्रि) स्स्यात् त्रिसप्तदनिर्मितम्।
बीथिकाश्रेस्तु निकटात् षट्कं पङ्क्तिद्वयं (?ये) मृजेत् ॥२९२॥

पङ्क्तिद्वयं (?ये) तु तद्बाह्याच्छोध्याच्चा (?ध्यंचा) ङ्गणद्वयम्।
आद्यद्वितीयपङ्क्तिभ्यां द्विद्विकं द्विद्विकं मृजेत् ॥२९३॥

सप्तकं तु [3]तृतीये स्यात् परितः परिमार्ज्य च।
व्योमबाह्यं तु तस्मिन् स्यात् पाण्डरोज्ज्वलमस्य च ॥२९४॥

पैठीयं मध्यबिम्बं तु कुर्याद्द्वै [4]भागकावृतम्।
रवेर्मरतकाभेन तदन्तस्थे तुषारवत् ॥२९५॥

पादाभ्यन्तरबिम्बं यत् तद्वै सूर्यसमप्रभम्।
रक्तारुणं तु तद्बाह्यं वीथिका व्योमबाह्यवत् ॥२९६॥

द्वाराणि धवलान्यस्मिन् शोभस्याद्बन्धुजीववत्।
काञ्चनाभमुपद्वारं कृष्णान्यभ्यन्तराणि च ॥२९७॥

---

1 ख–कण्ठात्तु

2 ख-कण्ठोपधौ

3 ख–तृतीयं

4 क–ग–भागकव्रतं

वाह्यं मरतकाभेन तेषां वै परिपूरयेत्।
एतद्गुणाकरं विद्धि ध्रुवाख्यमधुना शृणु ॥२९८॥

द्विपञ्चदशधा क्षेत्रं कृत्वा जातान्यथाब्जज।
शतानि नवभागानि मध्यतः पुष्करं लिखेत् ॥२९९॥

शतेनैव तु सार्धेन षडूनेन ततो बहिः।
पीठं पङ्क्तिचतुष्केण ततो द्वौ [1]गात्रगा (?गैः) पदैः ॥३००॥

चत्वारिंशत्तु भागानि चतुरभ्यधिकानि च।
दिक्षु मध्यविम्बार्थं द्विषट्कं परिमार्ज्य च ॥३०१॥

आद्यपङ्क्तौ चतुष्कं तु अन्त्यपङ्क्तौ तथैव च।
मध्यपङ्क्तितद्वयाच्चैव द्वितयं द्वितयं पुनः ॥३०२॥

एकीकृत्य ततो बाह्ये द्वे द्वे बिम्बेऽष्टभागजे।
प्रागावसानपङ्क्तिभ्यामेकैकं च द्विजांशकम् ॥३०३॥

त्रि (? त्री) णि त्रीण्यन्तरस्थाभ्यां कृत्वैवं तस्य पार्श्वयोः।
कार्यं बिम्बद्वयं चास्य प्राक्प्रत्यक्पादयोर्द्विज ॥३०४॥

मध्यसंख्यैः [2]पदैरेता (?षा) मेकैकामन्तरा द्वयोः।
एवं गात्रगणे सिध्दे पञ्चबिम्बान्विते ततः ॥३०५॥

चतुर्बिम्बजयुक्तानि चरणानि प्रकल्पयेत्।
एकैकं चरणं कुर्यात् विंशत्यंशकसंवृतम् ॥३०६॥

---

[1] क–ग–गालकापदैः

[2] क–ग–पदै ह्येता

ततो व्योमाश्रिनिकटाच्छोधयेद्भागसप्तकम् ।
एकांशमाद्यपङ्क्तौ तु त्रीणि त्रीण्यपरं द्वयात् ॥३०७॥

कृत्वैवं पादमध्ये तु बिम्बं त्रीण्यथ मे शृणु ।
पार्श्वद्वये तु द्वितयं त्रितयं तदधस्तयोः ॥३०८॥

द्वितीयपङ्क्तावेकांशं गृहीत्वा द्वितयं पुनः,
तृतियपङ्क्तावेकं तु बहिष्ठायां तु रञ्जयेत् ॥३०९॥

एवं [1]चतुर्विधं विध्दि पक्षबिम्बद्वयं तु तत् ।
पञ्चांशं यत्तयोर्बिम्बं बाह्यपङ्क्त्या तु कल्पयेत् ॥३१०॥

भागं पङ्क्तिद्वयेनाथ वीथीं शेषत्रयेण तु ।
द्विचतुः षट्पदान्यत्र द्वारं कण्ठादितः क्रमात् ॥३११॥

शोभोपशोभशोभानि प्राग्वन्नवपदानि च ।
[2]यथैकैका (?क) दिशं (? दिशो) भागे भवेच्छोभाचतुष्टयम् ॥३१२॥

उपशोभद्वयं चैव तथा तद् परिमार्जयेत् ।
द्विबिम्बमथ कोणं च कुर्याच्छोभान्तरस्थितम् ॥३१३॥

एकांशं पूर्वपङ्क्तौ तु द्वितीये स्याच्चतुष्टयम् ।
अग्रं हित्वा पदेनैव बिम्बं कोणगतं भवेत् ॥३१४॥

भागपञ्चकसंयुक्तं यथा बाह्यस्थमुच्यते ।
नवांशानि बहिष्ठायां द्वितीयायां तु वै पदम् ॥३१५॥

---

[1] क–ग–चतुर्भि संसिद्धं

[2] ख–यथैकैकं

एवं दशांशजं कृत्वा रागजालेन पूरयेत्।
प्रफुल्लरक्तोत्पलवत् कोणं कुर्यात्तु पङ्कजम् ॥३१६॥

गात्रस्य मध्यबिम्बानि पीतपिष्टप्रभाणि च।
द्वे विम्बे तदुपस्थे तु कुर्यान्मरतकोपमे ॥३१७॥

तस्या (? ताभ्या) मपि च बाह्यस्थे तपनीयोज्ज्वले [1]स्मृते।
चरणे मध्यबिम्बं यत् तत् कार्यं रजतोज्ज्वलम् ॥३१८॥

[2]बाह्लीकपुष्पसदृशे तस्य बाह्यगते द्विज।
कुर्यान्मरकताभं तु तत्समीपगतं च यत् ॥३१९॥

[3]कुन्देन्दुधवलां वीथीं कुर्याद्द्वाराणि पूरयेत्।
राजपाषाणतुल्येन शोभां गात्रकमध्यवत् ॥३२०॥

[4]कुर्यान्मरतकाभं तु तत्समीपगतं तु यत्।
तस्यामुपगतं (? तत्पार्श्वस्थमुप) शोभं भवेत् तच्चम्पकप्रभम् ॥३२१॥

कोणात् सुन्दरगं (? कोणादन्तरगं) बिम्बं कार्यं रक्तोज्ज्वलेन तत्।
इन्द्रनीलनिभेनाथ तद्बाह्यं परिभूषयेत् ॥३२२॥

[5]ध्रुवाभिधानमित्युक्तं परमानन्दमुच्यते।
एकत्रिंशत्पदैः सम्यक् कृत्वा क्षेत्रं हि जायते ॥३२३॥

---

[1] क–ग–घ-स्मिते
[2] मुद्रित ३१९ तः पुर्नर्निर्मितः
[3] मुद्रित ३२१
[4] मुद्रित ३२२
[5] क–ग–घ–ध्रूपाभिधान

(ध्रुवामिधानमित्युक्तं परमानन्दमुच्यते ।
एकत्रिंशत्पदैः सम्यक् कृत्वा क्षेत्रं हि जायते ॥३२४॥

शतानि नवभागानामेकषष्टिपदैस्तथा ।
युक्तानि भागकैर्मध्ये पद्मक्षेत्रं तु पोष्कर ॥३२५॥

एकोनसप्ततिपदैर्युक्तैरेव शतांशकैः ।
बाह्यपङ्क्तिचतुष्कं तु पीठार्थं मार्जयेत्ततः ॥३२६॥

शतद्वयं तु भागानां द्विसप्तत्यधिकेन तु ।
भवेत्पीठं सुललितं पादगात्रकसंयुतम् ॥३२७॥

तस्मिन् वै गात्रकं रम्यं चत्वारिंशत्पदैर्भवेत् ।
अष्टाधिकैस्तु भागानां पञ्चबिम्बयुतं तु तत् ॥३२८॥

दिक्षु मध्यमबिम्बार्थमष्टकं परिमार्ज्य च ।
आद्यपङ्क्तौ तृतीयं तु अन्त्यपङ्क्तौ तथैव च ॥३२९॥

मध्यपङ्क्तिद्वयाच्चैव पञ्चकं पन्चकं पुनः ।
एकीकृत्य ततो बाह्ये द्वे द्वे बिम्बेऽष्टभागजे ॥३३०॥

आद्यन्तपङ्क्तिद्वितयात् कोष्ठकानां त्रयं त्रयम् ।
एकैकं मध्यपङ्क्तिभ्यां लुप्त्वैवं तस्य पार्श्वयोः ॥३३१॥

कार्यं विम्बद्वयं तत्र प्राक्प्रत्यक्पादयोर्द्विज ।
प्रागावसानपङ्क्तिभ्यामेकैकं च द्विजांशकम् ॥३३२॥

त्रीणि त्रीण्यन्तरस्थाभ्यां कृत्वैवं परिमार्ज्य च ।
एवं गात्रगणे सिध्दे पञ्चबिम्बान्विते ततः ॥३३३॥

चतुर्बिम्बसमेतानि चरणानि प्रकल्पयेत्।
एकैकं चरणं कुर्याद् विंशत्यंशकसंयुतम् ॥३३४॥

ततो व्योमाश्रिनिकटात् शोधयेद् भागसप्तकम्।
एकांशमाद्यपङ्क्तौ तु त्रीणि त्रीण्यपरद्वयात् ॥३३५॥

लुप्त्वैवं पादमध्ये तु बिम्बं त्रीण्य मे शृणु।
पार्श्वद्वये तु द्वितयं त्रितयं तदधस्तयोः ॥३३६॥

द्वितीयपङ्क्तावेकांशं गृहीत्वा द्वितयं पुनः।
तृतीयपङ्क्तावेकं तु बहिष्ठायां तु रञ्जयेत् ॥३३७॥

चतुर्विधं तु तद्विद्धि पक्षबिम्बद्वयं द्विज।
भागपङ्क्तिद्वयेनाथ वीथिं शेषत्रयेण तु ॥३३८॥

पूर्वपङ्क्तावुपस्थं च शोभं कुर्यान्नवांशजम्।
तदुपस्थमुपद्वारं तत्र कण्ठपथे द्वयम् ॥३३९॥

चत्वारि चोपकण्ठात्तु षट्कं तद्बाह्यतो मृजेत्।
ततोंशकचतुष्केण सूक्ष्मशोभं प्रकल्पयेत् ॥३४०॥

द्विदेहाच्च ततोऽश्रिः स्यात् सप्तविंशतिकोष्ठयुक्
वीथिकाश्रेस्तु निकटादाद्यपङ्क्तौ नवांशकम् ॥३४१॥

द्वितीयपङ्क्तौ द्वित्रितयं तृतीयायां पदं पदम्।
एकीकृत्य भवेदाद्यं बिम्बं सप्तदशांशजम् ॥३४२॥

ततो बाह्याद्दशांशं तु एकीकृत्य विमृज्य च।
लुप्त्वैवं रागजालेन विभागोत्थेन पूरयेत्) ॥३४३॥

इति पञ्चमोऽध्यायः समाप्तः

* * *

अथ षष्ठोऽध्यायः

1……………………………………………………………………

……………………………………………………………,……

[2]भूमौ विभजयेत्तस्मात् ततो विभजयेत् पुनः।
कृत्वोभयं परिच्छिन्नं [3]………गवं पुरा ॥१॥

ततोऽष्टमनवांशं च [4]दशमैकादशं च वा।
द्वादशांशं परित्यज्य [5]क्रमात् पत्राप्रसिद्धये ॥२॥

पद्मानामपि [6]पद्मानां (?पद्मानां) त्रिपत्राद्यावदन्तिमम्।
शेषेण कर्णिकाभागे केसराणि दलानि च ॥३॥

सम्यग्विकसिताकारं (?) पद्मक्षेत्रेष्वयं क्रमः।
दलाप्रसिद्धये नूनमाख्यातं कमलोद्भव ॥४॥

---

1 अयमध्यायः पद्मलक्षणप्रतिपादकः तथैवान्ते निगमितश्च। अस्यादौ महान् ग्रन्थपातः। अत्रेदमवधेयं—अस्मादध्यायात् पूर्वतनः पञ्चमोऽध्यायः इदम्परतया सर्वतोभद्रादिमण्डललक्षणप्रतिपादकः। तस्य चान्ते ग्रन्थपातः तच्चिह्नमपि न किञ्चित् प्रदर्शितम् सर्वेषु कोशेषु; प्रत्युत पञ्चमाध्यायस्य त्रुटिस्थले भग्नमुखोऽयं षष्ठाध्यायभागः अलक्षितसन्धिबन्धस्संयोजितः तथान्ते "इति षष्ठोऽध्यायः" इति निगमितो दृश्यते।

2 क—…पुनः ग—घ—भूतसमात् तः विभज

3 ख—चिह्नं व्यामो? ग—घ—चिह्नं च्छयामो

4 ग—घ—दशमेकादशं

5 क—ग—घ—कामपात्राभशोचये

6 पद्मानां इति स्यात्

वक्ष्ये मुकुलिताकारं (?र) पद्मपत्राग्रसाधनम् ।
[1]मध्याचिह्नावसानं तु कर्णिकाद्यैर्विभज्य च ॥५॥

भागैश्चतुष्प्रकारोत्थैः सुसमैर्विषमैस्तु वा ।
यथा तद् ते प्रवक्ष्यामि येन निःसंशयो भवेत् ॥६॥

नवाष्टसप्तषट्पञ्चचतुर्भिश्चांशकैर्भवेत् ।
त्रिदलाद्यष्टपत्रान्तक्षेत्रं वक्ष्ये पृथक् पृथक् ॥७॥

मध्यदेशात् समारभ्य शेषं क्षेत्रावसानकम् ।
एकैकांशेन सर्वेषां मध्ये कार्या च कर्णिका ॥८॥

शेषाणां [2]त्रिशत्संख्यानां त्रिष्वाद्यप्रति[3]दीर्घिताः,
केसराण्यंशदीर्घाणि [4]दलमूलार्धकर्णिका ॥९॥

अ (?न्य) थवा कर्णिकोच्छ्रायतुल्यानि परिकल्प्य वै ।
स्थितानि पत्रमध्ये तु सर्वत्र द्वित्रिसंख्यया ॥१०॥

दलशेषं द्विधा कृत्वा तन्मध्ये प्रथमं स्मृतम् ।
मध्यात् पद्मदलाग्रं यत् कोटिमूले तु कीर्तितम् ॥११॥

त्रिपत्राद्यष्टपत्रान्तं पद्मानामीदृशो विधिः ।
[5]नवपत्रादितो यावद् सप्तविंशद्दलान्तकम् ॥१२॥

---

[1] ख–मध्याद्विह्नावसानं तु
[2] क–ग–घ–त्रिशत्संख्येन
[3] ख–दीर्घकाः
[4] क–दलमूला ग–घ–दलमुलाथकान्यथा
[5] क–ग–घ–नवपत्रान्ततो

यथा स्यात् कर्णिकामानं तत् ते वच्मि सकेसरम्।
न्यूनं विंशतिमं भागमष्टपत्रस्य कर्णिकम् ॥१३॥

तत्कर्णिकाप्रमाणस्य [1]त्वेकवृद्ध्या तु वंशयेत्।
विधिनानेन पद्मानां प्रथि (? धि) का कर्णिकां नयेत् ॥१४॥

दलप्रदं केसरं यत् कुर्याच्छिष्टेन पूर्ववत्।
दीर्घिका (?कां) केसराणां तु कर्णिकार्धेन वर्धयेत् ॥१५॥

अथोऽन्येन दलाब्जानां यागानां देवता पुनः।
ब्रह्मन् निर्वर्त्यमानानामेष एव विधिस्स्मृतः ॥१६॥

सुस्थिताधारपद्मानां हेमशैलादिवर्त्मनाम्।
पर्यङ्कशयनाभोगं मूर्त्यादीनां निवेशने ॥१७॥

तत्प्रभा (?भां) [2]पति (प्रघि) कानां च चतुर्थांशेन कल्पयेत्।
पत्राणि केसराढ्यानि त्रिभिरंशैस्तु कर्णिका ॥१८॥

सा चोच्छ्रिता दलार्धेन दलमानेन वा भवेत्।
कुर्याद्दलार्धदीर्घाणि पतितानि तदन्तरे ॥१९॥

केसराण्यथवा विद्धि तत्त्रिभागसमानि च।
कल्पनीयानि वा विप्र कर्णिकासंश्रितानि च ॥२०॥

प्रागुक्तोच्छ्रायमानानि सम्यगेवोत्थितानि च।
ईदृशानां द्विजाब्जानां सहस्रशतसंख्यया ॥२१॥

---

[1] ख–त्वेकवृद्धितु
[2] क-ग-घ–पतिकाञ्चानां

शोभानुरूपया दृष्ट्वा संपाद्या पत्रसन्ततिः।
कर्णिकाऽपि ततः कुर्यादुक्तमानाधिका [1]यया ॥२२॥

वृत्तायतानां पद्मानामेष भाव (?एक) विधिस्स्मृतः।
एवं सञ्चिन्तयित्वा तु द्योस्स्याद्वनाधिका यथा ॥२३॥

भ्राम्यं वृत्तचतुष्कं तु मध्यस्थं विद्धि कर्णिका।
द्वितीयं केसराख्यं तु दलमध्यं तृतीयकम् ॥२४॥

नार्यां? (?तुर्यं) दलावसानं तु स्यात्तं चिह्नो (?तच्चिचह्ना)
न्तिकन्तुवत् (? तृ वा)।
पश्चाद्दलावसानस्थवृत्तः याभ्यन्तरे स्थिते ॥२५॥

पद्मानां प्राग्बहिश्चोक्तं प्रागुक्तपरिसंख्यया।
अनुक्तेष्वपि वाऽब्जेषु नियमादूर्ध्वगेषु च ॥२६॥

सामान्यमंश [2]संख्याता (?न) तेष्वन्येषूदितेष्वपि।
त्रिपत्रादिषु सर्वेषु त्वथवा कमलोद्भव ॥२७॥

येन यद्भ्राजते पद्मं सोंऽशस्तस्याग्रतः क्षिपेत्।
पत्रविस्तारसंक्षेपवशेन च वरप्रदः ॥२८॥

तस्मात् संक्षिप्तपत्राणामग्रं दीर्घं विराजते।
तद्वद्बिम्बोदरस्थानां बहुपल्लविनां तु वै ॥२९॥

---

1 ग–घ–ऽथवा

2 ख–ग–घ–सङ्घाता

साग्रपत्रांशसिद्धिं च कृत्वैवं सूत्रसञ्चयम्।
स्फटिकादर्धमंशानां विनिक्षिप्य ततोऽब्जज ॥३०॥

दलार्धमानसूत्रेण दलाग्रं संस्थितेन च।
दलांशकं 1...सन्तु दलांशस्यैव मध्यमा ॥३१॥

मत्स्यचिह्नद्वयेनैव सम्यगुप्ताद्य सङ्गमम्।
पत्रमध्यं प्रसिद्ध्यर्थं तेषु सूत्राण्यतः क्षिपेत् ॥३२॥

दलरा (?लाया) मप्यमं? सूत्रं प्रकीर्त्या? ह्यवतिष्ठते।
शेषं सूत्रद्वयं ह्येषां साधकं स्यात् परस्परम् ॥३३॥

इत्युक्तं पद्मयागानां सूत्रपातं समासतः।
दलानां [2]घटनां चाथ समासाच्छृणु सन्ततिम् ॥३४॥

यद्वेन्दुलाञ्छनाद्यैस्तु ससूत्रैरेव जायते।
अभीप्सि [3]तामपूजास्य? (?ब्जपूज्यस्य) प्रादक्षिण्याल्लिखेद्दलम् ॥३५॥

दिग्विदिक्सप्तसंश्लेषैः पूरणाय कजच्छदैः।
दलमध्ये कदो (? जो) रस्थं? सूत्राणां तु दलान्तरम् ॥३६॥

तुर्यवृत्ता [4]बसानाद्वै समारभ्य तु लाञ्छयेत्।
स्पृशेत् तत्सिध्दिसूत्राभ्यां मध्ये तु सदशक्षितिः ॥३७॥

---

[1] क ख-घ-द्विसासन्तु
[2] ख-विदलानां च समासा
[3] ख-तामपूजा स्यात्
[4] ख-वसानाद्यैः

सूत्रयोः शशिनो? न (?नि) न्याद्यथा कण्ठौ तु [1]मीलिता (?तौ)
ततश्शशिकलाशृङ्गस्थाने सूत्रं निधाय च ॥३८॥

दलाग्रभागपर्यन्त [2]निष्पाद्यावपरं तु वा ।
कृतेनानेन विधिना शीर्णपत्राकृतिर्भवेत् ॥३९॥

[3]अन्तराद्यन्तसूत्राभ्या[4]मशान्तानाममत्यशीम् ।
सिद्धस्य [5]शर्णो (?शीर्ण) पत्रस्य [6]त्वग्रांशार्धस्य चान्तरे ॥४०॥

कृत्वा सूत्रं [7]समानीय प्राग्दत्तांशस्य सन्निधिम् ।
एवं तदवधे (?धेः) [8]सूत्रस्त (? सूत्रं त) देव? कमलोद्भव ॥४१॥

दिव्य [9]चन्दनलेख्यां च ज (?चा) लयेच्छशिलाञ्छने ।
अग्रवज्जायते तीक्ष्णं मध्यदन्तौ (ध्यादन्तं) दलान्तरम् ॥४२॥

---

[1] क-ग-घ-मीलिना

[2] क-ग-घ-निष्पाल्यावपरं

[3] क-ग-घ-अन्तराद्य

[4] क-मन्तनाम ग-घ-मन्तनाममत्यशि

[5] क-'शीर्णपत्रस्य' इति स्यात्

[6] घ-त्वग्रांद्धशार्धं स्य शान्तरे

[7] ग-घ-समानीवा

[8] क-घ-सूत

[9] क-चन्दनवे ग-चन्दनवेल्यां चां घ-चन्दनवेलां लांचां

अथ संसक्तपत्राणां [1]स्यादिदं (दल) साधनम्।
अभासंसक्तपत्राणां [2]स........सूत्रत्व [3]........विना ॥४३॥

विना श (? विनाशं हि) कुर्याच्चपसा........।
..............मुत्थानमर्थानां पत्रजन्मावधेः पृथक् ॥४४॥

यथा तदधुना वच्मि तव सन्देहशान्तये।
दलसिद्धिं विना प्राक्......संयुक्तं लिख्य पङ्कजम् ॥४५॥

त्यक्त्वा व्योमार्धमात्रं तु समीपात् सूत्रमध्ययोः।
तृतीयांशं तु पादं वा ज्ञात्वांशाब्जे पदे स्मृतिम् ॥४६॥

[4]एतं चन्द्रेऽर्धचन्द्रं तु दलमध्यं तु पूर्ववत्।
छत्रं ग (? पत्रं तु) ब्रह्मदेशस्थं सूत्रद्वितयपातनात् ॥४७॥

(? तत्) स्यात् संसक्तपत्रं तु मार्जना[? नात्] सिद्धिसूत्रयोः।
अदृष्टपृष्ठभागस्य परिवारावृतस्य च ॥४८॥

सांमुख्यं तु विभोः कल्प्यं भागमाश्रित्य दक्षिणम्।
आश्रयं भूतपादी (?दा) नां दिग्विदिग्घृदयं हियम् (?त) ॥४९॥

अग्रात् प्राच्यमथाग्नेयं दक्षिणे नैर्ऋतिक्रमात्।
एवमुत्तरभागे तु ऐशानं दैवतं स्मृतम् ॥५०॥

---

[1] ख–चय
[2] ख–सद्धि सचि
[3] ख–बिम्बिनाम्
[4] ख–एतच्चन्द्रार्धं

दलता (?लाग्रा) देवमस्या थ? ददतं ध (दल सन्धां) नमुच्यते।
प्रागीशदलसन्धेस्तु मध्यात् सूत्रं प्रसार्य च ॥५१॥

आप्यऋक्षेशयोः पत्रं सिद्ध (?द्धि) पर्यन्तमानयेत्।
प्राक्पदादीश्कराख्यस्य पोम्य (?प्राप्त) व्यं? पूर्वलक्षितम् ॥५२॥

पङ्क्तित्वे वर्तमानस्य दलजालस्य लक्षणम्।
इत्येतत् पत्रबन्धानामब्जनामब्जसंभव ॥५३॥

कीर्तितं सर्वसामान्यं कर्णिकासाधनं शृणु।
सार्धेन मूलव्यासेन तेन पदाधिकेन वा ॥५४॥

द्विगुणेनाथवा विप्र कुर्याद्वै कर्णिकोच्छ्रितम्।
सबीजं वक्त्रविस्तारं [1]तथैनेन प्रकल्पयेत् ॥५५॥

हि (?ही) कर्णिकाप्रान्तं? मेखलार्थं विवर्ज्य च।
ब्रह्मस्थानपदे शेषं बीजार्थं विभजेद् द्विधा ॥५६॥

[2]बीजैस्तन्मध्यतस्तस्य दिग्विदिक्ष्वष्टकं लिखेत्।
परिधेरवसानं तु बीजानामन्तरं द्विज ॥५७॥

किंचिन्निम्नाऽथ कर्तव्यं [3]बीजो वै कथ्यते यथा।
जाम्बूनपदादिधातूत्थं यज्ञकाष्ठाश्मजं तु वा ॥५८॥

---

[1] तथैतेन इति स्यात्

[2] घ–बीजैः इत्याद्यर्धत्रयं गलितम्

[3] ख–बीजोपं सज्यते

सुषिरं कर्णिकाकारं मन्त्रं (?पत्रं) कुर्याद्वि [1]भेदभृत् ।
तेनेन्द्र (दं) कर्णिकाकारं कर्णकेल (?कर्णि बर्ध) समुच्छ्रितम् । ५९॥

श्रीत्रेष्टकस्स (?कैः स) मुदितमीषत् क्षीरमधुप्लतम् ।
(? कूष्मा) ण्डपिष्टशालीनचूर्णेन सह योज्य च ॥६०॥

रञ्जितं कुङ्कुमेनैव [2]सुपीतेनाथ सानुना ।
द्विदेहं तेन तद्वक्त्रं पत्रबन्धु (?न्धे) प्रसूर्य (?सार्य) च? ॥६१॥

कवाटरहितं कृत्वा पिण्डीभूय यथागतम् ।
तदा नियोज्य स्वक्षेत्रे हेमरत्नादिकान्विते ॥६२॥

[3](मसी) पात्राणि सर्वाणि का (? क) मान्निम्नादि पूर्य च ।
प्रोक्तावि तु च वै मध्याज्जलस्थमिव गोलकम् ॥६३॥

करिकुम्भसमानानि द्विजाण्डसदृशानि च ।
स बाह्याभ्यन्तरन्तस्थो देवीशोणोन्नतानि च ॥६४॥

क्रमान्निम्नं तु वै यावर्द्भागस (? म) तां व्रजेत् ।
तनुमूलप्रसुप्रा॰तं ॰ मध्यमध्यानि पूरयेत् ॥६५॥

वृक्षलास्थल (?मूलास्थि) तुल्यानि क्रमशः केसराणि च ।
[4]……………………………………………………
एवं सम्पाद्य संपूज्य अन्येषाभ्य (?म(भ)न्तरे द्विज ॥६६॥

---

[1] ख-केदकृत्–हृत्
[2] क–ग–घ-सवि....थ
[3] ख–ग–घ-भसा पत्राणि
[4] अत्रमहान् ग्रन्थपातः

अध्यात्मा ह्य (ख्या) धिदेवाख्या अ [?ध्य] धिभूतक्रमेण तु ।
मन्त्राणि मन्त्रमूर्तिश्च तत्त्वानि सकलानि च ॥६७॥

मुन्त्रो ह्यध्यात्ममुद्दिष्टं मन्यमूर्त्य (?तिर) धिदैवतम् ।
अधिभूतं स्मृतं तत्त्वमित्येवं क्रियते द्विज ॥६८॥

स्थूलसूक्ष्मपरत्वेन स्वयं [1]मान्त्री स्थितिस्तथा ।
संनिवेश्यात्मसक्तं वा उत्तरोत्तरया सह ॥६९॥

प्रभवाप्ययपयोगेन [2]योजयेन्मन्त्रसन्ततिम् ।
अभिन्नाभेदभूतानां वेदानां च पृथक् पृथक् ॥७०॥

अध्वक्रमेण युक्त्या वै स यागफलमश्नुते ।
मन्त्रोदितं हि यद् वस्तु तद् विर्ध्यानन्दलक्षणम् ॥७१॥

सर्वभावेष्वतीतःवात् सर्वेषां [3](तत्) योजयेत् ।
समस्तपञ्चयागानां पत्रेष्वाद्यन्तयोस्तथा ॥७२॥

सर्वेष्वाधारभूतत्त्वात् [4]तद्बिम्बात्वात्तु तत्त्वतः ।
न्यसेम केसरे लाजास्तां शक्ति तद्धि कर्मणि ॥७३॥

अनेकभेदभिन्नानां व्यापिनीं सर्वदेहगाम् ।
तदङ्गषट्कज्ञानाद्यं [?द्य] [5]समुदाया (?यात्) न्यदैश्वरम् [तदैश्वरीम्) ॥७४॥

---

1 ख–मन्त्रस्थित
2 ख–यो यजेन्मन्त्र
3 ख–स्तुत ग–घ-स्फुट
4 क–ग-घ-तल्लंबत्वात्तु
5 ख–समुदायां तु?

[1]येनानन्दाच्च शक्त्या वै ग्रहणं प्रतिपद्यते ।
सिञ्चञ्चो (?न्ती) तत्त्वतो भिन्ना (न्नां) न्यसेत् केसरकोटिभ
(? भा) म् ॥७५॥

साधिभूताधिदैवो यो मन्त्रोऽनुग्रहकृत् प्रभुः ।
यष्टव्यो दलमध्ये तु तदङ्गानि च तत्र वै ॥७६॥

तदग्राच्च चतुर्दिक्षु [2]साष्टमन्त्रा हृदादयः ? ।
विदिक्संकल्पनां कृत्वा तत्रास्त्रं तु प्रपूजयेत् ॥७७॥

केवलं द्विति? (?त्रि) शक्तित्वान्मध्ये मन्त्रसमीपतः ।
ध्यात्वा न्यस्याथ संपूज्यो नेत्रमन्त्रो द्विजोत्तम ॥७८॥

इत्येष परमात्मीयमन्त्रन्यास उदाहृतः ।
पृथक् षड्विंशसंख्यैस्तु तुर्यादौ यत् प्रकाशितम् ॥७९॥

स्थानभेदैः शरीरस्थं मन्त्रव्रतमह (?व्रातमिह) द्विज ।
थत् पिण्डं मन्त्रसंख्य (?ख्यं) स्तु (?तु) पदमन्त्रगणस्थ च ॥८०॥

वर्तते हि प्रभुत्वेन त्वाधिपत्येन वै तथा ।
व्यूह [3]स्थागममन्त्राणां प्रागुक्तानां च सर्वशः ॥८१॥

[4]यद्यत्यमिविंशत्य (?त्या) [5]त्वथवा ध्येययुक्तिभिः ।
पीठाख्यदेवतानां च पीठस्थाना (?नां) न (?ह्य) नेकशः ॥८२॥

---

[1] ख–येनानन्दाद्यशक्त्या
[2] क–ग–घ–सह्यभूतं
[3] ख–स्थानगमन्त्राणां
[4] ख–यद्यस्थभिविंशस्य
[5] ग–घ–त्वायाधेय

द्वाःस्याद्वाःस्थानुयायिभ्यां स्थानाश्रिष्वपरेष्वपि ।
सबाह्याभ्यन्तरस्थानि यागानां विविधानि च ॥८३॥

तानि त्वया ह्यभक्तानां नाभिव्यञ्ज्यानि पद्मज ।
वचसा कर्मणा चैव [1]सुतप्ते (?प्त) क (?ल्म) षात्मनाम् ॥८४॥

विषयग्राहभूतानां ज्ञानज्ञेयाभिलाषिणाम् ।
श्रेयोर्थिनामिदं वाच्यं यो (?या) गभेदं मयोदितम् ॥८५॥

---

[1] ख–सुपक्वे...

इती श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
पद्मलक्षणो नाम
षष्ठोऽध्यायः

———o———

अथ सप्तमोऽध्यायः

पौष्कर उवाच—

भगवन् पुण्डरीकाक्ष ज्ञातलोकव्रत त्वयां।
भविनामभुवं [?शुभं] ज्ञात्वा व्यूहभेदस्तु सूत्रितः ॥१॥

तस्याहं श्रोतुमिच्छामि यथावत् परमेश्वर।
स्वरूपं च प्रमाणं च [1]साधनं न्यासमेव च ॥२॥

श्रीभगवानुवाच—

शृणुष्वावहितो ब्रह्मन् कथयामि समाहितः।
स्वरूपं लभते ब्रह्मन् [2]नानायोन्यस्य निर्वृतिम् ॥३॥

[3]द्वाराणा [? णां] [?पीठ] कोणानां पुरा[4]णान्तरतो
[? न्तु ततो] द्विज।
वर्तुलानां विचित्राणां भुवनानां विशेषतः ॥४॥

पीठवीथीयुताद्वा [? नां] वा तुर्याग्राणां [?श्राणां] तु मध्यतः।
प्रागुक्तानां च सर्वेषामेकैकास्मिन् यथेच्छया ॥५॥

---

[1] ग–घ–साधनान्यास · क–साधनन्यास

[2] ख–नानायोन्यस्य ग–घ–ननायोऽस्य

[3] ख–ग–द्वाराणानिति

[4] ग–घ–णान्तरते

सप्पद्मपत्रभेदेन त्वेकमूलोत्थितानि [?तेन] च।
प्रवृत्त [?प्राग्वृत्ते] पीठवीथ्यग्रद्वारमध्ये चतुर्दलम् ॥६॥

[1]कमलं तद्बहिस्त्रीणि त्रित [?द] लान्यम्बुजानि च।
चतुर्दश [?ल] समानेन यथा[2]या (?गान्तरं] शृणु ॥७॥

अस्य चाद्यं चतुर्व्यूह (? हं) त्रिकोणभुवनान्तरे।
चतुरश्रेण वाऽब्जानि [3]वृत्तशेषाणि मध्यतः ॥८॥

प्राग्व्यूहं स्याच्चतुःपद्मं तन्मध्ये तु चतुर्दलम्।
कमलं तद्बहिस्त्रीणि त्रित [?द] लान्यम्बुजानि च ॥९॥

द्वितीयं पञ्चभिः पद्मैः पञ्चपत्रे [?त्रं] हृदन्तरे।
चतुर्दिक्ष्वथ चत्वारि चतुष्पा [?ष्प] त्राणि तद्बहिः ॥१०॥

षड्भिरब्जैस्तृतीयं तु तन्मध्ये लिख्य षड्दलम्।
पञ्चभिः पञ्चवक्त्रै [?पत्रै] स्तु प्रागादापा [?वा] वृतं तु यत् ॥११॥

व्यूहानि त्रीण्यतोर्ध्वं वै सप्तपद्मानि पौष्कर।
सप्ताष्टनवपत्राणि तेषां मध्येऽम्बुजानि च ॥१२॥

बाह्यस्थानि च षट् सप्त क्रमादष्टदलानि च।
व्यूहत्रयमथोर्ध्वान्तादष्टकं कमलं भवेत् ॥१३॥

---

[1] प्रथम चरणः लो. ९ब मध्ये पुनरावृत्तः

[2] ख-यायां तमहं ग-घ-यार्णमहं

[3] ग-घ-वृत्ते

सप्त सप्त कजास्तस्मिंस्तृतीया (?तयं) बाह्यतस्तथा।
एकैकमन्तरस्थं तु क्षेमपद्मं तु पद्मज ॥१४॥

त्रीण्यथो नवपद्मानि व्यहानि कमलोद्भव।
तेषामेकैकशो मध्येष्व (?त्य) ष्टदिक्ष्वष्टकं स्थितम् ॥१५॥

पत्र (?पश्चात्) त्रयोदश (?शं) व्यूह (?हं) संसाध्यैकादशाम्बुजम्।
एकं पूर्वोक्तवत् तस्मिन् दश शेषाणि तद्बहिः ॥१६॥

ततश्च सप्तमव्यूहादादितश्चाष्टपङ्कजम्।
सप्तादशदलं यावत्......................... ॥१७॥

[1](?अ) न्तस्थबाह्यपद्मानां दलसंख्यां निबोध मे।
आधस्याभ्यन्तरे कुर्याद्दशपत्रं सरोरुहम् ॥१८॥

तदेकैकं च तद्वृद्ध्या [2](?शेषाणां परिकल्पयेत्।
सप्तादशदलं यावत् तेषामभ्यन्तरे भवेत् ॥१९॥

[3]भूयस्तदपि (।पद्मानां) बाह्यस्थानां प्रकल्पयेत्।
[4]नवपत्रात् समारभ्य) त्वेकवृद्ध्या तु पूर्ववत् ॥२०॥

पृथक् पृथक् [5]............तस्य सत्तम।
बहिःस्थानि च पद्मानि सुषोऽशदलानि च ॥२१॥

---

[1] ख-ग-घ-संतस्थ
[2] घ-( ) कुण्डलान्तर्गतं गलितम्
[3] ख-भूयस्तदपि....विप्र
[4] क-ग-नवपत्रात्
[5] ग-घ-कहजाध्यायवं तस्य

इत्येषां व्यूहयागानां सपत्रा पद्मकल्पना।
कीर्तिता वै समासेन मया ते कमलोद्भव ॥२२॥

दिग्विभागं च पद्मानां प्रागवत् पत्रोदितं भवेत्।
प्रमाणमयनं पश्चाद् गर्भस्थकमलादितः ॥२३॥

वीथ्या वै सह बाह्यस्थपङ्कजानां क्रमेण तु।
एकादशक्षेत्रमाद्यं (?पद्म) व्यूहस्य वर्तुलम् ॥२४॥

तादृग्द्वादशहस्तं स्याद् द्वितीयस्य ततः परम्।
एकैकं तु करं तावत् क्रमेणानेन कल्पयेत् ॥२५॥

निष्ठां व्यूहस्य वै यावच्चतुर्विंशतिभिः करैः।
सर्वदिग्वर्तुलं क्षेत्रं जायते विततं समम् ॥२६॥

[1]आकुलस्य पुरा मानं ब्रह्मन् व्यूहस्य कस्य चित्।
तन्मानेनार्धसूत्रेण मध्याद्भ्राम्य भ्रमं समम ॥२७॥

क्षेत्रमानमिति स्यातमधुना साधनं घृणु।
प्रागुक्तयुक्तं प्रागादौ भागौ द्वादशभिः समैः ॥२८॥

(?चतुरश्रीकृते तद्वत्) क्षेत्रे भागीकृते सति।
मध्यदेशात् समारभ्य तन्तुभिः पक्षसंमितैः ॥२९॥

प्रपूर्य व्यूहभृन्नाम यत् पुरा वर्त्तुलीकृतम्।
ततो (?त) पद्म (?पूर्वे) पदादादौ भागैर्द्वादशभिः समैः ॥३०॥

---

[1] **ग–घ–आकलस्य**

चिह्नयेत् सर्वसूत्राणि यावत् क्षेत्रमवाप्यते।
ब्रह्मस्थानात् समारभ्य क्षेत्रस्याद्याच्चु तद्गण (?णात्) ॥३१॥

न ह्यंशकानां तु...क्षेत्रान्तात् तावदाचरेत्।
मध्ये तु पञ्चभिर्भागैरेकैः प्राग्भ्राम्य वर्तुलम् ॥३२॥

एकांशमथ संत्यज्य वीथ्यर्धं चैव तद्बहिः।
परितो मध्यवृत्तस्य बाह्यवृत्तगणाश्च (?शि) तम ॥३३॥

सूत्राणामुपरि ब्रह्मन् चतुरंशकसंमितम्।
भ्रमणीयं च सूत्रेण मध्याद्यक्षे समे स्थितौ ॥३४॥

भ्रामितानां च वृत्तानां क्षेत्राख्यपरिधेर्द्विज।
अंशकद्वितयं मध्ये [1]सवि (?रि) ताने (?न) व शिष्यते ॥३५॥

मध्यतो[2] बाह्यसूत्रस्य बहिस्स्थानं च पौष्कर।
स्वङ्या......... ॥३६॥

बहिस्स्थानां तु वृत्ताना [3]मन्तरालं तु यत् स्मृतम्।
तच्चानियतमानेन समानं स्यात् परस्परम् ॥३७॥

अन्तर्गतं हि वृत्तस्य···· ।
एकस्मिन् बहुधा व्यूह्य त्वन्तरालेषु चान्तिमम ॥३८॥

---

[1] ग–घ–वधिताने

[2] क–बाह्यस्य वृत्तस्य ग–घ–सूत्रस्य

[3] ख–मन्तरालात्तु

एवमुल्लिखिते वृत्ते दिग्विदिक्परिसंस्थिते।
परिमण्डलरूपाणि गा....... ॥३९॥

[1]........ये द्वे ते संयुतानि च।
स्थूलसूक्ष्मस्वरूपाणि पत्रभेदान्वितानि च ॥४०॥

काम[2]....ये......ब्जानि ततः शृणु।
प्राक् चोदितानि सूत्राणि बहिस्सत्ताप्रसिद्धये ॥४१॥

[3]....र्मध्यमाद् वृत्ता [4](माज्ययोत्रतिकावते)।
प्राक् प्रत्यक् सौम्ययाम्यं च समं सूत्रद्वयं तथा ॥४२॥

सूत्राणां द्व्यंशमानेन भ्राम्य मध्यं तु पौष्कर।
मध्यमस्य.........तत्राब्जं लिख्य पूर्ववत् ॥४३॥

चतुर्दलानि भेदेन यस्मिन् तर....।
प्राक् साधयित्वा पीठादिं (?दि) द्वारान्त (?नां) र्मण्डलं बहिः ॥४४॥

संसाध्यं (?ध्य) च ततः पश्चा? ना (न्य) न्यथाऽर्थस्य साधनम्।
अंशकत्रितयाशेषात् षष्ठ्यं [5] [शं साधनस्य मे] ॥४५॥

.........................तो भवेत्।
शिष्टं यदन्तरस्थं तदेकीकृत्य विभज्य च ॥४६॥

---

1 तु–घ कामप्रथतामार्गमद्वारे ये द्वे
2 ख...ब्जानि तत
3 ग–घ निर्वद्यै
4 –ख ( ) कुण्डलगतान्यक्षराणि
5 ख ( ) अन्तर्गतान्यअराणि–ग-घ शंवासवस्त्यमे

चतुर्धा सुसमैर्भागैर्भ्यैकांशेन चासमा? ।
.........यैद्वारादीनां तु येन तु ॥४७॥

एवं क्षेत्रत्रयं भ्राम्यं ततः? पीठं तु साधयेत् ।
पादगात्रकभेदेन यथा तदवधारय ॥४८॥

पूर्वयामं....... बीजसंमुखम् ।
क्षिप्तसूत्रचतुष्कं प्राग् ब्रह्मस्थानक्रमेण तु ॥४९॥

ततः पैठीयवृत्ताभ्यां दिक्सूत्रस्य तु मण्डले ।
........ये च द्वयोर्द्वयोः ॥५०॥

[1]पीठ.... पुरुषगात्रेण (? सूत्रस्य सूत्रेण) द्विगुणेन बहिस्स्थतः ।
[2]सार्धेनान्तर्गतं वृत्तं तन्मात्रेण न पौष्कर ॥५१॥

[3]भागस्तु चिह्नवृत्ताभ्यां द्वाभ्यां ह्येतव तथान्तरे ।
सूत्रं कृत्वा तथाऽल्पस्य.... [4]देव हि ॥५२॥

षोडश [5]वीथिभूभागं? सूत्राभ्यामन्तरा भ (?मृ) जेत् ।
ब्रह्मस्थानं तु सूत्रेण मत्स्यवल्लाञ्छयेत् ततः ॥५३॥

पातिताभ्यां तु सूत्राभ्यां वृत्ताभ्यां तु समासतः ।
उक्तषड्भागसूत्रेण मध्यभागद्वयस्य च ॥५४॥

---

[1] ख–पीठवेसूत्रस्य तु सूत्रेण
[2] ख–एकेनान्तर्गतं
[3] क–ग–घ–ततस्तु
[4] ख–ग–घ–द्वितप्तत्वं द्वि
[5] ख-विधि

[1](?दिग्) भागाभ्यां (?तु) मत्स्याभ्यां सं (?नि) रुद्धेन मद (?त) न्तुना? ।
लाञ्छयेदथ चन्द्रौ द्वौ दिक्सूत्रस्य तु संमुखौ ॥५५॥

शृणुष्व पीठवृत्ताभ्यां [2]यथैकैकं लयं व्रजेत् ।
एकं वै मत्यचिह्नाभ्यां श्रृङ्गमेति लयं तथा ॥५६॥

प्रागास्फालितसूत्राभ्यां [3](चान्द्रे या) परिधे (?धेर्द्वि) द्विज ।
मीलनं विधिना येन जायते लाञ्छयेत् तथा ॥५७॥

आ........मध्यस्थितं मध्यमर्धचन्द्रं तु लाञ्च (?च्छ) येत् ।
विधिना येन तद्वच्चिम गोत्र [4](?गात्र सूत्रप्र) सिद्धये ॥५८॥

समीप (?पे) स्पष्टसूत्राभ्यां ममत्पु........विवर्जयेत् ।
पीठं वैपुल्यमानं तु तत्र सूत्रं निरुध्य च ॥५९।

प्राक् प्रमा (? पत्राग्र) मध्ये तु लाञ्छयेत् पादसंमुखम् ।
गात्रकं विधिना येन पार्श्वयोरुभयोर्भवेत् ॥६०॥

विततादन्तरहितं व्यालवक्त्रं यथा द्विज ।
[5]भूता [?भुजा) भ्यां गात्रकाभ्यां तु मध्यं यच्चरणं ततः ॥६१॥

---

[1] ख–मत्तो ग–घ–पत्तो

[2] ख–वृत्ताभ्यां तु समासतः

[3] ख–(   )अक्षराणि

[4] ख–गोत्रकेशस   ग–घ–गोत्रकेडश

[5] ख–भूभाग

एतत् (?तं) पीठविधिं विद्धि त्वथ द्वारकृति श्रृणु।
[1]द्वारादिष्वतिवृत्तस्य दिक्सूत्रस्य तु सङ्गमे ॥६२॥

हृत्वा सूत्रं समावृत्ते पार्श्वद्वारं तु लाञ्छयेत्।
द्वाराण्यभ्यं (? णां यत्) तु वैपुल्यं दीर्घेणेव तु तन्तुना ॥६३॥

[2] तत (स्त्वल्पाभ्य लाभं तु) सूत्रं कृत्वा प्रसार्य च।
द्वारान्तर्गतवृत्तस्य दिक् [3]ततो (?तन्तो वृं) वृत्तसङ्गमम् ॥६४॥

एतमास्फाल्य सूत्रेण श्रृक्रा (?ला) द्ग्रिद्वारसिद्धये।
द्वारक्षेत्रान्तरस्थं तु दिक्सूत्रस्य द्विजोत्तम ॥६५॥

संविभज्य चतु [4](र्धानात्? व्यक्तैः) चिह्ना (ह्नै) स्तु लाञ्छयेत्।
द्वे चिह्ने तद्बहिस्त्यक्त्वा कृतसूत्रस्तृतीयके ॥६६॥

तद्द्वारान्तरवृत्तस्य समीपं च नयेत्ततः।
लाञ्छयेच्छशिवद्वृत्तं (? ततः सूत्र) गत (?तं) द्विज ॥६७॥

प्रागास्फालितसूत्राभ्यां मीलनीयं प्रयत्नतः।
तेनैव कुसुभान्तेन भूयसे.......लाञ्छयेत् ॥६८॥

श्रृङ्गादयस्तत्सूत्रस्य संस्थितो (? तोन्न) ततन्तुना।
यथा द्विजार्धचन्द्राभ्यां श्रृङ्गयोर्मीलनं भवेत् ॥६९॥

---

[1] क-ग-घ-द्वार....वृत्तस्य
[2] ग-घ-ततस्तल्वाभ्यलाभ्यं तु
[3] क-ग-घ-ततोपत्र
[4] ग-घ-(   ) पाठः

अथा? तथैव सूत्रस्य द्वारबाह्या? (?त्) भ्रमस्य च।
कृत्वा सिद्धिगतं सूत्रं शशिशृङ्गावधिं नयेत् ॥७०॥

तस्य स्थानात् तदानीय लक्ष्यमाणं तु मत्स्यवत्।
बाह्यवृत्तावधिं यावद्द्वारस्याद्य (?स्य) तु सत्तम ॥७१॥

सदृशं कम्बुवक्त्रस्य द्वाराभ्यामन्तरं तु यत्।
ज्ञेयं तत्कोणभूभागं चतुर्धा वृत्तमण्डले ॥७२॥

तत्र विन्यस्य वा लिख्यं समांशं च चतुष्टयम्।
एवं तु मध्यमं वृत्तं मध्ये निष्पाद्य मण्डलम् ॥७३॥

तदाकारांश्च बाह्ये तु वृत्ते कुर्याच्च मण्डले।
कीर्तितेन विधानेन विशेषमथ मे शृणु ॥७४॥

तेषामंशद्वयेनाब्जं पीठादिद्वितयेन तु।
संमुखं मध्यदेशस्य सूत्रं सूत्रं तु मध्यतः ॥७५॥

प्राग्दत्तं यत् स्थितं तेषां तद्दृष्ट्वा ह्यपरं व्रजेत्।
मध्यसूत्रं तु वृत्तानां चतुर्धा येन भान्ति ते ॥७६॥

गात्रकाणि तु तैः सूत्रैर्द्वाराण्यालिख्य पूर्ववत्।
मध्यं मण्डलरभ्रस्य बहिष्ठानां तु पौष्कर ॥७७॥

मण्डलानां सपद्मानामसत्वं (?क्तं) सर्वदा भवेत्।
व्यूहानां लिख्यमानानां बहिः [1]स्यान्मध्यमण्डलम् ॥७८॥

---

[1] क-ग-घ—न्मध्यकुण्डलम्

एतत् समण्डलानां च व्यूहानां लक्षणं मया।
कथितं केवलाब्जानां विशेषमधुनोच्यते ॥७९।

एतस्मात्-क्षेत्रमानं तु [1] मानतो व्यूह्य कल्पयेत्।
सर्वेषां चापमानीय बाह्यमण्डलकैर्विना ॥८०॥

किन्तु तत् सप्तधा कुर्यात् प्राग्वद् द्वादशधाकृतिम् (?ति)
क्षेत्रं कजानां वीथीनां पूर्ववद्भागकल्पना ॥८१॥

व्यूहक्षेत्रं तु सकलादष्टमांशेन बाह्यतः।
त्र्यश्रादीनां पुराणां तु विस्तारं परिकल्पयेत् ॥८२॥

शोभोपशोभकोणं च द्वाराणां साधनाय च।
सपुरस्याथवा विप्र [2]त्वद्य व्यूहस्य जायते ॥८३॥

चतुर्दशकरं क्षेत्रं मानं वै षड्भिरङ्गुलैः।
[3]त्रिशद्रस्तं तथा व्यूहं तस्य.... (?विस्तरं तस्य) [4]भावयेत् ॥८४॥

भुवनस्य त्रिकोणस्य त्वेतन्मानं तु मध्यतः।
दिक्त्रयोस्त्यु (? यस्यो) पपद्येत कोणेभ्यश्चातिरिच्यते ॥८५॥

तस्माद् द्वे (? द्वै) दिक्प्रधानत्वं मण्डलेऽस्मिन् न चाग्निषु।
अथास्यैव द्विजश्रेष्ठ वच्मि ते साधनं शृणु ॥८६॥

---

1 क–मानं मा........तः व्यूह
2 ख–प्रत्यद्यू?
3 क–ख.......तथा
4 ख-विस्तरं तु ग-घ–विस्तातु

यथोक्तमानविस्तीर्णं साध्यमानं तु सिध्यति।
व्यूहक्षेत्रात्तु वै वृत्तात् साध्याद् द्विगुणविस्तृतम् ॥८७॥

चतुरश्रं तु तद्वाह्ये पुरं कृत्वा तु पूर्ववत्।
त्रिकोणपूर्वसिद्ध्यर्थं मार्गसिद्धेन तेन तत् ॥८८॥

क्षेत्रार्थं तु तदा मध्ये सूत्रं तत्क्षेत्रसंमितम्।
कृत्वा तत्पार्श्वसूत्राभ्यां संरुद्धमथ पातयेत् ॥८९॥

सूत्रद्वयं ततः पश्चात् तृतीयं तु विनिक्षिपेत्।
प्रागास्फालितसूत्राभ्यां वर्जयित्वा तथान्तरम् ॥९०॥

बाह्यतो वृत्तपरीधेस्त्रिकोणं व्यज्यते स्फुटम्।
अनेन क्रमयोगेन स्पृशेत्तद्वर्तुलं [1]पुनः ॥९१॥

अभ्यन्तरे त्रिकोणस्य सूत्राणां त्रितये (? यं) क्षिपेत्।
त्रिगुणस्य तु वृत्तस्य त्वष्टमांशयुतस्य च ॥९२॥

[2]यदैव्यन्त (? यद्वैतस्य) प्रमाणं स्यात् कोणात् कोणेषु पौष्कर।
अथ वै मध्यतो दिक्षु कोणयोरन्तरं द्विज ॥९३॥

द्वारादीनां प्रमाणं च साधनं चावधारय।
मध्यस्य संमुखं दद्यात् सूत्रं सूत्रं दिगन्तरे ॥९४॥

---

[1] ख–स्फुटम्

[2] ग–घ–यदैप्यं तत्

द्विगुणेन कृतेना? ये (?थ) लाञ्छयेद् द्विगुणेन वा।
एकैकं मध्यसूत्रस्य पक्षबाह्यात् तथान्तरात् ॥९५॥

ताभ्यामभ्यन्तरं कुर्यादष्टकाया? द्विरष्टधा।
मध्यसूत्रं तु सारेण तत्र सूत्राणि पातयेत् ॥९६॥

एवं तिर्यग्गतं सूत्रं [1]तद्विधः करणे (?क्षिपेत्)।
एवं षोडशकोष्ठानि भवन्ति द्विगुणानि च ॥९७॥

एकैकस्य दिशि ब्रह्मन् द्वारा (?द्) द्वारात्तु पूर्ववत्।
कण्ठोपकण्ठसिद्ध्यर्थं षट्कं षद्कं तु शोधयेत् ॥९८॥

शेषैः शोभोपशोभानि भागैर्द्वारानुसारतः।
द्वारं शोभाद्वयोपेतं भागैर्द्वादशभिर्भवेत् ॥९९॥

एकैकम[2]वशेषं यत् तत्कोणा[3]भ्यां वधं नयेत्।
उपशोभद्वयं चैव शोभानां तु चतुष्टयम् ॥१००॥

द्वात्रिंशदंशकैर्विद्धि प्राग्वद्भागौ तु कोणगौ।
द्वौ द्वौ शोभापशोभौ वा कृत्वान्यच्चांशपञ्चकम् ॥१०१॥

निक्षिपेत् कोणमन्त्रौ (?सूत्रौ) तु द्वात्रिंशद्भिस्तु कोष्ठकैः।
अनेन विधिना कुर्यात् त्रिकोणं (?ण) भुवनं बहिः ॥१०२॥

---

[1] क–ग–घ–तत् क्षिपेत् करुणे क्षिपेत्

[2] ख–शेषं तत्

[3] क–ख–भ्यां……नयेत्

प्रणीतमानव्यूहानां निष्पन्नानां च पौष्कर।
निष्पन्नस्य तु वै यस्य लिख्यन्ते कमलादयः ॥१०३॥

तन्मध्यभूप्रमाणेन तस्य लक्षणमुच्यते।
चतुरश्रात् त्रिसूत्रं तु त्रिकोणं साध्य पूर्ववत् ॥१०४॥

ततः कोणाद् ग्रहं सूत्रं कृत्वादी (?दौ) मध्यमानयेत्।
द्वे सूत्रे तेन सूत्रेण पक्षोपरि हि लाञ्छयेत् ॥१०५॥

शेष (? षे) कोणद्वयं कुर्यात् तद्वद्द्वे द्वे तु पक्षगे।
सूत्रे सञ्चिह्न (?संत्रि) येत्तावद् यावत् कोणोपगं द्विज ॥१०६॥

द्वारादीनां प्रमाणं च साधनं ह्यवधारय।
प्रधानं मन्त्रमूर्तीनां सार्धमेकशतं तु यत् ॥१०७॥

ऊनमूर्तिद्वयेनैव पुरा ते प्रकटीकृतम्।
[1]भोगमोक्षप्रसिद्ध्यर्थं भवेऽस्मिन् भविनां तु वै ॥१०८॥

मूर्तिसङ्घकृतादेव सप्तत्रिंशद्द्विसंख्यया।
आदिमूर्तिक्रमाद्यावत् [2]समर्च्यन्ते च मूर्तयः ॥१०९॥

अब्दायनऋतूनां च मासानां च पृथक् पृथक्।
पक्षाणां च दिनानां च क्रमात् ते पतयः स्मृताः ॥११०॥

आदावब्दपतिः प्रोक्तस्ते चन्येऽयननायके (?काः)
ऋत्विजा (?जः) षट् समाख्यातं (?ता) मासाधिपतयस्तथा ॥१११॥

---

[1] ख–भोगरक्षा

[2] ख–समुच्यन्ते च

द्वादश क्रमशो ब्रह्मन् मेरोः (?रुः) पक्षपतिः स्मृतः? ।
[1]तृचा (? तृजस्तृचस्तु) संख्याता दिनेशत्वेन मूर्तयः ॥११२॥

यस्मिन् यदा यदा यागं हेतुना येन केन चित् ।
एकाब्जं बहुपद्मं वा चक्राब्जाब्जमथापि वा ॥११३॥

घतितो (?ताः) पीठबाह्ये तु ऊर्ध्वतो गुरुसन्तते (?तेः)
इष्टा (?ष्ट्वा) चाब्देश्वरं पूर्वमयनेशमनन्तरम् ॥११४॥

यदिदं मासषट्कं तु दक्षिणं वा द्विजोत्तम ।
तत्कालीयं च ऋत्वीशं तां (?तं) मासेशक्रमान् (?द्) यजेत् ॥११५॥

मासान्यं पक्षनाथं यत् पूजनीयमनन्तरम् ।
संवत्सरीयपक्षाणामेकमेव द्विजोत्तम ॥११६॥

[2]स्वं स्वं दिनेशं संपूज्य पक्षनाथादनन्तरम् ।
प्रत्यहं पृथुकाद्यैश्च वह्निसन्तर्पणेन च ॥११७॥

निवारयति मूर्तीशं (?शः) पूजाकालेऽप्यपूजितः? ।
यस्य वै मूर्तिसर्वं (?र्वं) स्य? विषयोऽयं मयोदितः ॥११८॥

चतुर्मूर्त्यादितस्तेन कल्पयेद्व्यूहकल्पनाम् ।
यावत् सप्तदशस्तस्मात् क्रमेण परिसंख्यया ॥११९॥

---

1 क-ग-घ-तृचा………श्च ख-तृचास्तुतं च

2 क-ग-घ-स्वस्या

तस्मिन् यस्याधिपत्येन तदाद्या (?द्यो) मूर्तिमन्त्रराट्।
दलानां क्रमशश्चान्ये (?न्यान) मूर्तये विनिवेश्य च ॥१२०॥

यथा तदभिधास्यामि समासात्तन्निबोधतु।
चतुर्व्यूहे चतुःपद्मे चतुर्मूर्ते द्वि (?द्वि) जोत्तम ॥१२१॥

विन्यासं कीर्तयिष्यामि सर्वेषां व्यापकं तु यत्।
मध्यपद्मे चतुःपत्रे व्यूहेशं कर्णिकान्तरे ॥१२२॥

पूर्वदक्षिण आप्ये तत्तत्पत्रेषु क्रमान्न्यसेत्।
मूर्तयश्चैव चत्वारः षडङ्गपरिभूषिताः ॥१२३॥

प्रदक्षिणक्रमेणा? हि(?पि) पूर्वपद्मादितः क्रमात्।
मध्याम्बुरुहपत्रस्था मूर्तयो विनिवेश्य च ॥१२४॥

प्राङ्मूर्तिः कर्णिकामध्ये [1]द्वितीयवलयेषु च।
पूर्वनैर्ऋतवायव्यदिग्भागावस्थितेष्वथ ॥१२५॥

तत्रैवापरपद्मे तु कर्णिकामध्यतो न्यसेत्।
मन्त्रमूर्तिर्द्वितीया वै द्वौ द्वौ पूर्वदलान्तरे ॥१२६॥

नैर्ऋतानिलपत्राभ्यां क्रमान्मूर्तिद्वयं तु तत्।
ततस्तृतीयपद्मे तु तृतीयं कर्णिकान्तरे ॥१२७॥

द्वितीया प्रथमा मूर्तिश्चतुर्थी पत्रमध्यतः।
न्यस्याश्चामरमूर्त्यादिमूर्तयः कमलेषु च ॥१२८॥

---

[1] क–ग–ग–द्वितीयाद्यालयेषु

विन्यासश्च पुनः कार्या (?र्यः) सत्यमूर्त्यादि ते (?तो)ऽब्जज
मध्यपद्मं विनाऽन्येषां पद्मानां तु समूर्तिषु ॥१२९॥

येन स्यादन्तमूर्तेर्वै प्राधान्यं कमलोद्भव।
सर्वेषां कर्णिकामध्ये निष्ठामूर्तिर्नि (?र्तिं नि) वेश्य च ॥१३०॥

एवं मूर्तिचतुष्कं तु [1]न्यस्येत् तत्पङ्कजत्रये।
पुरा वर्तितयोगेन दलानां पूरणार्थतः ॥१३१॥

व्यूहनाथद्वितीयं यद् यत्तेषामूर्ध्वगं न्यसेत्।
स्वस्य येन द्वि (?नापि) विधिना? यजेन्मूर्तिगणं ततः ॥१३२॥

अथोर्ध्वव्यूहसङ्घं यत् पद्मपद्मादिसंस्थितम्।
अनेनैव प्रयोगेण तस्मान्न्यासं समाचरेत् ॥१३३॥

पद्मानां पद्मपत्राणां प्रादक्षिण्यक्रमेण तु।
बहिः स्थव्यूहपद्मानां यदा वै कर्णिकान्तरे ॥१३४॥

न्यास एष द्वितीयादिमूर्तीनां कमलोद्भव।
आदिमूर्ति (?र्तें) स्तदुद्देशविधिः सर्वत्र पूर्ववत् ॥१३५॥

मूर्तिन्यासं द्वितीयं यत् (?यं) तत् (?तं) प्राग्वत् परिकल्पयेत्।
सर्वेषां व्यूहयागानामेष एवमिति (?विधिः) स्मृतः ॥१३६॥

---

[1] ग–घ–सैन्यत्

प्रधानमन्त्रभूतस्य न्यासार्थं कमलोद्भव ।
व्यूहेशं पञ्चविंशो (?शे) यत् प्राग्वद्व्यूहे त्रयोदशे ॥१३७॥

अन्तर्बहिस्थपद्मानां बाह्याब्जा (?ब्जे) विशस्तो (?व्य.) न्तिमे ।
यथाऽस्मिन् व्यूहनिचये सहस्रपरिसंख्यया ॥१३८॥

मन्त्रसङ्घापसव्यं च न्यसमीषं क्रमेण तु ।
व्यूहादाद्यात् समारभ्य यावदन्तं निबोधतु ॥१३९॥

मध्यं व्यूहेश्वरं प्राग्वत् ततो मन्त्रचतुष्टयम् ।
न्यस्य पत्रचतुष्के तु पश्चात् प्राग्बाह्यपङ्क्तिजे ॥१४०॥

व्यूहेशं कर्णिकामध्ये तत्रान्यस्मिन् द्वये तथा ।
पूर्वपत्रात् समारभ्य यावत्पत्रं तु वायवम् ॥१४१॥

विन्यस्य पञ्चमं मन्त्रं क्रमात् षष्ठं तु सप्तकम् ।
अथ नैर्ऋतदिक्पद्मे तद्वत् पद्मक्रमेण तु ॥१४२॥

अष्टमं नवमं न्यस्य दशमं [1]दशमन्त्रराट् ।
वायव्याशां गते पद्मे पात्राणां विनिवेश्य च ॥१४३॥

यदेकादशकं मन्त्रं द्वादशाख्यं त्रयोदशम् ।
आद्ये व्यूह (?हे) चतुष्पद्मे न्यस्य मन्त्रा (?न्त्रां) स्त्रयोदश ॥१४४॥

पञ्चपद्मे द्वितीयोऽथ मन्त्रन्यासं वदामि ते ।
गर्भस्थे पञ्चपद्मे वै व्यूहेशं कर्णिकोपरि ॥१४५॥

---

[1] ख–दशमन्दिरात्

पूर्वपत्रात् समारभ्य [1]तस्मिन् वै मन्त्रपञ्चकम् ।
मन्त्राच्चतुर्दशादादौ यावदष्टादशं क्रमात् ॥१४६॥

[2]तद्बाह्यस्थितपद्मानां चतुर्णामथ वक्ष्यते ।
पूर्वपद्मं समारभ्य [3]यावदुत्तरपङ्कजम् ॥१४७॥

मध्ये व्यूहेश्वरं न्यस्य मन्त्रषोडशशक्तितः ।
चतुर्व्यूहक्रमेणैव दलानां विनिवेश्य च ॥१४८॥

न्यूनविंशतिमाद्यावच्चतुस्त्रिंशच्च मन्त्रराट् ।
एवमेव क्रमेणैव व्यूहानां पत्रसन्ततिम् ॥१४९॥

मध्यपद्मात् समारभ्य पूर्य मन्त्रगणेन च ।
यावद्दशाम्बुजं व्यूहमाद्यव्यूहत्रयोदश? ॥१५०॥

यावती पत्रसंख्या स्याद्व्यूहानां कमलोद्भव ।
तावन्ती (?न्ती) मात्र (?मन्त्र) संख्या (ख्यां) वै तेषु तेषु च
विन्यसेत् ॥१५१॥

सह व्यूहेश्वरो यावन्मन्त्रैः षट्पञ्चभिर्विना ।
सहस्रकं तु मन्त्राणां ब्रह्मन् परिसमाप्यते । ॥१५२॥

त्रयोदशानां व्यूहानां विन्यसेदधिकं तु यत् ।
तावत्तु दशमे व्यूहे न्यसेदेकादशाम्बुजे ॥१५३॥

---

[1] ख–तस्मिन्यन्मन्त्रं
[2] ख–बाह्यतः
[3] ख–पूर्वादुत्तर

मध्यपद्मात् समारभ्य सर्वेषां कर्णिकान्तरे।
मध्याम्बुजे तु पत्राणा [1]मग...तत्त्रिधा न्यसेत् ॥१५४॥

पूर्वपत्रात् समारभ्य पुनरन्तर्दलक्रमम्।
एवमेव बहिष्ठानां स्वमन्त्राच्च पृथक् पृथक् ॥१५५॥

तृतीया तु परावर्त्य द्रा (?दलाग्रान्) कर्णिकान्तरे।
प्राग्वत् सर्वदलाग्राणामस्त्रमन्त्रं निवेश्य च ॥१५६॥

यथा भागेऽग्रमूर्तीनां विधानं स (?य) न्मयोदितम्।
सहस्रमूर्तिविन्यासं व्यूहानां तु भवेत्तदा ॥१५७॥

न कर्णिकागतं मन्त्रं दलमध्ये नियोजयेत्।
[2]तद्द (?तस्थं) न्यसेन्मध्ये प्राग्वत् संचारयोगतः ॥१५८॥

किन्तु व्यूहेश्वरं प्राग्वन्न्यस्य मन्त्रगतं ततः।
विनिवेश्य (?शं) दलानां च यथा ते कथितं मया ॥१५९॥

एकरूपमिदं न्यासं सह तस्य प्रकीर्तितम्।
द्विधावृत्तं न कर्तव्यं मूर्तिवद्द्विजसत्तम ॥१६०॥

इच्छायां तेन विधिना मन्त्रसंख्यां प्रकल्प्य च।
अभीष्ट (?दो) आ (?द्या) त्मपूज्यो व्यूहयागे
त्वभीप्सिता (?तः) ॥१६१॥

---

[1] ख-मगद्यकं

[2] ख-तद्दलस्थममे मध्ये

अभीष्टफलसिद्ध्यर्थं भक्त्या परमया द्विज।
रुचिमूर्तिषु नि (?नी) त्येव कर्मणि स्थापनादिके ॥१६२॥

वत्सरे वत्सपर्यन्ते क्रमाधा (?दा) द्याश्च यस्य यत्।
[1]क्रमोज (?ज्झि) तो वह्वावस्था? त्विच्छासिद्धिव्यपेक्षया ॥१६३॥

प्रयायात् सोह्या[2]रूपा……त्वन्नास्य [3]परेद्यजेत्?।
साङ्गं वा यस्य मन्त्राध्वे ततपत्राष्टके? परा ॥१६४॥

शब्दभावस्वरूपा च षाड्गुण्यमहिमावृता।
पूर्णावसानमिष्ट्वेव कर्णिकाकेसरोर्ध्वगा ॥१६५॥

स्वरे चान्तस्वरूपां च सर्वगां ब्रह्मलक्षणाम्।
ततस्तु भागपञ्चस्थां मन्त्रमूर्ति (?र्तिं) ज्वल (?त) प्रभाम्? ॥१६६॥

संस्मरेत् कर्णिकोर्ध्वे तु साकारां भावयेत्ततः।
केसरेषु तदङ्गानि तैर्विना पूजयेत्ततः ॥१६७॥

शब्दमात्रेण [4]तत्त्वेन (?त्वाद्यात्) प्राग्वद्दलेषु च।
क्रम एवं त्रिमूर्तेर्वै कथितो मण्डलार्चने ॥१६८॥

त्रिमूर्तेरपि विप्रेन्द्र त्विच्छामूर्तिधरस्य च।
तत्रायं हि विशेषः स्यात् प्राग्ज (?द) ले कर्णिकोर्ध्वजा
(?गे) ।।१६९॥

---

[1] ख–क्रमावता
[2] ग–घ–रूपालैवं……न्नास्य
[3] ख–परे व्रजेत्
[4] ख–तत्रैव त्वाद्यात्

द्वितीया केसरोर्ध्वस्था तृतीया दलदेशगा।
सवस्तुपञ्जषट्सप्तपूर्वास्वभ्यर्चने तु वै ॥१७०॥

मूर्तिसंख्यासमं कुर्यात् पद्मस्य दलसञ्चयम्।
यजेद्दलेन मूर्ति तु (?प्रदक्षिणेन) वै क्रमात् ॥१७१॥

मध्ये च कार्या विधिवन्मध्यस्था तत्र तद्बहिः।
एवमग्नौ जलेऽप्यत्र हृदये कमलेक्षण ॥१७२॥

परापरविभागेन मन्त्रमूर्तिगणं महत् ॥
सामान्यपरिवारं च पूजितं शुभमिच्छति ॥१७३॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्कर संहितायां
व्यूहलक्षणो नाम
सप्तमोऽध्यायः

अथ अष्टमोऽध्याय

पौष्कर उवाच—

चक्राब्जे देवदेवेश न श्रुतं लक्षणं मया।
यत् त्वया पूर्वनिर्दिष्टं तदिदानीं वदस्व मे ॥१॥

श्री भगवानुवाच—

चक्राब्जं बहुधा [1]ख्यातमेतच्छतसहस्रकम्।
एकं त्वनेकधा यातं यथा तन्मे निबोधतु ॥२॥

[2]यमोचकाराश्शतशो (? यागाकाराश्शतशो) द्विरात्मादौ तु देवता
यातास्स (?गाः स) न्ति भविष्यन्ति येषां संख्या न विद्यते ॥३॥

मोक्ष [3]मार्गाः प्रवर्तन्ते लोकानां हितकाम्यया।
सन्तारयति (? न्ति) भूतानि ते घोराद्भवसागरात् ॥४॥

भक्तानामाश्रितानां च तथा शु (?सि) द्धावलम्बिनाम्।
कुर्वन्त्यनुग्रहं चैव नित्यं सन्मार्गसेविनाम् ॥५॥

ममांशाःशक्तिरूपास्ते षाड्गुण्यविभवान्विताः।
हितास्तेषु प्रपन्नास्ते पूजयन्ति जयन्ति च ॥६॥

---

[1] क–ग–घ–ख्यातमेतैश्शत

[2] ख–यामोचकारा······द्विरात्मातो तु

[3] क–ग–घ–मार्गात्

स्तुवन्नुच्चैर्नमन् ध्यायन् सततं संस्मरन्ति च।
ते पद्मोदरचक्रेषु पूजिताभिमतप्रदाः ॥७॥

हेतुनाऽनेन विप्रेन्द्र त्वस्माच्चक्रवरादहम्।
[1]सर्वाधाराच्च (?च्चा) विकारात् प्रलीनाराच्च कारणात् ॥८॥

सहस्ररविसंकाशात् तद्बिम्बवरवर्तुलात्।
अष्टवायदचां (?पत्रकजा) नि (न्नि) स्यात् साक्षा[2]दवयवो
ज्झितात् ॥९।

द्वार (?द्व्यरे) कादीनि चक्राणि स्वेच्छया संसृजामि च।
यत्रस्थाः संप्रपूज्यन्ते भक्तैश्च व्यूहकादयः ॥१०॥

त्रिऽध्येका (?क) नाभिसंसक्तास्तद्वन्नेमिविभूषिताः।
प्रधिभिश्चावृतास्सर्वे प्रतिभिश्चाक्षशोभिता (?ताः) ॥११॥

नानारूपाणि च मया क्रमाद्यान्युदितानि च।
चक्रमाद्यं पुरस्कृत्य सर्वेषां साधनं शृणु ॥१२॥

वक्ष्ये नवविधं विप्र भेदं चैवोत्तमादयः (? द्विकम्)
रूपभेदं समासेन मानवृद्धिं तथैव च ॥१३॥

सूत्रपातविधिं चैव ततश्चैवांशकल्म (?ल्प) नाम्।
संसाधनमराणां च रजसा पूरणं ततः ॥१४॥

---

[1] क–ग–घ–सर्वधाराच्च

[2] क–ग–घ–दवयवो···ता

चक्रावयवदैवत्यं तथा निर्वचनं द्विज ।
अक्षादौ नेमि? विन्यस्य (?तो न्यासं) पूजनं देवतास्वपि ॥१५॥

चक्रं पूजाफलं चैव सर्वमेतन्निबोध मे ।
[1]यस्त्विदं चरणं चक्रं मार्या (?र्ज्या) रमभिपूजने ॥१६॥

साम्प्रतं संम्प्रवक्ष्यामि यथा तल्लिख्यते द्विज ।
भद्रादीनां हि सर्व्वेषां मण्डलानां समासतः ॥१७॥

मध्यभूमौ ततस्सर्वं ससरोजं समुज्ज्वलम् ।
क्षेत्राभ्यां द्वादशांशं तु त्वागा (त्यागात्) [2]पीठोपगं सदा ॥१८॥

भ्रामितं व्योमवृत्तं तद्बहिश्चक्रसरोरुहात् ।
व्योमवृत्तान्तरे तद्वद् द्वितीयं भागमुत्सृजेत् ॥१९॥

ततःसंविभजेच्छेषं पद्मं वै चक्रपङ्कजम् ।
केवलानां च पद्मानामाख्यातं लक्षणं मया ॥२०॥

प्रोक्तं संसक्तपत्राणां त्रिदलादौ समासतः ।
तथाऽसंसक्तपत्राणां यथा वै कमलोद्भव ॥२१॥

सचक्राणामथो वच्मि लक्षणं लक्ष्मिवर्द्धनम् ।
विभज्य पञ्चधा क्षेत्रं यदुक्तं प्राङ्मया तव ॥२२॥

---

1 क…………………श्चरणं

2 ख–पीठोपसङ्गताः

भ्रामक्रमेण विधिवद्विभागेनाक्षमक्षयम्।
चक्रभ्रमद्वयेनाथ (?रान्) भागैकं चक्रभूमिका ॥२३॥

एवं च विविधं भङ्क्त्वा भ्राम्य वृत्तं भयं ततः।
सितादि [1]रत्नजेनैव धातुजेनाथवा द्विज ॥२४॥

[2](पवित्रेणोज्ज्वलेनैव धातुजेनाथवा द्विज।)
पवित्रेणोज्ज्वलेनैव रजसा पूरयेत्ततः ॥२५॥

अक्षक्षेत्रे लिखेत् पद्मं सम्यगुच्छ्रितकर्णिकम्।
सुशुध्दं कर्णिकाबीज स्फटिकामलसन्निभम ॥२६॥

श्यामं बीजान्तरं कुर्यात् कर्णिका (?कां) कनकप्रभ (?भा) म्।
प्रशान्तपावकाकारं कुर्यात् केसरसन्ततिम् ॥२७॥

पद्मपत्रसमूहं तु सुसितं च सितादि (? धि) कम्।
इन्द्रनीलनिभं कुर्यात् पङ्कजेऽस्मिन् दलान्तरे (?रम्) ॥२८॥

सितेन चक्रवृत्तेन (?त्तानि) सर्वाणि परिरञ्जयेत्।
अयस्कान्तसमानेन राजोपल[3]निभेन वा ॥२९॥

रजसा पूरयेच्चक्रं समन्तात् सुशुभेन च।
दर्पणोदरवद्विप्र तीक्ष्णाग्रं भ्राजयेत्तथा ॥३०॥

---

[1] क-ग-घ-रक्तजेनैव

[2] इदमर्धं सर्वत्राप्यास्त

[3] ख-निभेन च

रञ्जयेच्चक्रभूमिं च रविरश्मिचयोपम (? मा) म्।
रोचनाभेन रजसा पद्मरागनिभेन च ॥३१॥

[1]पीन (?त) पिष्टोपमेनाथ हुतभुक्सदृशेन वा।
पूरयित्वा तु पीतेन रश्मिपुञ्जं समालिखेत् ॥३२॥

चक्रभूमौ तु विप्रेन्द्र या पूर्वं परिकल्पयेत्।
ज्ञात्वा तु मण्डलं चैव पूर्ववत् परिरञ्जयेत् ॥३३॥

इति ते वर्तुलः(?लं) [2]शुभ्र(?भं)चक्रधाम मम प्रियात् (?प्रियम्)।
पद्मगर्भाभिधानं च विधिवत् कथितं मया ॥३४॥

वासुदेवाभिधानेन [3]मद्रूपः शब्दविग्रहः।
अस्मिन् मध्येऽष्टपत्राब्जे पूज्ये चैकोपरोपरि (?ज्यश्चैवारकोपरि) ॥३५॥

भक्त्या जन (?र्चनं) त्रिधामो (?म्नो) वा त्रिधामोपरि सत्त्वभाक्
पूर्ववच्चाङ्गषट्कं तु न्यसेत् पद्मदलान्तरे ॥३६॥

ममापरं च यद्रूपं पौरुषं हि यदब्जज।
तं (?तच्च) चक्रोपरि संपूज्य स्वनाम्ना प्रणवादिना ॥३७॥

नमस्कारान्तयुक्तेन कर्मणा मनसा गिरा।
पूजनं (स) परिवारं च (?र स्म) विज्ञातव्यं हि पूर्ववत् ॥३८॥

---

[1] ख–पीन चीनेति स्यात् किम्

[2] क-ग–घ–चक्रयाच

[3] क-ग–घ–मरुचश्शद्ब

पञ्चयागप्रणीतं च [1]कर्माधारादिपूजनम् ।
इति तं (?ते) पूर्वचक्राब्जं यथावत् समुदाहृतम् ॥३९॥

ब्रह्मेन्द्ररुद्रदेवानामस्य रश्मिचयश्च यः ।
[2]आपा (?अप) [?हृल्लोचनानां] वै सुदूराच्च निरीक्षणात् ॥४०॥

तेन चक्रं तु विख्यातं नाम्ना दुर्दर्शनं द्विज ।
प्रणतानां च भक्तानां यस्माच्च सुलभं सदा ॥४१॥

ददाति दर्शनं तेषां स्मृतं तस्मात् सुदर्शनम् ।
आसप्तमात्तु पातालात् सत्यान्तं यावदेव हि ॥४२॥

धारयत्येष वीर्यात्मा सृष्टि[3]संहारकृत् सदा
संसारश्च [4]भ्रमत्यस्मिन् सदेवासुरमानुषैः ॥४३॥

भ्रामयत्यपि सर्वेषां नित्यं ह्यविदितात्मनाम् ।
संसारचक्रं तेनेदं वदन्ति विबुधादयः ॥४४॥

कालेन संहरत्येषां (?तत) मयोद्दिष्टेन तेजसा ।
सर्वं कल्पावसाने वै भूतसङ्घं द्विजोत्तम ॥४५॥

---

[1] क-ग-घ-कर्मधारादि

[2] ग-घ-आपभूल्लोहितानां लोपितानां

[3] क-ग-घ-संहारकस्सदा

[4] क-ग-घ-भ्रमं तस्मिन्

[1]क्रमाच्चक्राब्जधारां (?ं) वैकला (?काल) चक्रं [2]चतश्शृति
(? तच्छ्रुतम्)।
इत्येतत् कारणं चक्रमव्याकृतमनुस्मृतम् ॥४६॥

सविकाराणि कार्याणि द्वार (?द्व्यर) कादीन्यतश्शृणु।
चक्रस्यानेकरूपाणि नानासिद्धिप्रदानि च ॥४७॥

इदं क्वचित्क्रमं चक्रं [3]वोयातं (?व्याख्यातं) बहुधा द्विज।
[4]अस्य भेदस्तु प्रथमो ह्यरकस्समुदाहृतः ॥४८॥

तथैव त्र्यरकस्त्वन्यो भेदः पश्चात् सुकीर्तितः।
अन्यं (?द्) द्विद्विगुणा (?णां) का रं पञ्चारं षडरं तथा ॥४९॥

सप्तारमथवाऽष्टारं नवारं च दशारकम्।
अस्य चक्रद्वयस्यान्तर्यानि चक्राणि सन्ति वै ।५०॥

तानि चक्राणि पूज्यन्ते त्रैलोक्ये विबुधादिभिः।
चक्रत्रयं च सामान्यं ज्येष्ठमध्यकनिष्ठकम ॥५१॥

त्रिधागतमथैकैकं [5]यथा मे तन्निबोधतु।
भेदेन चक्रसंघं च प्रवदामि पृथक् पृथक् ॥५२॥

---

1 क–ग-घ–क्रमाकर्कंचधारं

2 ख–चक्रं च तत् शृतम्

3 क–वाधातं

4 क–ग–घ–अर्ध्यभेदस्तु प्रथमो ह्यरकास्समुदाहृताः

5 क–ग–घ–यथामेयं

प्रथमं चोत्तमं विद्धि चक्रं चक्रगणस्य च।
अन्यच्चोत्तममध्याख्यं चक्रं च समुदाहृतम् ॥५३॥

तथोत्तमकनीयं च तृतीयं परिकीर्तितम्।
[1]मध्यमोत्तमचक्रं तु तथा मध्यममध्यमम् ॥५४॥

[2]तथा मध्यकनीयो हि मध्यमत्रितयं त्विदम्।
तृतीयस्य [3]त्रिकं सम्यक् कनीयश्च करा (?चोत्तमं) स्मृतम् ॥५५॥

कनीयो मध्यमं ज्ञेयं कनीयस्य (?श्च) कनीयसा (?सः)।
[4]एकैकस्य च वक्ष्यामि ज्ञापकं शुभलक्षणम् ॥५६॥

त्रिनाभि चोत्तमं चक्रं त्रिनेमि द्विजसत्तम।
त्रिनाभिचक्रं द्विर्नेमि द्वितीयं तृतीयं शृणु ॥५७॥

ज्ञेयं त्रिनाभ्येकनेमिं तृतीयं (?त्रितयं) प्रथमं स्मृतम्।
द्विनाभिचक्रं कथितं युक्तं नेमित्रयेण च ॥५८॥

त्रिचक्रस्य [5]द्वितीयं (?य) स्यादित्यु (?स्याद्यु) क्तं द्वितयं
(? तृतीयं) शृणु।
द्विनाभिसंयुतं तच्च नेमी च (तत् द्विनेमि) परिकीर्तितम् ॥५९॥

---

[1] क-ग-घ-चक्रं तु चक्रमध्यं तु यज्ञे चक्रं तथाम्यहम्

[2] क-तथामध्यम''''तयञ्चितं ग-घ-नथा मध्यकनीयो हि''' कं

[3] क-त्रिकं सद्यकनीयं च करात् स्मृतम् चक्रराट् स्मृतम् इति स्यात्

[4] क-ग-घ-अनेकैकस्य

[5] ख-द्वयस्यादि इत्युक्त

अतो द्वि[1]नाभ्येकनेमि द्वितीयं [2]त्रितयाश्रि (?न्वि) तम् ।
तृतीयं च प्रवक्ष्यामि चक्रेण (? क्राणां) त्रितयं च यत् ॥६०॥

आद्यं स्मृतं चैकनाभि [3]वृत्त (?त्तं) नेमित्रयेण तु ।
ज्ञेयं द्विनेम्येकनाभिरूपं हि द्वित (?ती) तस्य च ॥६१॥

स्यादेकनाभ्येकनेमि तृतीयस्य तृतीयकम् ।
इति तच्चक्रनवकं व्यापकं कथितं मया ॥६२॥

[4]विभवेच्छानुरूपेण प्रमाणं परिकल्पयेत् ।
स्याद्विप्र षडरं याव[5]द्दिव्यं चक्रं सुलक्षणम् ॥६३॥

[6]त्रितयं त्रितयं वि (?वृ) द्धि अ (?द्धिम) ङ्गुलानां नयेत् क्रमात् ।
षट्त्रिशसंख्यया यावत् संख्या भवति चक्रात् ॥६४॥

[7]संवत्सराख्यचक्रस्य इत्येषाऽङ्गुलिकल्पना ।
भक्तानां [8]च (?चा) विभक्तानां सममानं प्रकल्पयेत् ॥६५॥

---

[1] क–भ्येकनाभि

[2] ख–त्रितयं त्विदं

[3] ख–वृत्तनाभि

[4] क–ग–घ–विभवैश्वानु

[5] क–ग–घ–द्विग्विचक्रं

[6] ख–तृतीयं

[7] क–ग–घ–सेवेत्साराख्य

[8] ख–चाविभक्ता

एकहस्तात् समारभ्य षडंशं वर्धयेत् क्रमात्।
सहस्त्रारविधिं यावदित्येषामंशकल्पना ॥६६॥

प्रोक्ता युगाख्यकल्पस्य (?स्या) सिद्धेः संपूजितस्य च।
समाङ्गुलोत्थितानां वै चक्राब्जानां तु सर्वदा ॥६७॥

पीठादिकल्पना कार्या बहिर्द्वारावसानिका।
सपादगात्रगार्थञ्च विंश वा (?वीधि च पीठं) वा परिकल्पयेत् ॥६८॥

तुर्याग्रं पञ्चरेखं च पादगात्रकवर्जितम्।
पुरं प्रकल्पयेद् यत्नात् पञ्चरङ्गोज्ज्वलं समम् ॥६९॥

प्राक् प्रसिद्धे (?द्धै) स्तु दिक्सूत्रैः पूर्वयाम्याप्यसौम्यगैः।
संसाध्य कण्ठनिचयं सूत्रैश्चैव बहिः स्थिरैः ॥७०॥

चक्रक्षेत्रार्द्धतो यावत् प्रमाणेन प्रकल्पयेत्।
प्रति (?धि) वारण रेखानां क्षेत्रपीठस्य तत्समम् ॥७१॥

[1]वीध्यर्थं द्विगुणं तस्माद्द्वाराणां वीधिसंमितम्।
षष्ठेन वाऽष्टमांशेन तत्र त्वेतानि कल्पयेत् ॥७२॥

[2]यून (?युत) या विप्रसामान्या (?न्य) युवत्या (?युक्त्या)
सविशेषया।
पीठभागं तथा सम्यक् कृत्वा सूत्राष्टकं क्षिपेत् ॥७३॥

---

1 क–ग–घ–विध्यर्थं···विधिसंमितं

2 ख–युतय विप्रसामान्य···सविशेशषतः

दिक्षु मध्यास्थितैर्भागै [1]र्गात्राण्यं (?ण्युङ) ग्रीन् विदिक्स्थितैः।
द्वारवैपुल्यमानं तु द्विधाकृत्य त्रिधाय (?च) तत् ॥७४॥

[२]समानेन विभागेन चतुरश्र (?श्रा) ङ्ग सिद्धयेत् (?ये)।
विभज्य सूत्रयेत् पश्चाद्द्वारशोभाश्रिसाधने ॥७५॥

इच्छयाऽऽलोक (?लेख) येद्बाह्य (?ह्यं) यथाशोभानुरूपतः।
सद्वाराणि सकोणानि सशोभान्यथतो रिव (?वा द्विज) ॥७६॥

उपशोभसमानानि सोपचारं त्रि (द्वाराश्रि) पूर्ववत्।
न ह्यप्राप्तिरसंख्यानामंशानां मार्जना (?नेऽ) श्रिषु ॥७७॥

कंठदेश्शो·····················क पदादिना।
क्रमेण सन्तु विप्रेन्द्र पुरुषाणां········ ॥७८॥

(?चक्राणां) साधना ह्येषां सविशेषोऽथ वक्ष्यते।
यागमेकं तु सूत्राणां तुर्याश्रीकृत्य बाह्यतः ॥७९॥

रुचिमण्डलकह्लारक्षेत्रवत् तस्य कल्पनम्।
कृत्वाऽथ सर्वदिक् तस्य तत्समैर्वभजैः (?विभजेत्) पदैः ॥८०॥

वीत (?पीठ) भागप्रमाणेन················।
तस्यैवाब्जकल्पा (?ल्पो) वै मण्डलस्य तु विस्तरः ॥८१॥

---

1 ग–घ–गात्राण्यस्त्रन्विदिक्

2 ख–समभागेन चतुरा शृङ्गभागं सुसिद्धयेत्

…………'कृत्वांशं (?श) गणतां (?नां) पुरा ।
चतुरश्रं पुरा ब्रह्मंस्त्वे (?ह्मन् त्वे) कसूत्रं बहिः क्षिपेत् ॥८२॥

सूत्रेण चापभेदेन पाद (?त) यित्वाऽङ्क्य पूर्ववत् ।
नानाविधेन रूपेण पीठादीन् परिलोपयेत् ॥८३॥

[1]व्योमवृत्तसमं भागं नेमिवृत्तात् त्यजेत् पुनः ।
एवं हि व्योमवृत्तादौ भक्त (?क्तं) भ्राम्य प्रमाणतः ॥८४॥

यदा यच्च लिखेच्चक्रं याव (द्भि) ररकैर्युतम् ।
नद्यादौ पूर्वदिग्भागे…………… ॥८५॥

एवं चक्रारविन्दानां प्रमाणं कथितं मया ।
सुसाधनमथो वक्ष्ये साधकानां हिताय वै ॥८६॥

चक्रक्षेत्रात् षडंशेन नेमिक्षेत्रं प्रकल्पयेत् ।
…………… ॥८७॥

नद्यादौ पूर्वदिग्भागे स (?सं) साध्ये (?ध्यं) मरक (?कं) द्विज ।
क्षेत्रद्वारसमं भङ्क्त्वा व्यक्तं चैत्राङ्कयेत्ततः ॥८८॥

---

[1] क–ग–घ–'नानाविधेन परिलोपयेत्' इत्यनन्तरं "एवं चक्रारविन्दानां" "संसाधनमथो वक्ष्ये" "चक्रक्षेत्रात्" इत्यर्धत्रयं, अनन्तरं "व्योमवृत्त" "एवं हि व्योमवृत्तादौ" "यदा यच्च" "नद्यादौ" इति ग्रन्थानुपूर्वी दृश्यते । ख–कोशानुसारिणि उपरि प्रदर्शिते ग्रन्थशरीरे "यदा यच्च" इत्यर्धानन्तरं "नद्यादौ" इत्यादिः पाद एकः लेखकप्रमादपतित इति साधीयसी दृष्टिः ।

भाजितानामरांशानां कुर्याच्चु दलनां पुरः।
दले कृतेऽथ सर्वेषां मध्यसूत्रं तु पातयेत् ॥८९॥

पतितैर्विभजेत् [1]पश्चाद्दलैकैकं द्विरष्टधा।
स्पष्टसूत्रक्रमेणैव सूत्रमास्फालयेत्ततः ॥९०॥

[2]संभज्य भागमेकैकमराणां पार्श्वयोर्द्वयोः।
सिद्धिं कुर्यात् तथाऽराणामंशषट्केण सर्वदा ॥९१॥

इत्येषाऽध्वरगादीनां चक्राणां भागकल्पना।
आख्याता द्विजशार्दूल त्वराणां साधनं शृणु ॥९२॥

अराख्यमध्यस्तत्राभ्यामराख्याभं तथैव च।
शृङ्गमानान्तरसमं कृत्वा सूत्रं तु तेन वै ॥९३॥

भ्रामयेत् पूर्णचन्द्रौ द्वौ भाव (?ग) योरुभयोरपि।
[3]तस्यातिशायकौ यस्य पूर्णा यैः परिधावतः (?पूर्णौ यत्परिधावतः) ॥९४॥

सिद्धिस्थानाद्भ्रमं कुर्यात् सूत्रे ब्रह्मपदे स्थिते।
प्रागाद्याद्युपसंख्यैर्वा क्षेत्रं सूत्रैर्विभज्य च ॥९५॥

द्वाभ्यां द्वाभ्यां ततः कुर्यात् सप्तधा सप्तधाऽन्तरम्।
षट्कं षट्कमथो बाह्या [?तु] सूत्राणां प्रत्यरांशके ॥९६॥

---

[1] क–ग घ–पश्चाद्‌······कैर्द्वि ख–दरैकैकं द्वि

[2] ख–सन्त्यज्य

[3] क–ख–तस्याति····यवकौत्रै यस्य पूर्णा····परिधावतः

मध्यसूत्रैररासिद्धि [?द्धिः] प्राक्छदं चारमानतः।
द्वाभ्यामराभ्यामेकांशमन्तरेवं विशिष्यते ॥९७॥

अनेन विधिना विप्र क्रियमाणेन सर्वदा।
इदं त्वराणां संधानं चक्राणां कथितं मया ॥९८॥

वरसीकी? च संज्ञा [?धा] नं केवलानां समासतः।
कर्तरीय [?या] न्तरीयाणा लक्षणं प्रवदाम्यहम् ॥९९॥

यदष्टधा कृतं पूर्वमराङ्ग [?ङ्गं] स्तु द्विषट्कधा।
विभज्य भागषट्केन पूर्वकं द्वार [?द्वय] कं स्मृतम् ॥१००॥

स्थापितेष्वरकेष्वेवं कुर्यात् कर्तरि [1]सञ्चयम्।
उभाभ्यामप्यराभ्यां च शिष्टं यत्त्रितयद्वयम् ॥१०१॥

अंशकानां च पार्श्वे तु संसाध्या तेन कर्तरी।
[2]प्रदक्षिणाग्रहा चोरा [?ग्रा] परशोद्ध [?ध्र] रूपिणी ॥१०२॥

प्रोद्धृत्य चोत्तरे भागे प्रागाकारस्य दिग्वशात्।
[3]परिपात्व [?त्य] नयत्येषामरकाणां तु साधयेत् ॥१०३॥

प्रदक्षिणक्रमेणैव कर्तरीणां च साधनम्।
तत्साधनार्थं सूत्राणां संख्यातं प्रागम [?प्रागनु] स्मृतम् ॥१०४॥

---

[1] ख–संयमः

[2] सर्वत्र एकरूपाण्यक्षराणि

[3] ख–परिपात्व

पूर्वापरं मध्यपूर्व (?र्वं) [?यावद्] वृत्तस्य सङ्गमे।
निधायान्यन्नयेत् सूत्र (?त्रं) मध्याद्वै···न(?संग) मस्य च ॥१०५॥

अरमूलाद्द्वितीयस्य त्र्याभ्यामस्य संगमम्।
मध्यमं लाञ्छ्यमानं तु तदराग्रमथानयेत् ॥१०६॥

अरमध्यात्तृतीयस्य पूर्णचन्द्रसुसंगमे।
संस्थाप्याथानयेत् सूत्रं स्थानं यत्तन्निबोधतु ॥१०७॥

अराग्रपरिलेख्यस्य चतुर्थस्यारमध्यगात्।
षट्संगमं द्विजश्रेष्ठ तस्मात् स्थानं तु मत्स्यवत् ॥१०८॥

लाञ्छयेन्मूलपर्यन्तं व्यज्यते कर्तरी स्फुटा।
सामान्यलक्षणं ह्येतद्विशेषमधुनोच्यते ॥१०९॥

अरसंकोचविस्तारवशात् कमलसंभव।
साधनं कर्तरीणां च न्यूनमप्यहिवारयत् (?धिकारवत्) ॥११०॥

मूलादन्यत्तथाऽराग्रे वृत्ताभ्यां मानमन्तरात्।
गृहीत्वा सूत्रमानं तु [1]तस्मिन्धा (?र्येत) पौष्कर ॥१११॥

सूत्तरादर (?सूत्रोदरात्)···त्रिस्थं पुनरेव हि।
[2]संस्पृशेत् सङ्गमं यद्वै त्वरातुर्येऽन्तरभ्रमे ॥११२॥

---

1 ख–तस्मिन् धायत?

2 क-ग-घ–सङ्गस्पर्शात्सङ्गमं

प्रेर्यमाणं तदवधे (?धेः) पूर्वचिह्नस्य मीलयेत् ।
यथा स्यात् कर्तरीणां तु स्फुटमूलमरास्स (?रैः स) मम् ॥११३॥

कर्तर्यन्तरितानां च (? चा) मि (?पी) त्युक्तं साधनं मया ।
परिद्वितीयसंज्ञानमन्येषां वक्ष्यतेऽधुना ॥११४॥

सार्धेऽध्वरेषु विप्रेन्द्र त्वरमूले भ्रमान्तरे ।
नेमिक्षेत्राच्चातुर्थांश [1]मावात् तं भ्रामयेत् समम् ॥११५॥

विज्ञातव्यं तु तच्चक्रमरकायस्य साधिका ।
नेमिक्षेत्राच्चतुर्थांशं भिन्नं तु परिकल्पयेत् ॥११६॥

नाभिक्षेत्रं द्विजश्रेष्ठ भजेच्चक्रवशात्तु ते ।
क्षेत्रे तु नाभिनेम्याख्ये वृत्ते स्त्रीं द्वैतकं (।त्रिद्वयेकक) क्रमात् ॥११७॥

नाभिक्षेत्राद्यतं (?दितः) स्थूलं क्षेत्राख्यं क्षेत्रमुच्यते ।
पराख्याऽस्या स्वरागस्य तस्यैषा क्षेत्रकल्पना ॥११८॥

कार्या वै व्योमवृत्तादौ यावदक्षावसानिका ।
अक्षादौ कल्पना कार्या व्योमवृत्तावसानिका ॥११९॥

मातुलुङ्गाकृतिर्यस्मिन् पद्मपत्रायता समा ।
इन्दीवरदलाकारा वल्लिका जठरास्तथा ॥१२०॥

यवोदरे त्रिसंज्ञाश्च त्वेतेषां साधनं शृणु ।
कृत्वा द्वादशधा क्षेत्रं भ्रमाख्येन क्रमेण तु ॥१२१॥

---

[1] ख-ग-घ-दद्यात्तं

मध्ये भागत्रयेणाक्षं नाभिं भागद्वयेन तु।
नाभ्यरक्षेत्रयोर्मध्ये भागैकं चक्रसंज्ञितम् ॥१२२॥

भागद्वयं त्वरक्षेत्रनेमिं भागद्वयेन वै ।
नेम्यरक्षेत्रयोर्मध्य एकांशं संपरित्यजेत् ॥१२३॥

अरक्षेत्रं द्विधा कृत्वा भ्रामयेत् तदनन्तरम्।
अराख्यमध्यसूत्रस्य ना (?भि) वृत्तस्य च सङ्ग(?संग)मे ॥१२४॥

अरात् त्रिभागजं सूत्रं स्थापयित्वाऽथ लाञ्छयेत्।
पार्श्वे द्वे मध्यसूत्रस्य मध्यसूत्राच्च वै ततः ॥१२५॥

एतस्मिन् लाञ्छने सूत्रे स्थापयित्वाऽपरं तथा।
मत्स्यवल्लाञ्छनं कुर्यादरमूर्ध्ना तु तेन वै ॥१२६॥

अराग्रात् परिधीन् यावद्द्वितीया तावदेव हि।
बीजपूरोपमाराणां संधानं कथितं त्विदम् ॥१२७॥

अराख्यमध्य [1]सूत्रस्य त्वरमूलस्य च(?चैव)तत्।
सन्धौ द्व्यंशकजं सूत्रं लाञ्छयित्वा न (?ऽव) रोध्य च ॥१२८॥

अर्धचन्द्राकृतिसमं यावन्मूलभ्रमं स्पृशेत्।
मूलमग्रं शशि [2]श्रृङ्ग (?मध्ये) सूत्रं निधाय च ॥१२९॥

तथाऽराग्रमथास्फाल्यं पद्मपत्रायते (?तं) द्विज।
लक्षणं च समाख्यातमुद्दिष्टं यत् पुरा मया ॥१३०॥

---

[1] ख–सूत्रस्य त्वरादस्य च तत्परा

[2] ग–घ–शृङ्गतध्दौ सूत्रं

इन्दीवरदलाग्राणामराणां साधनं शृणु ।
आरान्मूलभ्रमाद्विप्र द्वितीयस्य भ्रमस्य च ॥१३१॥

तन्तावरोदरी यस्या सूत्रं कृत्वा तु सन्धिगम् ।
…'हाद्भमन[1]सूत्रेण भंक्तव्यमपि लाञ्छनम् ॥१३२॥

पार्श्वाभ्यां मध्यसूत्राणि कृत्वा मध्यभ्रमे द्विज ।
तच्चिचह्नरोदितं सूत्रं कृत्वाऽराग्रमथानयेत् ॥१३३॥

लाञ्छयेन्मध्यवत्तस्माद्यावन्मूलमराख्यकम् ।
कृते परे लाञ्छने स्यान्नीलनीरजपत्रवत् ॥१३४॥

त्रिभागभाजितं क्षेत्रं कृत्वाऽऽदौ भ्रामयेत् समम् ।
ततोऽङ्कयेदरैकैकं स्पष्टसूत्रक्रमेण तु ॥१३५॥

षोढा द्विजेन्द्रया (?चत्वार्थ)ऽङ्केषु सूत्राणि च निपातयेत् ।
कोष्ठकाष्टदशैकैकमरा (?न) भागवतो (?तान) न येत् ॥१३६॥

[2]असो अय चवाश्चो द्वे[3]……'कोष्ठकद्वयम् ।
लोपयेद्द्विजशार्दूल तद्वन्मूलात्तु मर्दयेत् ॥१३७॥

द्वे द्वेऽथ मध्यदेशाच्च पार्श्वयोरुभयोरपि ।
एवं लुप्ते त्वराद्बाह्ये लोपयेदप्यरान्तरम् ॥१३८॥

---

[1] क–ग–घ–सूत्राणामुपास्यामपिं

[2] सर्वत्र एकरूपाण्यक्षराणि

[3] क–ग–घ–अभकं ख–अभूतं

मूलात् कोष्ठचतुष्कं तु तथा चैवाग्रतस्ततः ।
कोष्ठकद्वितयं मध्याल्लोपयेत् सिद्धये द्विज ॥१३९॥

वल्मीकोदरसंज्ञं च न वल्मीकोदरं तथा ।
अरान्तरं यथा लुप्तमग्रमूलाच्च मध्यतः ॥१४०॥

तद्वल्लुप्तमरा (?द) बाह्य (?ह्यं) मूलमध्या त्व (?त्त्व) राग्रतः ।
यवोदरं हि धानाध्या(?ख्या)त्? न यवोदररूपद (?वृ) क् ॥१४१॥

भङ्क्त्वा भ्राम्य चतुर्धा वा स्याद् द्वादश यथा····।
वल्मीकद्वयमध्यानां मध्यभागाच्च पक्षयोः ॥१४२॥

क्रमश्चतुश्चतुर्द्वे द्वे मूलाग्रेभ्यः पुरोदितम् ।
[1]···द्विषट्कस्य बाह्या वै संख्ययाऽनया ॥१४३॥

षड्विधेन तु भेदेन स्वस्या (?स्य) चाराघनेन च ।
[2]ततोऽक्षादौ यदन्तस्थ (?स्थे) स्पष्टसूत्राणि लोपयेत् ॥१४४॥

शु (?सि) द्धिं कुर्याद्द्विजाता (?ञ) नां षण्णां व्यञ्जन्ति ते यथा।
प्रतिचक्रं तु चक्राणां नेमिक्षेत्रस्य मध्यगम् ॥१४५॥

दर्शयेद्द्विविधं चैव यथा तन्मे निबोधत ।
अरासमं द्विगुणितं तत्क्षेत्रं चाङ्कयेत् समम् ॥१४६॥

---

1 क-ग-घ-किंत त्वरो ख-किन्त्वन्तरो

2 क-ग-घ-ततोक्षादभयन्तस्त

अराग्रसंमुखं [1]चैव तत्पार्श्वे तु यथा तथा।
निपातयेच्च सूत्राणि [2](?प्रधि) स्थानगतान्यतः ॥१४७॥

[3]एवं द्विजेन्द्र चक्राणां प्रधिनामयनं स्मृतम्।
उत्तमाङ्गं च [4]पादाङ्गं शरीरं स्नायुभिर्यथा ॥१४८॥

निबद्धं तद्वदेवास्य चक्रस्य प्रथमस्थिता (?तौ)।
नान्यत्र दर्शनं तासां नेमिक्षेत्रादृते क्वचित् ॥१४९॥

[5]चक्रस्य (?मानप्रमाणं) त्वित्येतत् समुदाहृतम्।
द्विरनेकेमपारेम? (?द्विरेकनेमिपरिधिं) [6]बाह्यस्थे संप्रदर्शयेत् ॥१५०॥

द्वयमभ्यन्तरे त्यक्त्वा त्रिनेमिवलितस्य च।
तृतीये प्रथमं कार्या पूर्ववत् परिसंख्यया ॥१५१॥

चक्राणां द्व्यरकादीनां विधिनाऽनेन साधनम्।
कथितं द्विजशार्दूल रासाम (?ततस्तान्) पूजयेत्ततः ॥१५२॥

यत्ना (?यान्य) राख्यानि लम्बानि लाञ्छने स्थापितानि च।
सर्वाणि चक्रवृत्तानि सितेनापूर्य पूरयेत् ॥१५३॥

---

[1] ख–चैतत्

[2] क–ग–घ–त्वं स्तनगततान्यतः ख–त्वं च स्थान

[3] क–ग–घ–एतद् द्विजेन्द्र

[4] ख–पातालं

[5] ग–घ–चक्रस्य लैकतेमेलिमेत्वि

[6] क–ग–घ–द्वाभ्यस्थे

सुसमासु च रेखासु खड्गधारोपमासु च।
पद्मं तु पूर्ववत् कुर्यादसंसक्तदलं सितम् ॥१५४॥

[1]नेम्यरा नाभियुक्तस्य (चक्रस्य च) तदन्तरे।
कल्पितं कमलं तस्य कृष्णं कुर्याद्दलान्तरम् ॥१५५॥

हेमदूर्वाप्रवालाभं [2]त्रिनाभेः क्रमशो द्विज।
?दि त्या (?सिता)दि हेमश्यामेनाप्यरुणेनैकनाभि च ॥१५६॥

चक्रस्य पूर्वमुद्दिष्टं रञ्जनं कमलासन।
चक्रवच्चारकान् सर्वान् रजसा संप्रपूरयेत् ॥१५७॥

अरान्तरं द्विजश्रेष्ठ चक्रभूमिसमं स्मृतम्।
पीतकामेन शुक्लेन त्रिनेम्यपि सितेन च ॥१५८॥

रोचनाभेन रजसा द्विनेमं (मिं) सुसितेन च।
[3]संपूरयेदेकनेमिं [4]केवलेन सितेन च ॥१५९॥

[5]नाभिनेमिशतैकाभैः समस्तैर्वाऽथ रञ्जयेत्।
प्रधीनामन्तरं [6]बाह्यं……स्सतः ॥१६०॥

---

[1] ख–नेम्यन्ता नाभियुक्तं तु

[2] क–ग घ–त्रिनाभे गमशोरजः

[3] क–ग–घ–सपूरयेदेव किंते

[4] ख-केवल्नेनासितेन च

[5] क–ग–घ–नाभिनेम्य…समस्तै

[6] क–ग-घ–बाह्यं तेभ्यस्ते कुचितस्यतः

अन्योन्योपगतेनैव विधिना पूरयेत्ततः।
विभेत्रपत्रतोऽकारै रङ्गदेव…सञ्चयैः? ॥१६१॥

घुसिताः प्रधयःसर्वास्तुषारचयसन्निभाः।
इतीदं च समाख्यातं रजसा पूरणं मया ॥१६२॥

बीजेष्ववस्थितं सत्त्वं पद्मं धामत्रयेण च।
वर्णं दद्यान्म (?त्र) येनैव कर्णिकादौ क्रमाद्युतम् ॥१६३॥

तन्नालसं (?स) हिताशेषसिद्धास्तत्कण (?र्ण) केष्विव।
अक्षादिदैवतं व्योम चाक्षं तु परिकिर्तितम् ॥१६४॥

मध्वज्यसमदेवत्यं [1]चक्राणां हि त्रयं क्रमात्।
[2]कल्पान्तानिलदैवत्यं चक्रधारासमं क्रमात् ॥१६५॥

कालवैश्वानरं ब्रह्मन् सिद्धचक्रान्तरेषु च।
क्षमा सरस्वती देवी नियन्त्री देवपूजिता ॥१६६॥

एतास्तु नेमित्रितयं (?य) देवता (?ताः) स्वामिमिश्रिता(?ताः)।
संगृह्य परितस्सर्वं समुद्रागच्छ सागरात्? ॥१६७॥

चक्रदेशोभयात्तच्च द्विसप्तभुवनस्य च।
स्थित आप्यायनार्थं तु प्रस्थितानेष्वपांपतिम् ॥१६८॥

---

[1] ख–चक्रनाभित्रयं

[2] क–ग–घ–कल्पान्ता तिलदैवत्यं चक्रया…सारसं

इत्युक्त्वा देवताः सर्वाः पूज्यकाले प्रपूजयेत्।
स्थानेष्वेतेषु विधिवत् पुष्पधूपा[1]दिकेन वा ॥१६९॥

अस (?म) त्वात् समं चाक्षं नेम्यरानाभिमध्यगम्।
यस्मात् त्रयीमयी नाथ ऋग्यजुस्सामसंभवा ॥१७०॥

संप्रविष्टा भिनत्त्याशु दैत्यश्रोत्रावधौ द्विज।
हृदयान् दैत्यकान्तासु स नादः संप्रविश्य च ॥१७१॥

क्रोडस्थितानां गर्भाणां यावत्यंश (?त्यशो) यदा (?विढयं) तदा।
[2]नादेन भयदा तस्माद्विभिद्यन्ते सुरारयः ॥१७२॥

हृदयान्तर्गतः शुद्धो नादश्रुतिसमुद्भवः।
सा हिनस्त्यशुभं तस्मान्नित्यं सन्मार्गसेविनाम् ॥१७३।

अक्षाद्ब्राह्ममतो हेतोर्नाभिसंज्ञा प्रगीयते।
यस्मादतीव राजन्ते [3]कालान्ते चोपबृंहिता ॥१७४॥

अनेकरूपभेदेन रश्मिवच्चक्रमण्डले।
तेन काया समुद्दिष्टा नाभिनेभ्यन्तरे स्थिता ॥१७५॥

यथा नाडीषु भेदस्थं प्रवहत्यनिलं द्विज।
[4]नाभ्या (?भ्य) रासु स्थिरं तावत्तेजो [5](?ज्वलित)दुःसहम् ॥१७६॥

---

[1] ख–दिकेन च
[2] क–ग–घ–नादेनाभयदा?
[3] ख–कालं ते
[4] सर्वंचैकसूपाण्यक्षराणि
[5] ख–ह्यत्रत्यदुस्सहम्

चक्रनाडीषु निर्यानि (?ति) गिरिस्योदस्वि (?सानुष्वि) वे (?वो)
दकम्? ।
प्रकाशप्रभवत्वाच्च यत्र नाचच (?डयो) द्विजोत्तम ॥१७७॥

यत्र यष्टिस्वरूपत्वान्नाडयः प्रथमं स्मृताः ।
प्रथि (?धि) ष्वनेकथा (?धा) यातं तेज [1]श्चक्रोत्थितं च यत् ॥१७८॥

बहिस्तद्भ्रममाणस्य चक्रस्य चतुरात्मनः ।
वर्तते वृत्तिवृत्त्यादि क्षणं चो परिवेषये(?वर्षय)त्? ॥१७९॥

सुस(?सं)मेयाम्बुधिमल (?जलं) [2]तेजो·········द्विज ।
अष्टकैर्दीप्यमानैश्च निर्धूमैः पावकावृतैः ॥१८०॥

[3]स···भानि (?ति)[4]भ्राम्यन्तं गोलकं यथा ।
सितं सति पृथग्याते स्वयं पावकवृत्तवत् ॥१८१॥

चक्रं तथा रूप[5]मिदमरकर्तरिभिः स्मृतन् ।
तेजोऽजं यदिदं वृत्तं यत्नवद्भक्तितो द्विज ॥१८२॥

तदा रूपत्रयमिदं कदारूपपदान्वितम् ।
कदा? तदा दीप्तिर्या चक्रं तेजश्चलात्मिकाम् ।१८३॥

---

[1] ख–श्चक्रोज्झितं

[2] ख–तेजोजोलितं ग–घ–तेजोजेळिक···द्विज

[3] ख-सप्लादवृत्तममभ ग–घ–सप्लुलातव्रतं भानि-अत्र अलातशब्दयोगः स्यात्

[4] क–ग–घ–द्राद्यन्तं

[5] क–मिद रकर्तरिभिः ख-कर्तरीति

तस्य तेजोजवृत्तिस्या······मिसंज्ञा विधीयते।
तस्मान्नेमिद्वितीयाब्दानां जयन्त्यपितरं क्षयम्? ॥१८४॥

मिश्रभूतं तु [1]तेजोत्थं···वृत्तनेम्यतस्मृता?।
अथेदानीं समासेन मन्त्रन्यासं निबोधतु ॥१८५॥

मया मन्त्रसमूहस्तु यत् पुरा ते प्रकाशितम् (?तः)।
षडङ्गं सर्वमूर्तीनां पुमादीनां द्विजोत्तम ॥१८६॥

प्रदक्षिणेन [2]पूर्वादौ···त्वानि सुनिवेश्य च।
विधाक्रमेण तं···रकादौ शृणुष्व मे ॥१८७॥

पुंप्रकृत्यात्ममन्त्रेण पूर्वचक्रात् परे स्मृता।
पौरुषं प्रकृतिं चैव प्रद्युम्नाख्यं तथैव च ॥१८८॥

विन्यस्य चारके चैव चतुरात्मा तथा परे।
यावद्दाखरकं? चक्रं [3]सर्वमन्त्रात्मकं क्रमात् ॥१८९॥

·············मन्त्रत्रयमिदं शुभम्।
मूर्तिमन्त्रसहस्त्रेण कोणोनानेन वै द्विज ॥१९०॥

द्विसहस्र [4]मराणां च षडङ्गेन प्रपूरयेत्।
पूजिते द्वा(?द्वय)रके चक्रे द्विरात्मा पूजितो भवेत् ॥१९१।

---

[1] क–ग–घ–तेजो अन्तवृत्त

[2] ख–पूर्वादौ सूत्रा सुनिवेश्य

[3] क–ग–घ–पूर्वमन्त्राविकं

[4] क–ग–घ–द्विसहस्रं करारणां च

त्रिरात्मा त्र्यरके चैव चतुरात्मा तथाऽपरे।
यावदाख्यारकं चक्रं पूर्वमन्त्रादिकं क्रमात् ॥१९२।

प्रवृत्तिमूर्तिमन्त्रेण तत्संख्यात्माऽथ कथ्यते।
द्विरात्माख्येन भेदेन चक्रेषु द्वा (?द्वय) रकेषु च ॥१९३॥

स (?सा) वाराणां [1]सहस्रस्य कृत्वा संकल्पमात्मना।
सहस्रमूर्तौ विप्रेन्द्र भक्त्या पूजां करोति यः ॥१९४॥

स वै चक्रसहस्रस्य [2]पूजनाद् वांच्छितं भवेत्।
एकस्मिन् द्विसहस्रारे चक्रे यः पूजयेत् पुमान् ।१९५॥

केवलं [3]त्वथवा मिश्रे सारमेतान्विते शुभे।
[4]आवार्यावरकेणैव रूपेण परिसंस्थिते ॥१९६॥

सहस्रमूर्तिमन्त्राणां सोऽमृतत्वाय कल्पते।
सर्वेषां द्विज चक्रस्य मध्येऽष्टदलपङ्कजे ॥१९७॥

भक्त्यादौ पूर्ववत् पूज्यं षडङ्गपरमाक्षरम्।
पवित्रारोहणेऽनन्त[5]कलशे त्वांकुरे विधौ ॥१९८॥

विनोत्सवेन हि तथा स्थितस्थापनकर्मणि।
हेतुसां (?तीश) पूजया हेतु। हे (?हे) तयो विष्टरादिके ॥१९९॥

---

1 ख-सहस्राख्य''''मात्मनः
2 क–ग–घ–पूचानां चा''' तं
3 क–ग–घ–त्वथयामिश्रे
4 क–ग–घ–आचार्य
5 क–ग–घ–कलशे त्वां गुरौ ख–कलशात्पङ्कुरौ

आधाननिचये स्वामिन् [1]स्थाने····संलिखेत् ।
त्रयस्था लोकपालानां मिच्गिा वाम्बराश्रका(?या:) । ॥२००॥

निर्दिष्टकल्पनाहस्त (?स्तै:) तद्भूमावर्चयेत्तत: ।
मिश्राणामपि चक्राणा [2]मेष एव विधिस्स्मृत: ॥२०१॥

विन्यासं पूजने चैव सर्वेषामब्जसंभव ।
[3]इति ते देवतान्यासं संक्षेपात्तु प्रकाशितम् ॥२०२॥

स्वदेहं [4]सकलं न्यस्य ध्यात्वाऽऽदौ हृदयान्तरे ।
[5]स्वा (?आ) द्यं य: पूजयेच्चक्रं स मोक्षफलभाग्भवेत् ॥२०३॥

सामीप्यं मम चाभ्येति द्वितीयं [6]य: प्रपूजयेत् ।
यस्तृतीयं पूजयति मम सालोक्यमेत्यसौ ॥२०४॥

सत्यलोकेऽप्यसौ पूज्यो यश्चतुर्थं तु पूजयेत् ।
[7]तपोलोकेऽक्षयं कालमास्ते [8]य: पञ्चमं यजेत् ॥२०५॥

---

1 ख-स्थानेर्चास्नाप्य ग-घ-स्थानेर्च्यास्नाच्च

2 क-ग·घ-मेष एव इति स्मृत:

3 ख-इतीदं

4 क-ग-घ-सकलं···ध्यात्वा

5 क-ग-घ-स्वरन्य···पूजये

6 क-ग-घ-द्रितीयं यमपूज

7 क-ग-घ-···लोके

8 क-ग-घ-य: परमं

यः षष्ठं पूजयेच्चक्रं ज्ञानलोकं स गच्छति।
सप्तमं चार्चितं येन स मल्लोकमवाप्नुयात् ॥२०६॥

स्वर्गे स वासवादीनां [1]पूज्यश्चामरतां व्रजेत्।
येनाहं नवमे पूज्यः श्वेतद्वीपं व्रजत्यसौ ॥२०७॥

भक्त्या जन्मसमं कालं दशमं येन वाऽर्चितम्।
यदासक्तं च नागानां सप्तपातालवासिनाम् ॥२०८॥

पातालसुन्दरीणां च सम्मान्यो द्विजसत्तम।
एतत्ते सर्वमाख्यातं चक्रपूजाफलं शुभम् ॥२०९॥

सम्यक्कारणचक्रादौ त्वेकनाभ्येकनेमि च।
पर्यन्तं ब्रह्मसंभूत तस्मात् [2]त्वां परिपूजयेत् ॥२१०.।

प्रकाशय स्वभक्तानामास्तिकानां च सर्वदा ॥२११॥

पौष्कर उवाच—

इत्युक्तोऽहं पुरा विप्र विष्णुना व्यक्तमूर्तिना।
यथावत् सर्वे(?सर्वं) कथितः? भवतां चक्रलक्षणम् ॥२१२॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
चक्राब्जालक्षणो नाम
अष्टमोऽध्यायः

---

[1] क–ग–घ–पूज्यो यश्चरमं
[2] क–ख-ग–घ–सर्वत्राप्येवमेव

अथ नवमोऽध्यायः

ऋषय ऊचुः—

ब्रह्मन् ब्रह्मविदां श्रेष्ठ मिश्रचक्रं तु कीदृशम्।
एतत्संशयमाचक्ष्व ऋषीणां हितकाम्यया ॥१॥

पौष्कर उवाच—

एवमेव पुरा विप्र (?प्राः) सशयाद्विप्र (?विष्ट) बुद्धिना।
सर्वलोकहितार्थाय मया संचोदितं प्रभोः (?तः प्रभुः) ॥२॥

[1]उत्तिःठ····येनोक्तं (?उत्तमादिविभागोक्तं) यत् पुरा तद्वदस्व मे।
मिश्राणां चक्रयागानां लक्षणं लक्ष्मिनन्दन ॥३॥

श्रीभगवानुवाच—

उत्तमादिविभागेन चक्रेषूक्ता यथा पुरा।
कल्पना विविधा तद्वन्मिश्रेषु परिकीर्तिता ॥४॥

मुख्या वै मध्यमा चान्या [2]ततश्चैवाधमा स्मृता।
मुख्यसंख्यामना (?नमा) ख्यातं त्रिधा वै मध्यका (?मा)भवेत् ॥५॥

विज्ञेयं च तथा तद्वन्मिश्राख्येष्वम्बुजोद्भव।
[3]स (?तद्) विधा नवधा या वै प्रथमा परिकल्पना ॥६॥

---

[1] क–ग–घ–उत्तिष्ठं चन
[2] क–ततश्चै···स्मृता ग-घ-तववेश्चै·· न्यतास्मृता
[3] क–ग–घ–सविता नवधा

सांप्रतं तामहं वच्मि समासादवधारय।
प्रागष्टपत्रं कमलं त्वसंसक्तदलं लिखेत् ॥७॥

तद्बहिश्चक्रषट्कोणं (?क्रेण) मिश्रं कुर्यात्तु चक्रराट्।
यश्चक्रैः साधनीयं तं रक्तचक्राणि पौष्कर ॥८॥

परस्वं च [1]पथीहीरनिसूतं निसु? संलिखेत्।
अथवा षष्ठपूर्वाभ्यां चक्राभ्यां संप्रदर्शयेत् ॥९॥

पूर्ववन्नेमिभूमौ तु वर्ज्यं मध्यचतुष्टयम्।
बहिः स्थित वा चक्रे····त्वेकस्मिन् प्रधयः स्मृताः ॥१०॥

अध्यक्षं लक्ष्यते तेषां चक्राणां भिन्नरूपिणाम्।
[2]आवार्यावारकाख्येन संस्थाने संस्थिते सति ॥११॥

प्रयोजनं मया ते वै प्रधिषु प्रागुदीरितम्।
आदावृत्तमचक्राणां यावन्मध्येऽन्तरं तु वै ॥१२॥

[3]चक्रयागमिदं मिश्रं प्रथमं चामर (?परं) शृणु।
आरभ्योत्तममध्यात्तु चक्राद्यावत् प्रजायते ॥१३॥

का (?क) नीयोत्तमचक्रं तु द्वितीयं मिश्रमिश्र (?चक्र) राट्।
अनेन क्रमयोगेन मिश्रीकरणमाचरेत् ॥१४॥

---

[1] सर्वत्र समानान्यक्षराणि

[2] क–ग–घ–आवार्यवरका

[3] क–चक्रयागदिनं

यावन्न्यूनेतराच्चक्राच्चक्रमध्यममध्यमम्।
भवत्येवं कृते सम्यक् चक्र[1]षट्का(दिकं)शुभम् ॥१५॥

मिश्राणि (?णां) चक्रयागानां नवकं परिसंख्यया।
इत्युक्ता वै समानेनाप्युत्तमा मिश्रकल्पना ॥१६॥

द्वितीयामथ वक्ष्यामि मध्याख्या या त्रिधा हि वै।
[2]त्रिह्ये (?द्वये) कनाभि वा [3]तद्वद्युक्त नेमित्रयेण तु ॥१७॥

लिखेच्चक्रं तु वै पूर्वं पद्मबाह्ये यथेच्छया।
[4]सनाभिनेमियुक्तस्य तस्य चक्राम्बुजस्य च ॥१८॥

क्रमेण च बहिष्कुर्याच्चक्राणां [5]पङ्कजं तु वै।
तेनाभिद्दत (?धं) वै ब्रह्मन् नेमियुक्तं समालिखेत् ॥१९॥

तस्माद्वा पूर्वचक्रस्य नेमिनाभ्यवरस्य च।
अनेन क्रमयोगेन लोहं नाभिगणं नयेत् ॥२०॥

अर्धषट्चक्रषष्ठस्य [6]सांप्रतं नेमिपूर्ववत्।
कुर्याद्यत्नेन चेत् तेषां मध्यमा कल्पना स्मृता ॥२१॥

---

1 क–षट्का···शुभं ख–षट्काद्वितशशुभं ग–घ–षट्काद्वितं शुभं

2 क ···ह्योक

3 क–तद्वत्····त्रयेण ग–घ–तद्वद्युक्तसेनित्रयेण

4 क–···नान्नेम्यर्धं ग–घ–सनान्नेम्यर्धं

5 ख–चक्राणां पञ्चकं

6 क–ग–घ–संप्रतिन्नेमि

चक्राम्वुजेषु मिश्रेषु [1]त्ववरामवधारय।
त्रिनाभिसाम्बुजं कुर्याद्वि (?दृद्वि) ना ह्य(?भ्ये) काञ्चितं तु वा ॥२२॥

चतुष्टयं तु तद्वाह्ये तानि भिन्नेमिवर्जितम् (?नाभिनेमिविवर्जितम्)
साधनीयं च चक्राणामिष्टं नेमिन्युतं बहिः ॥२३॥

अलंकृतश्च (?तं च) नाडीभिर्न्यूनं चान्येन कीर्तितम्।
[2]ताभ्यां देवव (?त्) सञ्चरै र्बहुभेदंस्थि (?दस्थि) तस्य च ॥२४॥

योजने (?नै) षांशकारस्य कीर्तिता निर्मिता द्विज।
त्रिविधेन सहस्रारमुत्तमाद्येन कल्पयेत् ॥२५॥

त्रिगुणेन [3]त्रितयतो गर्भतश्चाथवा शृणु।
उत्तमाश्च (?मं च) कनीयां (?य) श्च प्रथमं परिकीर्तितम् ॥२६॥

मध्यमादुत्तमानां च सहस्रारं द्वितीयकम्।
[4]न्यूनं द्वे मध्यमान्तं च तृतीयं समुदाहृतम् ॥२७॥

क्षेत्रमाद्यं तथैतेषां क्रमेण शृणु पौष्कर।
प्रधानकल्पनोक्तानि यानि चक्राणि वै पुरा ॥२८॥

सर्वाणि नवहस्तानि षट्को (?ङ्गो) लक्युतानि च।
यथाविभागसंस्थानि कन्या (?नीया) दौ कथयाम्यहम् ॥२९॥

---

1 ख–त्वपरामव

2 क–ख–ताभ्यां देववसं चरै ग–घ–ताभ्यां देववसं चरै

3 क–त्रिधा……गर्भ ख–त्रितयतो गर्भ ग–घ–त्रिगुणेन त्रिधातमगर्भतः

4 क–न्यून…मध्य

मानानामङ्गुलानां तु विज्ञातव्यं शतं द्विज।
[1]द्विस्सप्तकाङ्गुलैर्युक्तं विभागं चाधुनोच्यते ॥३०॥

सर्वेषां कमलार्धं (?र्थं) तु ज्ञेयं पञ्चदशाङ्गुलम्।
नाभ्यानाम (?मिनेम्य) रसिद्ध्यर्थं···बलात्रयम् ॥३१॥

क्षेत्रं यन्नाभिपूर्वात्तत् तत (?न्तत) षडङ्ग (?ङ्गुल) त्रयेण तु।
वरं प्रणद्रिजस्थाने चक्रार्धं (?र्थं) वृत्तमुल्लिखेत् ॥३२॥

सनाभिनेमिचक्राणां तद्विता (?धा) नां विशेषतः।
अरान्मूलोपगं तस्मिन् प्रति (?धि) [2]बन्धा (?र्थमुल्लिखेत्) ॥३३॥

मानं वै चक्रबन्धस्य यदिदं परिकीर्तितम्।
परश्व(?श्वा)रकचक्रेण सामान्ये(?न्यमे)षां तु सर्वदा ॥३४॥

चक्राङ्गजेऽथ? वा तन्तु (?न्तु) कृत्वैषां क्षेत्रकल्पना।
ततोऽत्र नाभ्यरानेमिसिद्धिं कुर्यात् क्रमेण तु ॥३५॥

एवं प्रकल्पिते (?तं) चक्रं साम्बुजेऽम्बुजसम्पदा(?दं)म्।
तद्बाह्ये परचक्रस्य तस्माच्चक्रात्तु केवलात् ॥३६॥

त्र्यङ्गुलेनाथगं (?थ) मानं कल्पनीयं प्रवर्तते।
क्षेत्राणां नाभिपूर्वाणां संविभज्य च संस्थिता ॥३७॥

एवं हि सर्वचक्राणां बाह्यस्वा (?स्था) नां प्रकल्पयेत्।
मानमन्तरचक्रात्तु त्र्यङ्गुलेनाधिकं क्रमात् ॥३८॥

---

[1] ख–द्विसप्त

[2] क–बन्धा ख–बन्धाद् भवे····त ग–घ–बध्दात् हकेतात्

यावद्बहिष्ठचक्रस्य नाभ्यामिष्टं (?ष्टाङ्) गुलाष्टकौ।
क्षेत्रं भवति विप्रेश त्वेकीकृत्य समं समम् ॥३९॥

सनाभिनेमिचक्राणामेतन्मानं विधीयते।
विधिवच्चोत्तमानां तु मध्यमानामतश्शृणु ॥४०॥

चतुर्विंशत्यङ्गुलाब्जं कृत्वा मानं तु लोपयेत्।
नाभीयं पूर्वमानं च न्यूनाना (मेव) मेव च ॥४१॥

सनाभिनेमिमानं च स्वयमूह्य [1]मवाग्भवेत् ?।
किञ्चैषां पद्ममानं च ज्ञेयमष्टादशाङ्गुलम् ॥४२॥

इत्युक्तं क्षेत्रमानं तु त्रिधा मीश्रवय(?छ)स्य च।
विप्रभागमराणां च साधारमवधारय ॥४३॥

षडरं पद्मबाह्ये तु प्रचक्रं परिकल्पयेत्।
तस्य कुर्यात्तदा चक्रं परिल्ले (?धेर) वरपत्रवत् ॥४४॥

यवोदरेऽथवाऽष्टारमरकैस्तं (?तद) बहिर्लिखेत्।
द्वादशारं तदा कुर्याच्चक्रपद्मस्य तैःस्त्व (?स्त्व) रैः ॥४५॥

[2]पिपीलिकोदरे चक्रं षोडशारमतः परम्।
चतुर्विंशत्यरं कुर्यान्मातुलङ्गोपमारकैः ॥४६॥

अथ कर्तरिसंयुक्तो (?क्तैः) केवलैर्वसितो (?) द्विज।
चतुस्त्रिं(विं) शत्यरं(?रैः)कुर्याच्चक्रं परशुसंज्ञकैः ॥४७।

---

1 क–ग–घ–मवासयेत्
2 ख–पविभिक्रोदरे

भवत्येवं कृते मिश्रे चक्रयागं शतारकम्।
द्वैरूप्येणास्य कथितं देहं संवत्सरेण तु ॥४८॥

अथ षडृतवो ज्ञेयाः षडरेष्ववधारयेत्।
परे बहिर्द्वारमासाद् ते षोडशकमासकम् ॥४९॥

चतुर्विंशति तत्पक्षा [1]तन्मार (?स) द्विते (?तये) स्थिता। (?ताः)
ततष्गो(?षो)डशमासाख्यपक्षा? संवत्सरस्य च ॥५०॥

[2]तत्रायनद्वयं विद्धि संस्था चारकतु (?तद्) द्वये।
दक्षिणोत्तरसंज्ञे च सामान्यं वत्सरद्वये ॥५१।

विप्रभङ्गं च यत्रेदं बन्धं चति? स (?चातीत्य) तिष्ठति।
मिश्राख्यस्य शतारस्य नानाभेदगतस्य च ॥५२॥

इत्येतत् साधनं प्रोक्तं निःशेषेण तवानघ।
सूचितं प्राक् सहस्रारं मिश्रया संस्थितं त्रिधा ॥५३॥

क्षेत्रमाणं (?णं) तथाऽराणां विभागं चापि मे श्रुतम्।
शतद्वादशकेनैव क्षेमस्य (?त्र) परिकीर्तितम् ॥५४।

एकत्रिं(विं)शत्यङ्गुलैस्तत् पद्मार्धं (?र्थं) चास्य कल्पयेत्।
तद्बहिर्नाभ्यरा[3]न्नेमिभूमयोऽथ दशाङ्गुलैः ॥५५॥

---

1 सर्वत्र अशुद्धम्

2 ख–अत्रायन

3 क–न्नेमिभू… योथ ग–घ–न्नेमिभूमयो दशधा

तद्बाह्यस्थस्य चक्रस्य [1]नेम्य (?नाभ्य) रान्नेमिमे(?भे) दिनी।
[2]स्व(?व)र्गो याति द्विजैकत्र त्वर्धं षोडशा (?भक्त) ङ्गुलैः ॥५६॥

[3]एकोनविंशत्यङ्गुलकैः क्ष्मातृतीयस्य कीर्तितम्।
[4]ततश्चतुष्क (?र्थ) लां (कां) शस्य द्वाविंशत्यङ्गुलैर्महीम् ॥५७॥

प्राक् प्रोक्तयवमानं तु पञ्चमस्य च चक्ष्महे।
पञ्चविंशत्यङ्गुलकै[5]र्हस्त (?स्ता) (?नां) त्रितयं भवेत् ॥५८॥

अष्टाविंशत्यङ्गुलैस्यात् [6]षष्ठचक्रस्य पौष्कर।
[7]धरारान्वा (?न्ना) भि नेम्यर्धमर्धतश्चेद् (?ति) सर्वदा ॥५९॥

एकैकस्याधिचक्रस्य यदुक्तस्तत्त्रिधा वजेत्।
समांशेन ततः कुर्याज्ज्ञात्वा [8]त्रिवै(?दव्ये)कधा तु वा ॥६०॥

स्वक्षेत्रनाभितेमीया वर्जयि[9]त्वा प(?त्व)रा यया।
[10]चक्रं(?क्र) भ्रम (?मं) सुगेहं च चक्रं चापि च पूर्ववत् ॥६१॥

---

[1] ग–घ–नेम्यरानेमि

[2] क–स्वर्गोंधा···ग–घ–स्वर्गोया···द्विजैकत्रत्वर्धं···षोडशाङ्गुलौ

[3] क–ख–शत्यङ्गुलकैः

[4] ग–घ–ततश्चतुर्थं··· लस्य

[5] ग–घ–र्हस्तगस्त्रितयं

[6] क–ख·स्यात्···चक्रस्य

[7] क–ख–धारारान्वि···नेम्यर्धं घ–धारान्नाभिनेम्यर्थंमध्यतश्चेद्

[8] ग–घ–त्रीवैकधा

[9] ग–घ–त्वरारय

[10] ग–घ–चक्रभ्रमसूरित्यहं चक्रस्यापि च

समद्वादशकात् क्षत्रात् [1]पूर्णिमा (?प्रणीता) यदि नेच्छसि ।
कुर्याद्वै [2]भूमिसंकोचं नाभिनेमिक्षये सति ॥६२॥

ततोऽरकाणां साहस्रं क्रमेणानेन साधयेत् ।
[3]पद्मवृत्तं च संलिख्य प्राक् तु तारं तु हेतिराट् ॥६३॥

ततोऽन्यत्पञ्च चक्राणि क्रमात्तस्य बहिर्लिखेत् ।
प्राग्वदावरणायुक्त्या[4]गेषु रामनामा (?तेष्वरानेमयः)शृणु ॥६४॥

[5]शतैश्शतैस्तैर्विन्यस्तैस्त्रिंशत् त्रिशत् क्रमाद्युतैः ।
चत्वारिंशत् क्रमाद्युक्तैः कुर्याच्चक्रद्वयं तथा ॥६५॥

शतद्वयेन सार्धेन तथा षष्ट्यधिकेन तु ।
चक्रत्रयं क्रमात् कुर्यात् सहस्रारं यथा भवेत् ।६६॥

युगाख्यं मिश्रमित्युक्तं सिद्धैः संपूजितं तु यत् ।
यथाऽङ्गयाग (?गा) च्चै (?श्चै) ते हि ज्ञेयास्त्वष्टादश क्रमात् ॥६७॥

वीर्य (?र्थि) संसिद्धिका ब्रह्मन् न ममाद्याद्युकेषु? च ।
यथोत्तमादिचक्राणां सञ्चार (?रा) परिकीर्तिता ॥६८॥

---

1 ग–घ–प्रणीताद्यदिकेश्छसि

2 ग-घ–भ्रमसंक्रोशं

3 ग-घ–पद्मवृत्य च संलिख्यप्रात्वतारं

4 ग–घ–तेषुरामानमाशृणु

5 ग–घ–शतैश्शतैन्यै विन्यैस्तस्यैः त्रिंशत्क्रमाद्युतैः

[1]अरेष्वाच (?ष्वांशं) परित्यर्थं (?ज्यं) तत्सञ्चारमयोगतः।
यान्युत्पलदलाग्राणि पद्मबाह्ये स्थितानि च ॥६९॥

युवोन्तकाशद्दुर्देशे तत् स्थाने जीवरञ्जत?।
पद्मपत्रावधौ जाता (?तं) कुर्यादुत्पलपत्रकम् ॥७०॥

नीलाम्भोजदलाकारं स्थाने संयोजयेच्च ताः [?तत्]
परश्वाकथ [?कार] पद्मस्य बहिस्तत्रोल्लसच्छदः ॥७१॥

परश्वा[?श्व]रैर्यदा चक्रं बाह्ये भवति कस्य चित्।
चक्रेऽस्य देवचक्रे च तदादधरसाधवम् [?धारादिसाधनम्] ॥७२॥

---

[1] ग-घ-कोशपाठोऽयम्

क-पाठः –

अरेष्वाच परित्यज्य त…मयोदितम्। धान्यात्प…बाह्ये सितानि च ॥
युवोन्तका…देशे तत्स्थाने जीवरं जत। पद्मपत्रं य…जाता कुर्यादुत्पलपत्रकम् ॥
नीलाम्भोजदलाकारं स्थाने संयोजयेच्च ताः'। वरण्या…पत्रस्य बहिः क्षेत्रे
लसच्छदः ॥
परश्वारै…चक्रं बाह्ये भवति कस्यचित्। चक्रे सदेवचक्रे च तदाददरसाधवः ॥
नमोने पूर्ववच्चैव ततोत्तद…च्छृणु।

ख-पाठः –

अरेष्वाच परित्यस्मान्…सभ्रामयेत्ततः। यस्य…प…श्रा…बाह्योपितानि च॥
युवोन्नका………। सिशर्देशेतत्…नैजीवरंजित॥

नमोने [?नाभिनेतमी] पूर्ववच्चैव त[?य] थोत्पद्येत तच्छृणु।
आराख्यं मध्यमं सूत्रमास्फ [?स्फा] ल्यादौ तदा द्विज ।:७३॥

अरक्षेत्रादराग्रे तु किञ्चिन्मानकलांशजम्।
त्यक्त्वा तु व्यवधानार्थं बाह्ये [1]वृत्तारकस्य च ॥७४॥

सूत्रं कृत्वाऽरमध्ये तु अर्धचन्द्रेषु लाञ्छयेत्।
प्राप [?प्य] ब्रह्मपदे सूत्रं कृत्वा तच्छृङ्गमानये [?त्] ।७५॥

भ्रमणीय त [?प] दे षोढा त्वन्तोऽग्रं त्वयान्तरम्?।
संविभज्य समैर्भागैर्भ्रमाद्देशावधेर्द्विज ॥७६॥

पातयित्वाऽथ सूत्राणि पूर्वं [?वं] च क्रमयोगतः।
अरसिद्धिं तु वै कुर्यान्मित्रं ते (त्सूत्रान्ता) देवमेव हि ॥७७॥

न [?न्य] स्य [2]चक्रवि (?क्राव) धौ ब्रह्मन् नयतो (ता) रान्तरस्य च।
अराच्चये तु संसिद्धे शेषक्षेत्रेण कल्पयेत् ॥७८॥

चक्रक्षेत्रं सुवृतं वै वृन्द [3]माना (?न) नि बोधकम्।
प्रागुक्तेनैव विधिना त्वेकैकस्य पृथक् पृथक् ॥७९॥

अराव [४वे] शाच्च विप्रेन्द्र सूत्रपातं समाचरेत्।
वृत्तानां कल्पनं कुर्यादरसिद्धिं तथैव हि ॥८०॥

---

[1] क-ख–हृत्तारकस्य च

[2] ग–घ–चक्रविधे

[3] क–ख–मानानि''''ग–घ–मानानिबोधकम्। अत्र माननिबोधकम् अथवा मानं निबोधतु इति स्यात्।

इत्येतद् कथितं सर्वं मिश्राणां साधन मया।
चक्राणां च समासेन विशेषं चात्र मे शृणु ॥८१॥

[1]यदुक्तमथ तन्मानं नाभिनेमिगणस्य च।
सर्वेषां चैव चक्राणां तस्मात् सञ्चारमाचरेत् ॥८२॥

ज्ञात्वा संकोचविस्तारं भौमक्षेत्रेषु पौष्कर।
क्षेत्रात्तु ह्येकनाभीयं तथा वै ह्येकनाभि [?नेमि] जात् ॥८३॥

नामार्धं [?भ्यर्थं] तु त्रिभागं वा संगृहीत्वा विनिक्षिपेत्।
त्रिनाभि [2]नेमिक्षेत्राभ्यां त्वादिमध्यत्व [?ध्यादि] भिर्गता ॥८४॥

रागभेदमथो वच्मि त्वरादे त्वा [?ध्वा] दितः क्रमात्।
प्राग्वत् पङ्कजकह्लारं भ्रमाणामपि सन्ततिः ॥८५॥

[4]समपा[?प] त्रान्तरालानि वैडूर्यसदृशानि च।
समानवर्णेन ततो रागेणेन्दीवरच्छदा [न्] ॥८६॥

प्रपूरयित्वा [5]वाप [वा ब्रह्मन्] स्तदन्तः पाण्डुरोज्ज्वलम्।
[6]यवोदरांशु [न सु] शुक्लेन कृष्णेन तदनन्तरम् ॥८७॥

---

1 क-ख—यदुक्तमिय
2 क-ख—नेमिनेत्राभ्यां
3 क-ख—रागमेवमथोवाच मम त्वरादेत्वादित
4 ग-घ—समुपात्रं तरालानि
5 ग-घ—वाब्रह्मा? तदन्त:। ब्रह्मंस्तदन्तः इति स्यात्
6 क-ख—यवोदरां ···शुक्लेन

कुर्याद्धारितपीतेन? मातुलुङ्गोपमारक्ताः।
रक्तोज्ज्वलेन रागेण तेषु मध्यं प्रपूरयेत् ॥८८॥

राजोपलनिभेनाथ [1]पारश्वास्त्वथ (?परश्वाद्यस्तु) रञ्जयेत्।
रोचनाभेन रजसा तद्रेष्वन्तरं तु यत् ॥८९॥

[2]सकेसराली (?णि) चाराणि सर्वचक्रगणस्य च।
[3]रङ्गे (?ङ्ग) शोभानुरूपेण पूरणीयानि वा द्विज ॥९०॥

द्वारवीध्या (?थ्या) दिकं ब्रह्मन् सर्वसिद्धिपुरोदितम्।
संपाद्य परया भक्त्या सद्यागनिचयं महत् ॥९१॥

[4]रागेषु कामभूतं च चक्रगात्रं विचक्षणम्।
नाभिशीर्ष (?र्षों) दरा[5] (?न्) पक्षं संप्रमार्था (र्थ्ये) च पु
(?प) त्रभृत् ॥९२॥

[6]संविशेच्च (तु) तन्मध्यं नयज्ञ (?ज्ञं) च नव (?वं) द्विज।
क्रमणीयं यथा मध्यं तथा ब्रह्मन् प्रचक्ष्महे ॥९३॥

सद्दशैर्यज्ञकाष्ठैश्च शमोच्चैर्द्वाचमेस्तव (?)।
गजवाजिवृषाकारं [7]त्रयाद्यष्टचतुष्टयम् ॥९४॥

---

1 ग–घ–परश्वास्त्वस्तु
2 ग–घ–सकेसरालिचाराणि···गणस्य तु
3 क–ख–····गे शोभा
4 ग–घ–रागेष्टकाम
5 ख–पक्षासप्र····श्च पुत्रभृत्
6 क–ख–संविशेच्च तन्मध्यं ग–घ–संविशेच्चेत
7 ग–घ–तृतीयाद्यष्टचतुष्टयम्

सुस्थूल [1]स्थिरजान्वि (?न्वी) ढ्यं स्थाप्यं तद्दिक्चतुष्टये।
द्वाराणां तु बहिःपार्श्वे तद्वद्वीथ्यन्तरे तु वा ॥९५॥

समदीर्घे (?र्घैः) सुदृढैश्चाथ [2]बध्वांसशैस्म (?शैः सम) पट्टिकात्।
[3]शमध्यम···शमानं यन्मूलाद्यै रज्जुभिर्दृढैः ॥९६॥

यत्रान्यापृष्ठतस्ता वै कृत्वा तस्मात् समारुहे (?त्) ।
[4]संछाद्य पूजायेत्वाऽथ क्रमासात्स (?क्रमात्स) वेमीषु वै ॥९७॥

एवमेव प्रयोगेण वंशवीथिश्च वा बहुः।
[5]सञ्चा वि (?र) दिक्षु वै दत्त्वा मध्यचक्रं तु साम्प्रतम् ॥९८॥

अर्घ्यपात्रोद्धृतेनैव पवित्रीकृत्य चाम्बुना।
बद्ध्वा स्वमुद्रां संस्पृश्य मन्त्रदृष्ट्याऽवलोकयेत् ॥९९॥

पूज्यो राजोपचारेण तत्र मन्त्रगणो द्विज।
[6]यायात् प्रवेशमार्गेण पूर्णाय (?ङ्ग) श्च ततो बहिः ॥१००॥

द्वितीयं स यजेत् प्राग्वत् कृत्वा संस्कारसंस्कृतम्।
एवमेव प्रकारेण परिशिष्टानि चाचरेत् ॥१०१॥

---

[1] ग–घ-स्थिरजानाढ्यं

[2] ग–घ–वध्वासंशैस्म

[3] ग–घ–शमध्यमं शमानं यत् मुरुधैः

[4] ग–घ–मञ्चार्यं क्रमात् सर्वं

[5] सर्वत्रैकरूपाण्यक्षराणि

[6] क–ख–ययाप्रवेश

एतेन कल्पितं ब्रह्मन् भूमौ चक्रं तु चक्रवत् ।
कर्मणा प्रोक्षणाद्येन ध्यानन्यासान्तिकेन च ॥१०२॥

तावन्न चास्ति दोषोऽत्र चक्राणां तु विलङ्घनात् ।
यस्माच्चक्रारविन्दानां द्वारवीथी न विद्यते ॥१०३॥

यस्मान्न जायते[1]दोषात् (?षः) साधकस्य कृतात्मनः ।
चक्रान्तरोपविष्टस्य नाभ्याद (?द्य) ङ्गेषु मर्दनात् ॥१०४॥

मध्ये शतारचक्राणां कर्णिकारौ क्रमेण तु ।
पुरुषं चोत्तरं देवं परमेश्वरपूर्वकम् ॥१०५॥

न्यसेत् (?द्वै) द्वितयं पश्चात् पुरुषं [2]केसरावधौ ।
पत्रे त्वष्टविधां चैव पूर्वादौ प्रकृतिं न्यसेत् ॥१०६॥

[3]षडात्मा षडरे चक्रे त्वष्टारेऽष्टतनुस्तथा ।
द्वादशात्मा द्विषट्कारे तदात्मा षोडशारके ॥१०७॥

त्रिरष्टधा च प्रकृतितत्त्वभेदस्तथा पुनः ।
द्विर्द्वादशारके पूर्वे क्रमशः शक्तयस्त्रयः ॥१०८॥

[4]द्विषोडशारसंख्याते [5]शेषं शक्तिद्वयं हि यत् ।
[6]अरद्वये चानिचया (?च निचयात्) प्रागुक्तं नाभिनेमिषु ॥१०९॥

---

[1] क–ख–दोषासक.... कृतात्मना
[2] क–ख–सेश्वरं वधौ
[3] क–ख–षडात्मविद्धरे
[4] ग–द्विषोडशाखी घ–द्विषोडशार ख–द्विषोडशारे
[5] क–ख–शष.... न्तिचयं
[6] क–ख–पुरद्व रे चानिचया ग–अरद्वरे चानीया घ-अरद्वये चानियता

[1]ऋग्वाद (?ग्वेदा) द्याम्बुजानीया यथा चानुक्रमेण तु।
पूर्वमुक्ता(?क्तः) सहस्राख्या (?ख्यो) यो मन्त्रनिचयो महत्
(?हान्) ॥११०॥

[2]तमेव विन्यसेन्मन्त्रे (?न्त्रं) त्वेकीकृत्यादिकु (?तोन्ति) मम्।
इष्ट्वा शरीरचक्रेऽस्मिन् पुण्डरीकोदरे पुरा ॥१११॥

नित्यशुद्धैस्तु विधिवै (?विधै) दुर्व्यै (?र्दिव्यैः) सङ्कल्पयोद्भिकैः।
क्रमेण हृदय (?ग्रामे) अवतार्य शनैःशनैः ॥११२॥

उष्णदीधितिमार्गेण भ्रमणे चक्रज (?जे) न्यसेत्।
मन्त्रग्रामं तु निखिलं विद्युत्पुञ्जनिभोज्ज्वलम् ॥११३॥

दिव्योपकरणं (?णे) नाथ यथाप्राप्ते (?प्त्ये) व संयजेत्।
विसर्जनावसानं च यावत्कालं यथेच्छया ॥११४॥

देहचक्रारविन्दे यः प्रविशंस्तं (?तं) विचिन्तयेत्।
द्विसप्तशब्ददेहं तु तन्मात्रानिचयं महत् ॥११५॥

पथाऽमृतविवाहेण स्वे स्वे स्थाने नियोजयेत्।
विसर्जनं तदाह्वानमवतारं च नान्यथा ॥११६॥

---

1 क–ख-वादद्याम्बुजोनीया ग–घ–ऋग्वादद्यांबुजानीय।

2 क–ख–तमेव विन्यसोनि····मम।····पुण्डरीकोदरे पुरा
नित्यशुद्धे ·· विघवैंदुवैंसिकल्पयो द्विकैः। क्रमेण हृदय····वतार्य शनैश्शनैः।।
उष्णदीधितिमार्गेण भ्रमणे चक्र····।···ग्रामं तु निखिलं विद्युत्पुञ्जनिभोज्ज्वलम्।।
दिव्योपकरणं नाथ यथाप्राप्ते····व्रजेंत्
विसर्जनाद्यस्ना नंच यावत्कालं यथेच्छया ।।

[1]नाभ्यागमो (?गमे) नैव (?देहेऽ) स्मि च (?स्मिश्च) विसर्जनम्।
साधकेभ्यः स्वमन्त्रस्य नित्यं यस्मान्न तन्मया (?मयं) ॥११७॥

आगच्छेति च यद्ब्रूते [2]त्वात्मन्यामन्त्रमात्मवित्।
जनार्थमपि साम (न्त्रं) भवामि भगवन्मया (?ये) ॥११८॥

[3]एतदावाहनं चान्यदादरात् प्रेरणं बहिः।
पूजावसानकाले हि गच्छेत्युक्त्वा भृतिं न्यसेत् ॥११९॥

गच्छामि भगवंश्चाहं मन्ये कर्मणि मे क्षमम्।
एतव्याच स (?एतद्व्याहृत्य) शक्तीनामावाहनविसर्जनम् ॥१२०॥

सर्वगाणाममन्त्राणा [4]मुक्तं न त्वितरेषु वै।
तेषामगञ्च (?मागच्छ च) वै गच्छ? कर्मस्वेति यथा स्थितम् ॥१२१॥

ज्ञात्वैवं च यजेत् पश्चाद्देवाचक्रेति भूगते ॥१२२॥

पौष्कर उवाच—

इदं शरीरं भगवन् [5]ज्ञातं च व (?क्राब्ज) वत् कथम्।
[6]सञ्जितं च त्वयाऽद्यापि त्वामस्य (?)च परस्य च ॥१२३॥

---

1 क–ख–नाभ्या…विसर्जनम्

2 क–ख–त्वामान्यं मन्त्रमात्मवित्

3 ग–घ–एतदाहामनं चान्यदाद्यात्

4 क–ख–मत्तं

5 ग–घ–ज्ञानं च वव? तत्कथम्

6 सवितं ज मयाद्यापि

अक्षाद्य (?र) नेमिपर्यन्ता साम्बुजावयवा तथा।
शरीरेऽस्मिन् महाभूत (?ग्राम संघ) मये प्रभो ॥१२४॥

श्रीभगवानुवाच—

कदली पूर्व (?लीपर्वं) वद् ब्रह्मन् शरीरं [1]प्राकृतं त्विदम्।
ययो (?मह) द्वियद्गुणा वायुतेजश्चाप्युदकं नर (?धरा) ॥१२५॥

सपद्मा (?द्म) मात (?मोत) देहाख्यं चक्रसाराय····व(।चक्राग्रवयवं)
स्मृतम्।
संसिध्दा चाष्टधा बुद्धि (द्धिः) [2]कमलाख्य (?ख्या) (चक्र)
मध्यमा ॥१२६॥

[3](यद्गो) पकं नामिनिचयं विज्ञतदगुणसूत्रयम् (?विज्ञेयं तद्गुणत्रयम्)।
गुणत्रयस्य बाह्ये तु तस्मिन् सर्वं प्रतिष्ठितमू ॥१२७॥

समीपवस्ति (?र्ति) वैयोस्ते···
[4]ज्वालाचक्रसहस्रेण संख्या (नं) स्वेच्छया भवेत् ॥१२८॥

ब्रह्म (?न्) मूर्तिवशाच्चैव [5]त्वाधारस्वस्वराध (?द) यः।
ततस्त्यज्य गणं विद्धि[6]देहचक्रेष्वरागतम् ॥१२९॥

---

[1] ग–घ–प्राकृते

[2] ग–घ–कमलाखममध्यमा

[3] ग–घ–खोपकं नाथिनिचयमविक्षे तदगुणत्रयम्

[4] ग–ज्वालाचक्रेण संख्येरा····स्वेच्छया भवेत्

[5] क–ख–धातारः स्व स्व

[6] चक्रेष्वरागतम्

धाराचक्रधरं तोयं संस्थितं तेजसोरपि [?परि]।
अच्छिन्नया च वै व्याप्त्या आपादतलमस्तकात् ॥१३०॥

सहस्रनाडीरूपेण ज्ञेयं प्रति (?घि)गणं तु यत्।
इच्छाराध (?धार) कवत्तास्यं (?क्तस्याः) कल्पनां नित्यमाचरेत् ॥१३१॥

सर्वसन्देहनाडीभिर्वृद्धित्वेन तु पौष्कर।
संस्थिता तोयमावृत्य धारा पञ्चगणा [?दः] बहिः ॥१३२॥

अनेन रुचिभेदेन [1]विद्धि तन्नेमिमण्डलम्।
व्यक्ताव्यक्तविभागेन धियाद्येत गुणेन च ॥१३३॥

भूयो भूयस्तु [3]वैघाप्या (?वै ज्ञाप्या) [4]कृत्योच्छिन्नं (?कृत्वोच्छिन्न)
मया द्विज।
संस्थितं कच्छ (?ल्प) नीयं वै देहमिश्रस्य सर्वगम् ॥१३४॥

बहिरन्तर्विभागेन द्वीपसागरवत् क्रमात्।
इत्येतत् कथितं सर्वं यत् त्वया चोदितोऽस्म्यहम् ॥१३५॥

नि [?धानं] देहचक्रस्य विज्ञात्वाऽमृतमश्नुते।
षाड्गुण्यविग्रहेणैव अच्युतेनाव्ययात्मना ॥१३६॥

सर्वेश्वरेण विधिनाऽधिष्ठितं परमात्मना।
बोद्धव्यं विग्रहातीतमेतद्देहं (?तं देहं) महामते ॥१३७॥

---

1 क–ग–विदितोनेमि

2 ग–घ–त्वन्योच्छिन्नं

3 क–ख–ग–देवमिश्रस्य सर्वदा

गृहद्द्वारोपरिस्थं (?ष्ठं) संविदक्षादतीन्द्रियम् ।
[1]तत्पाप्ति [दं]महाज्ञान (म्)······वरम् ॥१३८॥

[2]बोधवृत्कर्तु तद्वृत्त[3]मस्मिंस्तारं द्विजोत्तम ।
अ:भकोरमहानेमि (?अउमकारो) महानेमिस्त्विव (?स्त्वि) न्द्रि ।
य प्रथिताक्षयः (?या प्रधिष्वक्षयः) ॥१३९॥

प्रलयानिलरुचिस्तद् वता (?वृत्त) मग्रवृत्तय (?क) म् ।
[4]सन्धानानन्दको जालं (? कोज्ज्वालं) प्रकृतं परमेश्वरम् ॥१४०॥

नित्याभ्यासरतानां च श्रध्दासंयमसेविनाम् ।
भावभूतिसमं याति भक्तानां पुरुषोत्तम (?मे) ॥१४१॥

मन्त्रेशप्रतिमा जीवा(?र) तिष्ठते (?न्ति) तन्महागृहे ।
एवं बृध्दया समारोप्य कृत्वा जाम्बुनदादिकैः ॥१४२॥

[5]तत (?तो, नेमिपथे न्यासं [6]सर्वकण्ठोत्थितं तु वै ।
मानं शिखरवेदीयमे[7]ककध्ठोज्झितं त्वथ ॥१४३॥

---

[1] ख-तत्पाप्तिमहाज्ञान''''ततानाभित्वन ग-तत्प्राप्तिममहाज्ञानं नानानाभित्वनं घ-एतत्प्राप्तिमहाज्ञानं ¨ नानांभत्वनं

[2] ग-घ-बोधधृक् कर्तुतावृत्त

[3] क-ख-म'''तारं

[4] ग-घ-सङघानानन्द

[5] ग-घ-तते नेमिपथं

[6] क-ख-सकर्णोसितं

[7] क-ख-मेकण्ठोसितं त्वया

कण्ठात् कर्ण (?ण्ठ) गतं चान्यत् पीठं (?ठं)[1]दैर्घ्यं समं स्मृतम् ।
द्वारविस्तारगर्भस्थं तुल्यापो (?थो) नेमिभूस्तथा ॥१४४॥

कुर्यात् प्राच्यपदोद्देशाद् बालेन्दुश्रृङ्गलक्षणम् ।
तत्क्षेत्रं सूत्रमानेन सार्धेन द्विगुणेन वा ॥१४५॥

लाच्छये[1]दन्तरावर्तं प्राक् सूत्रं तु सपक्षयोः ।
मध्यात् पश्चिमभागेऽथ नातिदूरं ध्रुवार्चने ॥१४६॥

निधाय मध्यसूत्राभ्यां सूत्रमभ्यन्तरक्षिते (?तौ) ।
संमुखं वायुकोणस्य यत्रस्थं चार्कसंनिधिम् ॥१४७॥

नेमेरपि पदे बाह्यं सौम्यं समुपयाति च ।
लाञ्छयेत् तेन तत् क्षेत्रं तदङ्गात् तत्पदावाधि ॥१४८॥

एवं निजनि (?निर्ऋति) कोणस्तु (स्य) सूत्रेण च(?त्व)रलाञ्छनम् ।
याम्यदिक् पदपर्यन्तं पराद (?दाद) न्तु (?न्तं) समाचरेत् ॥१४९॥

[3]सिद्धिसौम्यप्रभा यस्यात् (?स्याः) त्रयं यत् परितोऽक्षयम् ।
[4]तेषां चक्रवादि···मुखस्य च ॥१५०॥

यथावास्थितनेमि वैं······ ।
मुनिसिद्धामराणां च सर्वलोकनिवासिनाम् ॥१५१॥

---

1 –ग–घ–देप्य दैर्घ्यमिति स्यात्

2 ग–घ–दन्तरे वृत्तं

3 क–ख–सिचि···प्रभाः स्या···परितोषय

4 तेषां च प्रभाचात्रिरध्य···मुखस्य च

सोम्यप्रभा नियत्या मा (?या)आनन्दयति वा दिशः।
[1]संपदोऽर्कयितं (?युतं) पर्वं नेमिमानं तदन्तरे ॥१५२॥

दत्त्वा विभज्य वै यूप (?पं) [नाभि] निष्ठं हि सप्तधा।
चतुर्भिश्चतुरङ्गं तु [2]मध्येऽब्जं द्वादशच्छदम् ॥१५३॥

तुर्यांशं पञ्चमाद् भागाद् दलभूमौ दलं (?लयं) नयेत्।
तन्मानेन समापाद्य दलाग्रवलयं शिवम् ॥१५४॥

तच्छेद्यविस्तृतं चक्रं [3]वृत्तद्व्यंशोन्नतारकम्।
[4]प्रा(?क् प्रत्यक्) सलक्षणं कुर्याद् द्विगुणं पत्रसंतते ॥१५५॥

[5]नीलनीरजपत्राख्या मातुलुङ्गोपमास्तु (? तु) वा।
कर्तव्यं (?व्या) तद्गता शुद्धा परश्वाख्याऽयत्रोद्यया (?ता) ॥१५६॥

पूर्वोक्तविधिनाऽऽपाद्य नेमिमानं तदन्तरे।
त्र्यंशोत्थितं वा पादोनं मध्यहीनव्यपेक्षया ॥१५७॥

दत्त्वा संसक्तपत्रं च लिखेत् पद्म सुलक्षणम्।
दिक्चतुष्कं तु चाक्षय्यं युक्तं काष्ठद्वयेन तु ॥१५८॥

---

[1] ग–घ–संपद्दोजुधितं पर्वं

[2] क–ख–मध्येंशं

[3] क–ख–वृत्तद्वयंशौ तु कारकम्

[4] ग-घ-प्राक् क्वास?

[5] क–ख–नीलनीरद

प्रभानेमिविहीनं च [1]हिन्दिशब्देन मन्दिने (?)।
प्रच्छाद्यं चुलिकाप्रस्थं चक्रऽयासं समा च सा (?सतः) ॥१५९॥

रजतन्त्वददेकांशं सेऽयब्राह्मणरन्ध्रके।
पञ्चमांशं चतुर्थांशं नयेद्वृत्ति च तद्बहिः ॥१६०॥

[2]तस्या सो (?स्यांशा)? नेमिमानेन तुङ्गालयवशं पुनः।
[3]सम ऊनाधिकं चैव सौष्ठीसंवेष्टनं भवेत् ॥१६१॥

अक्षमध्यं समाश्रित्य चन्द्रद्वय विभूषितम्।
[4]ये…ग्रहणदक्षं च कार्यमस्य भुजद्वयम् ॥१६२॥

स्वस्थदञ्च तथादा(?का) रमऽयक्तावयवान्वितम्।
तस्य सूक्ष्मतमं रूपमापाद्यममलं तु वै ॥१६३॥

कर्मालयात् समानीय विभवेन च हेतिर (?द) म्।
प्रवेश्य यागभवनं विनिवेश्योचिते यते (?पदे) ॥१६४॥

ध्यात्वाऽभिमानिकेनैव रूपेणास्त्रगणैः स्मृतम्।
[5]भगवद्बिम्बवत्तस्य स्थित्यर्थं सर्वमाचरेत् ॥१६५॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
मिश्रलक्षणो नाम
नवमोऽध्यायः

---

[1] सर्वत्र समान्यक्षराणि
[2] तद्व्यास इति स्यात्
[3] क–ख…ऊनाधिकं
[4] ग–घ–येणाग्रहण
[5] क–ख–भगवान् बिब

अथ दशमोऽध्यायः

पौष्कर उवाच—

[1]प्रथ (?धि) मानं जगन्नाथ त्वया प्रोक्तं नवात्मनि ।
[2]ऐहिकामुष्मिकं (?के) सिध्यै यष्टव्यं तत्र कथं वद ॥१॥

यागः किंलक्षणस्तस्य भेदतः संस्थितस्य च ।
[3]कानि ते नवपद्मानि (?तत्सर्वं कथयस्व मे) ॥२॥

श्रीभगवानुवाच—

यो वै ब्रह्माधिपत्येन चातुर्व्यूहव्यवस्थितः ।
वासुदेवादिभेदेन त्वनिरुद्धावसानतः ॥३॥

ततो नारायणो मूर्तिर्विराडात्माधि (?हि) पौष्कर ।
[4]स्थितावधिपतिर्विष्णु [5]मूर्तायुधधरः (?प्रभुः[6]) ॥४॥

[7]सत्त्वरूपावधाद्देवः नृसिंहधरणीधरौ ।
[8]नवप्रकृतयस्त्वेताः शक्तित्वेन व्यवस्थिताः ॥५॥

---

1 ख–प्रथिमानं ग–घ–प्रथमान्यं तु
2 ग–घ–ऐंहिकामुष्मिको सिद्धो
3 क–ख–कानि ते नवमत्यानि सान्त्यनीवच सिद्धि?
ग–घ–कानि ते नवमन्धानि सान्यनीवचंशंसिद्ध?
4 क–ख-स्थितावधोवतिः
5 क–ख–मर्तायुध····रः
6 क–ख–ग–घ–प्रभा
7 ग–घ–सत्वारूपावधाद्दैवो
8 क–ख–नयप्रकृत····स्वेता····क्ति ग–घ–नयप्रकृततेस्वेतात् त क्तित्वेन ।

अचिन्त्यस्याप्रमेयस्य व्यापकस्यामलस्य च।
(?निष्क्रामन्ति)[1] द्विजे तत्र परस्य परमात्मनः ॥६॥

अनुग्रहपराश्चेमं? (?मे) मग्नानां च भवोदधौ।
महापावक[2]वद्यावत् स्फुलिङ्ग[3]निचयो महान् ॥७॥

[4]स्फुर (?त्प्रभाभ्यां) दीप्ताभ्यां तस्माद्यच्छक्तयस्तथा।
अक्षुब्धस्याम्भसो यद्वद्बुद्बुदाः संभवन्ति हि ॥८॥

[5]तव (?द्वद्‌याःशक्त) यस्तस्य शक्तीशस्य महात्मनः।
शक्तिं व्यञ्जन्ति तासां ते त्वजारूपास्तु शक्तयः ॥९॥

सर्वास्ता वासुदेवाद्या रूपैर्नानाविधैर्द्विज।
अतः स्वाभीष्टसिद्ध्यर्थं संपूज्याः संयतैः सदा ॥१०॥

[6]न त्वाधारं विना पूजां गृह्णन्ति व्यक्तयस्तदा।
तस्मादादौ प्रयत्नेन कुर्यादासन [7]कल्पनम् ॥११॥

आसनं सर्वसामान्यमम्बुजं पीठमध्यगम्।
नवात्मनि विशेषेण विम्बौघं पीठसङ्घगम् ॥१२॥

---

[1] क-ख–निषुमंति ग-घ–निष्टमंति
[2] ग-घ–यद्यद्वत्
[3] क-ख–निचयं महत्
[4] ग घ–स्फुरत्कर… दीप्ताभ्यां
[5] ग–घ–तवास्तिशक्तय
[6] ग–घ–नान्यधारं विना
[7] ग–घ–कल्पनाम्

कृत्वा चैव सपद्मं तु [1]तत्रावाह्य यजेत् क्रमात्।
पद्माधारं तु यद्बिम्बं तानि मे गदतःश्रृणु ॥१३॥

व्यक्तौ वा वासुदेवाख्या सर्ववृत्तं प्रकीर्तितम्।
ज्ञानरूपक [2]गोलत्वात् सर्वदिग्व्यापको यतः ॥१४॥

व्यक्त्या संकर्षणाख्यं तु पुण्डरीकनिभेक्षणा।
[3]पद्मस्त्रग्धारिणी सा च नित्यं पद्मासनप्रिया ॥१५॥

भवन्ति वृत्तये सर्वं [4]तदिच्छातः प्रवर्तते।
पङ्कजात् पङ्कस(?ग्वसं)ख्यं च सूक्ष्मं विभवलक्षणम् ॥१६॥

पद्मपद्मान्विते तात स्त्रग्वरे कमलोदरे।
[5]ध्यायेद्दृष्ट्वा ततःस्तुत्वा ह्यश्नु? ब्रह्मन् न मोक्षयेत्
(?ब्रह्मन् मोक्षं समश्नुयात्) ।१७॥

द्योतःसर्वभवानां वा कालादीनां तु सर्वदा।
आधारे कालकालाख्ये (?चक्रे) नदः (?चु) प्रपूज्यते ।.१८॥

[6]प्रद्युम्नरूप (?जो) त्पत्तिर्यतो (?थो) र्वां द्योतलक्षणा।
सर्वतश्चानु(?नि)रुद्धत्वादथाधारे तदात्मके ॥१९॥

---

1 ग-घ-तत्र बाह्ये
2 ग-घ-गोलत्वं सर्वदीर्घापगो
3 क-ख-ग-घ-पद्मस्त्रग्वारिणी
4 क-ख-तदिच्छान्ततवर्तते ग-घ-तदश्चान्त प्रवर्तते
5 क-ख-ध्यायेध्वात्तस्तुत्या मह्यमश्नु ब्रह्मन् हि मोक्षयेत्
6 क-ख-ग-घ-प्रद्युम्नरूपग्रत्वक्तिर्विदो विद्योत

गतौ चैव हि सूर्याख्ये बिम्बे [1]तदुपलक्षणे।
शक्तितत्त्वेऽनिरुद्धाख्ये पूजितस्संप्रमोचयेत् ॥२०॥

[2]शक्तिर्नारायणाख्या या स्वमूर्तिः परमेश्वरी।
भूत्वा चा (?चो)ग्रमदे (?यै) भा(?र्भा) वैः सर्वमाप्याययेज्जगत् ॥२१॥

अतोत्म (?तेजोभ)येतु? चाधारे ह्यर्धेन्दुसदृशे सिते।
संपूजितानि गृह्णानि(?न्ति) पा (?प) रे? धामनि योजयेत् ॥२२॥

ब्रह्मदानक्षमा शक्तिर्वैराजधनुधारिणी।
त्रिस्कन्धे मण्डले पूज्या यतो ज्ञेया त्रयीमयी ॥२३॥

वितते (?सं) स्थिते सर्वामुपसंगृह्णते तथा।
कूर्मोऽङ्गानीव भयतो ह्यतः [3]संपूजितः प्रभुः ॥२४॥

कूर्मोदरगते पद्म (?द्मे)नियुते (?तु) क्रियापरे।
शक्त्यात्मा भगवान् विष्णुःशङ्खचक्रगदाधरः ॥२५॥

या च सै(?चैषा)हि विभोःशक्ति [4]मूर्तिर्ज्ञानापदेशिनी।
मयै(?उच्चै)र्गभीरनिर्घोषशब्दो येन तु लीलया ॥२६॥

सम्यक् प्रणवरूपेण तस्माच्छङ्खोदरे सदा।
साधर्म्यलक्षणे बिम्बे पूजिता कमलोदरे ॥२७॥

---

[1] ग–घ–तद्रूपलक्षणे
[2] क–ख–शक्तितश्चानिरुद्धाख्यं पूजितस्यं
[3] ग–घ–स्संपूज्यते
[4] क–ख–ग–घ–मूर्तिर्ज्ञानपदाशनं नी

[1]भवत्यहरिकी (?भीतिहरी) शीघ्रं क्षयत्रं (?यित्री) कल्मषस्य च।
यज्ञाङ्गते (?जा) ॰ययाशक्तिः [२]कुंभोदरगताम्बुजे ॥२८॥

इष्टा फलप्रदा सम्यग्भवते विधिनाशना? (?भीतिविनाशिनी)
विस्तारं तेऽथ तत्त्वस्य लक्षयित्वा प्रकल्प्य च ॥२९॥

बहिराग्नेयमाधारमग्नेर्वं (?श्च) स्तथैव च।
एवं ध्रुवस्वरूपं च स्थिरं कृत्यज (?त्वा ततो) द्विज? ॥३०॥

ततः प्रविश्य तन्मध्यं क्षमातत्त्वं तपस्थितम्।
ऊरूकृतां स्ववीर्येण जले निवसतां सती (?तां) ॥३१॥

निहत्य जलजाद्दोषाद्भूमिसृष्टिं चकार च।
प्राजापन्येन विधिना ततः करणमाश्रयेत् ॥३२॥

एतस्मात् कारणाद्ब्रह्मन् पूज्य कुम्भोदराम्बुजे।
वाराही भगवद्व्यक्तिर्नीलजीमूतसन्निभा ॥३३॥

[३]एवं स्त (?ताः) शक्तयः पूज्या परिवारसमन्विताः।
नवपीठे महाभागे तं च कृत्स्नं वदामि ते ॥३४॥

येन सन्दृष्टमात्रेण भवबन्धक्षयो भवेत्।
क्षेत्रं द्विरष्टधा कृत्वा समैर्भागैस्तु पूर्वदिक् ॥३५॥

---

1 ग-घ-भवत्य हरि खो?

2 क-ख-कुर्योदरगतं भजे

3 ग-घ-एवमस्त्रशत्तयः

कृते संविभजेत् पश्चाद्भागं षोढा तु लाञ्छयेत्।
यथा जायन्ति भागानां सहस्राणि निवारवम्? (?नवात्मनाम्) ॥३६॥

शतद्वयं शतामन्ये? (?तथाचान्ये) मन्ये (?ध्ये) षोडश[1]कोष्ठगा (?का)।
एवं संपूजयित्वा तु क्षेत्रं स्वं विततं द्विज ॥३७॥

चतुर्विंशत्यत्र (?त्यंश) करं? यजनार्थं नवात्मनि।
साधनीयात्म (?नि) मध्ये तु मण्डलानवक(?नि नव) क्रमात् ॥३८॥

द्वारशोभाश्रियुक्तानि तानि वीर्यै (?थी) युतानि च।
[2]मध्ये तत्र च युक्तानि समानि विषमाणि च ॥३९॥

शतार्धेन षड्नेन [3]त्वंशकानां शतेन तु।
कल्पयेत् क्षेत्रमध्ये तु मण्डलं प्रथमं द्विज ॥४०॥

चतुर्द्वाराणि [4]पीठाद्यं बैम्ब (?म्बं) क्षेत्रविभूषितम्।
मध्य (?ध्ये) षट्त्रिंशदंशानि प्रथमं परिमार्जयेत् ॥४१॥

विम्बायापि (?वनी) तु सा ज्ञेया पीठ (?ठं) पङ्क्त्या तु तद्बहिः।
[5]तस्मादवि (?पि) गमांशानां मध्यतो दिक्षु लोपयेत् ॥४२॥

---

[1] क–ख–गोष्ठका

[2] ग–घ–ध्येतक्षेत्रयुक्तानि

[3] क–ख–अंशकेनांशकेन तु

[4] क–ख–पीठाद्यं

[5] ग–घ–तस्माद् द्वि द्विगमांशानां

[1]ईशाग्नियातुसामीरकोणेष्वच (?थ) त्रयं त्रयम् ।
द्वाराणि च सकोण (?णानि)भागं? पञ्चपङ्क्ति (?पङ्क्ति) द्वयेन तु ॥४३॥

[2]चतुर्दिक्ष्वन्तरा पङ्क्तौ कर्णा(?ण्ठा)र्थं कोष्ठकद्वयोः ।
उपकर्ण (?ण्ठ) प्रसिद्ध्यर्थं तद्बाह्यं तु चतुष्टयम् ॥४४॥

शोभं चतुर्थकोणस्थमंशकानां त्रिकद्वयम् ।
कृत्वैवं मण्डलं मध्ये [3]बाह्यतस्तस्य मार्जयेत् ॥४५॥

वीथ्यर्थं पङ्क्तिषट्कं तु [4]प्रागुदग्याम्यपश्चिमम् ।
अथ क्षेत्रस्य [5]पूर्वात्ममण्डलं मध्यते? (?तो) परम् ॥४६॥

भागैः पूर्वोक्तसंख्यैस्तु मार्जयेत्तद्वदेव हि ।
तस्य शोभान्वितं तद् स्याच्चतुर्दिक्ष्वब्जसंभव ॥४७॥

स्थानं [6]संसाधयन्नेषां (?द्वारसंसाधनं तेषां) शोभानामवधारय ।
द्वारपार्श्वद्वयं (?ये) कुर्याच्छुभं शोभाद्वयं द्विज ॥४८॥

तदर्थं बाह्यपङ्क्तौ तु एकांशं त्रीण्यतोऽन्तरात् ।
[6]सांप (?श; कोष्ठकमायातु (?त्तं) पर्यस्त (?स्तं) द्वन्द्वन्द्र
(?तदद्वयं) वेत् ॥४९॥

---

1 क–ख–ईशाग्नेय तुसारो
2 क–ख······क्ष्वन्तरा
3 क–ग–घ–बाह्यास्ततस्त
4 ग–घ-प्रागुदग्यम
5 ग–ट–पूर्वंत्र मध्यशो
6 ग–घ–संसाधनं नेषां
7 ग–घ–सांपकोष्ठक्रमायां तु

समीपवर्तिशोभस्य कोणं [1]चापथकः पयेत् (?चाप्यथ कल्पयेत्)।
उभाभ्यामपि पङ्क्तिभ्यामंशषट्को (?के)ण पूर्ववत् ॥५०॥

मार्जयेद्वीथिसिद्ध्यर्थं दिक्त्रयात् पूर्वमेव तु।
पङ्क्तिषट्कं तुकाभानां? (?भागानां) याम्योदक्पूर्वदिक्त्रयम् ॥५१॥

अनेन विधिना कुर्यादंशां (न्) कुर्याच्च लोपयेत्।
यथा न हीयते संख्या नवपीठेति या स्थिताः ॥५२॥

प्रकल्प्य विधिनाऽनेन विधियुक्तानि पौष्कर।
तल्लङ्घनं स्यादस्त्रस्य तद्द्वारोपगतस्य च ॥५३॥

अंशपङ्क्तिद्विषट्को (?के) णदिक्षु द्वारचतुष्टयम्।
कुर्याच्छोभाष्टकं चैव तूपशोभाष्टकं तथा ॥५४॥

चतुष्टयं च कोणानां रेखाणां त्रितयं बहिः।
शतमष्टाधिकं चैव द्वारं (?राद्) द्वारात्तु लोपयेत् ॥५५॥

अशीत्येकाधिकाद्भागात् प्रतिशोभाच्च मार्जयेत्।
उपशोभप्रसिद्ध्यर्थं तावत्तच्चांशकं स्मृतम्। ॥५६॥

एकैकं मार्जयेत् कोणं क्रमशोनं च तत्त्रयम् (?शतत्रयम्)।
प्रागेव कल्पनं कृत्वा ततस्साधनमाचरेत् ॥५७॥

---

[1] क–ख–ग–घ-समान्यक्षराणि

[2] क–ख–कुर्याद्दशां कुर्याच्च

द्वारस्य वीथिबाह्यात्तु शोध्यः पङ्क्तित्रयाद्धिति (? त्विति)।
षडंशमंशकानां तु [1]स्याद्यथाष्टादशांशकात् ॥५८॥

जायते द्वारकर्णं तु चतुरश्रायतं समम्।
कर्णबाह्ये ततो ब्रह्मन्नुपकर्णप्रसिद्धये। ॥५९॥

पङ्क्तित्रयं मार्जनीयं भागद्वादशकान्वितम्।
यथा षट्त्रिशदंशानि मर्जितानि भवन्ति हि ॥६०॥

अथोपकर्णबाह्ये तु द्वाराघारं प्रकल्पयेत्।
उपकर्णोपमं रम्यं [2]तदान्यत् कमलोद्भव ॥६१॥

भागपङ्क्तित्रयं चैव युक्तमष्टादशांशकैः।
त (?म) र्दनीयं [3]यदा यस्या पञ्चाशच्चतुरा (?रो) धिका ॥६२॥

लुप्त्वैवं तु भवेद्द्वारं [4]त्रिपुनस्त्वादिश (?त्रिपङ्क्तियुतं) न्त्वतः
द्वारगार्श्वोपगं कुर्याच्छोभा (?भं) त्तस्मात्तु लोपयेत् ॥६३॥

द्वारकर्णसमीपाच्च [5]अंशपञ्चदशान्वितम्।
पङ्क्तित्रयं तु वै ब्रह्मंश्चत्वारिंशद्यथाक्रमात् ॥६४॥

---

[1] क-ख-सन्यधा

[2] ग-घ-तदद्य

[3] ग-घ-यथाग्रस्य

[4] ग-घ-त्रपुरंत्वादृशं ततः

[5] क-ख-अंशपञ्चदश

[1]पञ्चाधिकाश्च (?कं च) जायन्ते (?येत) संख्यामानं तु पौष्कर।
ततो (?ह्यु) पकर्णनिकटान्नवभागसमन्वितम् ॥६५॥

त्रितयं चैव पङ्क्तिभ्यां लोपनीयं प्रयत्नतः।
जायते संख्यमानं तु···सप्तविंशत्यंशका (?न्वितम्) ॥६६॥

तद्वा (?द्वारा) धारसमीपात्तु अंशकत्रयसंयुतम्।
पङ्क्तित्रयं शोधनीयं [2]यथास्य···ष्टयम् (?स्यान्नवकोष्ठकम्) ॥६७॥

शोभं बाह्याद्याल (?लु) प्तमुपशोभा (?द्वा) न्तरात्।
संपाद्य चोपशोभं वै कोणशुद्धिं समाचरेत् ॥६८॥

प्रतिपङ्क्तित्रयाच्चैवमादिमध्यबहिर्मता।
नवाधिकानि नवति कोष्ठकानि तु मार्जयेत् ॥६९॥

यावद्भवन्ति (?ति) भागानां त्रिभिरूनं शतत्रयम्।
द्वाराधारं ब (?रब) हिस्ते (?ष्ठे) न भागं प (?गप) ङ्क्ति त्रयेण तु ॥७०॥

प्रतिवारणरेखाणां त्रितयं पञ्चकं तु वा।
अथवा पट्टिकानां तु सम्पाद्या वै परानना ॥७१॥

भवन्तम (?संत्वतिर) परद्वारे कुर्यात् क्षेत्रस्य पौष्कर।
रेखागण तु तद्बाह्यान्मार्जं? (?ज्यं) वा पट्टिकात्रयम् ॥७२॥

---

[1] क–ख–पञ्चाशत्वाश्च

[2] ग–घ–यथास्युर्नचकोष्टयं?

विस्तीर्णमस्त्रविविधा (?धिन) यदि वेच्छसि पौष्कर।
तदर्धं (?र्थं) पङ्क्तिनवकं मार्जयित्वाऽधिकल्पयेत् ॥७३॥

द्वारादीन् पदषट्कोणान् (केण) प्रागुक्तेन क्रमेण तु।
पङ्क्तिद्वयं द्वयेनैव द्वारकर्णादिको? (?तो?) द्विज ॥७४॥

संख्याना (?न) मंशकानां तु मण्डलं द्वि(?लाघव) यवेषु च।
त्रिपङ्वितह्रासाद्वोद्व्यं स्वयं किं कथये न तु(?ननु) ॥७५॥

संशोध्य मण्डलानां तु प्राङ्मध्ये विम्बसन्ततिम्।
द्विकप्रमाणे (?ण) रेखासु समासु सुसितानि (?सु) च ॥७६।

कृत्वा चैव परिच्छिन्ने विम्बबाह्यात् क्रमेण तु।
रञ्जये [1]द्विविधा (?पविधिना) नेन क्षेत्रं वै ह्यनलान्वितम्॥ ॥७७॥

विम्बैर्विना बता? (?वृत्त) बाह्य पाण्डुरक्तेन चात्र वै।
राजपाषाण [2]तुल्येन पैठीयं (?थ) चरणावल (?लि) मू ॥७८॥

[3]शतधारनिभेनाथ तद्गात्रं कवच च यत्।
तुषारारुणभेदेन नृपोपलनिभेन वा ॥७९॥

पूरयेद्रागपीतेन पीठकोणचतुष्टयम्।
समारभ्य तु चैशानाद्यावत् कोणं तु मारुतम् ॥८०॥

---

[1] द्विधिना इति स्यात्

[2] ग–घ–तुल्येन···वैधे चारणा

[3] ग–घ–शतधामनिभेना

यागक्रमेणानेनैव [1]त्वाप्योदक्पूर्वदक्षिणम् ।
दिक्चतुष्कं तु [2]वैरस्वं? (?वैडूर्यं) द्वाराणि सुसितेन च ॥८१॥

रक्तोज्ज्वलेन रागेण पूरयित्वा कजं द्विज ।
अन्तरात् (?न्) पाण्डुरक्तेन [3]होमद्रोनो (?हेमाभेनो) पशोभकम् ॥८२॥

[4]मध्यात्मन्तात? (मध्योत्थितान्त) भेदेन पूरयेत्तदनन्तरम् ।
हेमाभेनाथ वै मध्याद्बाह्यान्मरतकेन तु ॥८३॥

रक्तोज्ज्वलेन कोणानि [5]केवलेनाथवा द्विज ।
सह वै पाण्ड (?ण्डु) रक्तेन रञ्जनीयानि तेन वां ॥८४॥

यथाविभागसंस्थेन तन्मे निगदतः शृणु ।
अंशपङ्क्तित्रयोत्थेन [6]कोणमानस्य मध्यतः ॥८५॥

पाण्डरोज्ज्वलरागेग पूरणीयं तदन्तरात् ।
रक्तोज्ज्वलेन रजस रक्तेन च विभूषयेत् ॥८६॥

रक्तोज्ज्वलेन वा मध्याद्रागेण परिपूरयेत् ।
आद्यन्तात् पाण्डुरक्तेन रजसा क (?श्या) मलेन च ॥८७॥

---

1 ख–ख–त्वा···व्यो···पूर्व

2 ग–घ–वैरस्थ?

3 सर्वत्रैकरूपं हेमाभेनोप इति स्यात्

4 ग–मध्यात्थताताभेदेन घ–मध्यात्मताता

5 क–ख–केवलानि···

6 ग–घ–कोणमानेन

कर्णात् कर्ण(?न्तरं)पासूत्रा (?सूत्रं) दत्वा कोणाद्विमा (?भा) जयेत्)
रक्तोज्ज्वलेन भागैकं पाण्डुरक्तेन चापरम् ॥८८॥

[1]प्राग्वद्वा वैपरीत्येनाप्यर्धमर्धेन रञ्जयेत् ।
रजसा तु यथार्थार्थम (?सा)स दृश्येन राजते ॥८९॥

[2]नग्ना (?वा) श्रिविधिनानेन बाह्यं (?ह्य) रेखास्वतादिता (?स्सितादिना)
रेखानां चैव रागस्य स्थानभेदस्थितस्य च ॥९०॥

व्यवधानविधिं कुर्या[3]दन्योन्यरजसा तु वै ।
[4]यागोचितेन कुसुमैः पीठादि परिपूरयेत् ॥९१॥

त्यक्त्वा परार्धमाभं तु ह्येकैकास्मिंस्तु मण्डले ।
बाह्यतो द्विजरेखार्थी कुङ्कुमाद्यैरनन्तरम् ॥९२॥

[5]मण्डलभ्रमणीं सर्वामुपलिप्य सितादिना ।
.... । ॥९३॥

[6] .... ।
.... ॥९४॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
नवपद्म (?नाभ) विधानलक्षणो नाम
दशमोऽध्यायः

---

[1] क–ख-प्राग्वद्वा चैव नित्येना

[2] क–ख–नग्नाश्री···धिना

[3] क–ख–दन्योन्यारञ्जसा

[4] ग–घ–यागोत्थितेन

[5] क–ख–"मण्डल" इत्यर्धं गलितम्

[6] अत्र ग्रन्थपातः सर्वेषु कोशेषु प्रत्युत पौष्कर उवाच इत्यादिरेकादशाध्यायारम्भभागः प्रमादादविभागेन संयोजितः मातृकाचतुष्टयेऽपि

अथ एकादशोऽध्यायः

[1]पौष्कर उवाच—

वृत्तादीनां च बिम्बानामज्ञातं लक्षणं मया।
आशंस त्वं जगन्नाथ यदि सानुग्रहोऽसि मे॥

श्री भगवानुवाच—

[2]……………………………………… …………

क्लृप्ते विविक्तायागानामाधारं लक्षणान्वितम्।
मण्डलानामत्तो मध्ये बिम्बसङ्घं प्रकल्पते ॥१॥

अधमं (?प्रथमं) क्षेत्रमध्ये तु मण्डलं यत् पुरोदितम्।
तन्मध्येऽन्यं (?र्धं) परित्यज्य षोडशार्धं च भ्रामयेत् ॥२॥

ज्ञानादिगुणषट्कस्य ज्ञापकं रञ्जयेत् क्रमात्।
सितेनारुणरक्तेन जाम्बूनदनिभेन च ॥३॥

नृपशैलप्रवालाभ्यां शतं (?ततो) नीलोपमेन तु।
एतत्पादस्य मुख्यत्वं तुल्ये पीठादिके सति ॥४॥

तादृग्वा तत्र मध्ये तु कुर्याच्छोभाविवर्जितम्।
चतुरश्रं चतुर्द्वारं चापादस्य तु वृत्तता ॥५॥

---

[1] अत्र ग्रन्थपातः सर्वेषु कोशेषु, प्रत्युत "पौष्कर उवाच" इत्यादिरेकादशाध्यायाः रम्भभागः प्रमादादविभागेन संयोजितः मातृकाचतुष्टयेऽपि

[2] अत्र भगवद्वाक्यारम्भे ग्रन्थपातश्शक्यशङ्कः

तद्ब्रह्मदेशमध्ये तु सूत्रं कृत्वा प्रसार्य च।
सीमन्त [1]पीठवाग्वा (?वीथी) भ्यां? भ्रामयित्वा समन्ततः ॥६॥

भूयो वै द्वारवेद्यां तु मन्तरा? सूत्रमानयेत्।
भ्रामं तु पूर्ववत् कुर्यात् तेन सूत्रेण पौष्कर ॥७॥

प्रसार्य द्वारपर्यन्तं वृत्तं पूर्ववदाचरेत्।
वृत्तानामन्तरस्थानां [2]निर्वर्ण्य श्री····माश्रयेत् ॥८॥

द्वारोपगानि बाह्यं तु कोणानि परिशोभयेत्।
[3]व्यजने (?व्यज्यते) मण्डलं वृत्तं यत् पूर्वं सूचितं मया ॥९॥

व्यूहमध्यं भवत्येवं यदि व्यूहं विना यजेत्।
कुर्याद्द्वितीयमेकं तु····कृतं चैव वृत्तये ॥१०॥

द्विसप्तधा कृतं क्षेत्रं जायते मण्डलक्रमात्।
राज्या (?रञ्ज्यात्) सितेन रागेण सितपुष्पैस्तु पूजयेत् ॥११॥

मध्येऽत्र कमलं कुर्यात् सुसितं लक्षणान्वितम्।
कृत्वैवं वासुदेवाख्यं शक्ति (?तत्त्वं) त्वं संप्रपूज्य च ॥१२॥

[4]……………………………………………………………

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
वृत्तबिम्बलक्षणो नाम
एकादशोऽध्यायः

---

[1] ग–घ–पीठवावाभ्यां

[2] ग–घ–निर्वण्यंश्रीण्यमाश्रये

[3] 'व्यज्यते' इति स्यात्

[4] अत्र प्रतिपाद्यो विषयो न निगमितः अध्यायश्च अकाण्डे अवसानं प्रापितः कोश चतुष्ठयेऽपि दृश्यते।

अथ द्वादशोऽध्यायः

[1]श्रीभगवानुवाच—

कृत्वैवं मध्यतो विम्बं वृत्ताख्यं कमलासन।
प्राग्दिङ्मण्डलमध्ये तु पद्मस्त्रग्बिम्बव (?मु) ल्लिखेत् ॥१॥

अग्निदिङ्मण्डलं (?ले) चक्रं सूर्यविम्बं तु दक्षिणे।
ततोद्ध? चात्र (?र्ध चन्द्र) रूपं तु क्षेत्र? (?त्रे) नैर्ऋतमण्डले ॥२॥

अथ पश्चिमदिक्कुर्याद्बिम्बं त्रिस्कन्धसंज्ञकम्।
मण्डले वायुकोणं (?णे) तु मध्य (?कूर्म) विम्बं तु तत्पदे ॥३॥

परत्वेन च सर्वेषामर्चनं वा करोति यः।
वत्सरं मासषट्कं तु मासत्रयमथाब्जज ॥४॥

मासमेकं तु [2]मासार्धं नवांशदिनसंख्यया।
प्राग्वत्तस्यापि विहितं क्रमशः परिवर्तनम् ॥५॥

एतेषामधुना ब्रह्मन् शृणु संसाधनं क्रमात्।
प्रथमं पद्मचक्रस्य विम्बस्य कथयामि ते ॥६॥

---

[1] अत्र प्रश्नप्रतिवचनप्रतिज्ञावाक्यनिर्देशं विनैव "कृत्वैवं" इत्यादिना चोदित प्रतिवचनमारभ्यते। तेन प्रश्नोत्तरप्रतिज्ञावाक्ययोगः सुसन्धानः नानवसरश्च भवति अतः श्रीभगवानुवाच इति योजितम्।

[2] ग–घ–सार्धं वा

(उदङ् मण्डलमध्ये तु शङ्खबिम्बं समुल्लिखेत्।
मण्डले त्वीशकोणे तु भवेत् कलशबिम्बकम् ॥)

यदुक्तं मण्डलं (?ले) क्षेत्रं तच्चतुर्विंशधा द्विज।
विभज्य वृत्तन्यायेन (पद्म) संस्थावधेः क्रमात् ॥७॥

पीठसूत्रावधिर्यावन्मध्ये विन्दुं त्रि? (?प्र) कल्पयेत्।
भागैकादशमानेन भागः पद्माद्बहिर्भवेत् ॥८॥

भ्राम्यवृत्तद्वयेनैव भागमष्टादशं ततः।
यच्चतुर्विंशतो भागास्सुपीठनिकटे त्यजेत् ॥९॥

एवं सम्यग्यथा कुर्यात् पङ्कजं पद्मपङ्कजम् (?पञ्चपत्रकम्)
यथा तत् कथयिष्यामि समासादब्जसंभव ॥१०॥

यत् प्रवृत्तं (?यत्प्राग्वृत्त) द्वयं दत्तं मध्यात् तत् पञ्चधाऽङ्कयेत्।
पूर्वदिक्संस्थितं कृत्वा चिह्नं तु प्रथमं त्वथ ॥११॥

तच्चिह्नदेशादारभ्य कुर्यादन्यच्चतुष्टयम्।
यथागं? पञ्चगस्यान्ते समं स्याद्भागपञ्चकम् ॥१२॥

तेषु चिह्नेषु संस्थाप्य सूत्रं पञ्चाङ्गसंमितम्।
सिद्ध्यर्थं कमलानां तु भ्रामयेत् पूर्ववत् क्रमात् ॥१३॥

एवं स्यात् पञ्चपत्राणां पद्मानां क्षेत्रपञ्चकम्।
मध्यपद्मं भवेच्छुक्लं पञ्चकं पाण्डु(?ण्ड) रोज्ज्वलम् ॥१४॥

पीता स्यात् कर्णिका तेषां रक्तरागेण केसराः।
प्रतिपत्रान्तरे तेषु पद्मेषु केसरत्रयम् ॥१५॥

पद्मानां साधनार्थं तु यत् [1]प्राग्वृत्तत्रयं द्विज ।
भ्रामितं तस्य मध्यं तु रजसा परिपूरयेत् ॥१६॥

इन्द्रनीलोपमेनैव तन्नालं पद्मसन्ततेः ।
दलान्तराणि सर्वेषां [2]मध्यभागादितः क्रमात् ॥१७॥

नृपाश्मरुचिरागेण क्षेत्रान्तं परिपूरयेत् ।
मध्यवत् सर्वपद्मानां व्योमवृत्तं न कल्पयेत् ॥१८॥

निष्पाद्य मध्यपद्मे तु विम्बेशं संप्रपूजयेत् ।
सर्वार (?ब्ज) कर्णिकामध्यात्तदेव विधिवद्यजेत् ॥१९॥

पञ्चकं पुरुषाद्यं यत् पूर्वपद्मे प्रपूजितम् ।
क्रमेण [3]पूर्वपत्रं यत् यावदीशानगोचरम् ॥२०॥

प्रादक्षिण्येन सर्वेषां [4]क्षमं (?क्ष्माद्यं) तत्त्वगणं न्यसेत् ।
न्यस्य संपूज्य पाद्यार्घ्यपुष्पधूपविलेपनैः ॥२१॥

अनन्तरूपो [5]भगवान् वनमाली तु यस्स्मृतः ।
अभीप्सितै[6]रतः कुर्यादरकैर्बीज (?द्विज) चक्रकम् ॥२२॥

---

[1] ग–घ–प्राग्वृत्तित्रयं

[2] ग–घ–मध्यपद्मादितः

[3] क–ख–पूवपद्माभ्यां

[4] ग–घ–क्षमां तत्व

[5] क–ख–घ -भगवान्···ली

[6] ग–घ–रधः कुर्यात्

उत्तमं द्वादशारं तु [1]तच्च ते विदिता पुरा ।
[2]कालक्रमाभिधास्सर्वा सृक्षा (?ष्टया) दौ? च क्रमं यजेत् ॥२३॥

षट्सु चाङ्गेषु विधिवन्नेम्यन्तेषु च सत्तम ।
स्थूलसूक्ष्मविभागेन यथा तत् ते ब्रवीम्यहम् ॥२४॥

[3]प्राणो ह्यक्षस्थितो सिद्धं? ताभिस्स्याच्तु विनाडिका ।
ब्रह्मन् विद्धि वा व स्वरागता···· ॥२५॥

[4]प्रथिष्ववस्थितो मासो नेमिभागेषु वत्सराः ।
स्थूलमेतत् समाख्यातं सूक्ष्मकालमथ शृणु ॥२६॥

उपोष्टको? निमेषश्च ततस्त्रुटिलवो द्विज ।
लक्षणं च तथा काष्ठात् [5]पक्षादोपरिसंस्थिता? ॥२७॥

एतस्मिन् कालचक्रे तु प्रवर्तकनिवर्तके ।
पद्ममध्ये यजेत् साङ्गं प्रद्युम्नं परिमार्जितम् ॥२८॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
पञ्चपद्मचक्रबिम्बलक्षणो नाम
द्वादशोऽध्यायः

---

[1] क–ख–तच्छते दीपिता
[2] क–ख जलक्रमा
[3] क–ख–प्राणो ह्यक्षस्थविता सिद्धमनाभिभ्रातु विनाडिका
[4] क–ख–प्रधिषु प्रस्थितो
[5] क–ख-पक्षादेरापरि

*

अथ त्रयोदशोऽध्यायः

श्री भगवानुवाच—

चण्डान (?र्के) दीधियन् (?तिमयं) बिम्बमनन्तकर (?मन्तक) भासुरम् ।
सुरासुरेन्द्रनि (?न) मितं शृणु तामप? (?र) सोदरम् ॥१॥

पञ्चपद्मप्रसिद्ध्यर्थं क्षेत्रं प्राग्भाजितं यथा ।
संविभज्य तथा ब्रह्मन् सूर्यबिम्बप्रसिद्धये ॥२॥

पङ्कज (?ज) द्वादशांशेन भागं पद्मबहिस्त्यजेत् ।
द्वे वृत्ते भ्रामयेत् पश्चाद्भागीकृत्वांशपञ्चकम् ॥३॥

प्रतप्तकरबिम्बं [यत्] तद्बहिर्भागव (?ग) पञ्चकम् ।
संस्थाप्य रश्मिसिद्ध्यर्थं भ्राम्य (?म्यं) वृत्तं तृतीयकम् ॥४॥

रश्मिपुञ्जस्य पीठस्य भागमध्ये परित्यजेत् ।
पर्यन्ते सूर्यबिम्बस्य सूत्रं कृत्वाथ सत्तम ॥५॥

प्रसार्य रश्मिपर्यन्तं यावदास्थालकं तु तत् ।
एकांशं दद्य (?दीय) मानं तु त्यक्त्वा सूत्रस्य चान्तरे ॥६॥

संप्रसार्य तथा सूत्रं पातयित्वा द्विजापरम् ।
क्रमेणानेन वै दद्याद् [1]रंध्य (?रश्म्यर्थं) थं सूत्रपञ्चकम् ॥७॥

[२]यं अं सूर्यस्य बिम्बस्य माल्प····रववञ्ज ।
ततः प्रसार्य (पूर्य) रजसा रविवद्राजते यथा ॥८॥

---

1 ग–घ–रम्यार्थं
2 ग–घ–यं अं खं सूर्यबिम्बस्य मासवद्भिरवब्जज?

रक्तारुणेन रागेण [1]हितैर्मध्यान्तमेव च ।
बिम्बं भाति यथा सम्यक् तेजोगोलकरूपवत् ॥९॥

पाण्डुरारुणरागेण सूक्ष्मरेखाचयेन च ।
चक्रेण [2]यत्ततं? कुर्याद्गोपुच्छादिव गोणकम् ॥१०॥

रश्मीनामन्तरं सर्वं रश्मिबाह्यात् तथैव च ।
छायेन्द्रर (?छादयेद्र) जसा ब्रह्मन् विघनाम्बररूपिणीम् (?णा) ॥११॥

प्राग्वत्तदुत्तरे कुर्यात् कमलं शुभलक्षणम् ।
[3]न मध्यै ध (?तन्मध्ये) रया भक्त्या यः पूरयति जह्वगम् ?
(?पूजयत्यनिरुद्धकम्) ॥१२॥

[4]सोऽचिरात् परमं ब्रह्म प्रविशत्यजमव्ययम् ।
यद्गत्वा न निवर्तन्ते भूयोऽस्मिन् भवपञ्जरे ॥१३॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
सूर्यबिम्बलक्षणो नाम
त्रयोदशोऽध्यायः

---

[1] ग–घ–शतैर्मध्योन्तमेव च

[2] ग–घ–यत्नतं

[3] ग–घ–नमध्ये यरया

[4] क–ख · इदमर्धं गलितम्

*

अथ चतुर्दशोऽध्यायः

श्री भगवानुवाच—

[1]सुधारसमयारं तु तुषारनिचयाकृतिम्।
हारपञ्जलसारस्य? बहिस्थं (?स्थं) चारु राजते ॥१॥

ता (?त) मिदानीं प्रवक्ष्यामि विम्बार्थेषु च संज्ञितः।
अङ्कयित्वाष्टधा क्षेत्रं दिग्द्वयाद्दक्षिणोत्तरम् ॥२॥

क्षेत्रं सूत्रद्वयेनैव युक्तानि (?क्तं हि) नवसंख्यया।
एवं पूर्वापरं सूत्रं क्षेत्रमध्ये तु पातयेत् ॥३॥

द्वे वान्ये क्षेत्रजे सूत्रे त्रीण्येवं पूर्वपश्चिमे।
प्राच्यादौ संख्यमानं यत् पौष्करांशं तृतीयकम् ॥४॥

संविभज्य चतुर्धा तत् ब्रह्मस्थानावधेः समम्।
[2]सुपत्यै (?ञ्यक्ते) रङ्कयेच्चिचह्नैस्त्रिभिः कमलसंभव ॥५॥

त्यक्त्वा तस्माच्चतुर्थांशं प्राग्दिग्भागद्वयोपमम्।
सूत्रं कृत्वा तदङ्गस्थमनेन विधिना ततः ॥६॥

[3]प्रवासा (ःसार्य) ऋग्यजुत्या च? यावत् सूत्रं तु सप्तक(?म) म्
तस्मात्तल्लाञ्छयमा!नं तु दक्षिणे तु समानयेत् ॥७॥

---

[1] ग–घ–सुधारसामियाकामा
[2] ग–घ–सुवक्यैरङ्क
[3] ग–प्रवासा ऋग्यजात्या च घ–प्रवासा ऋश्यजात्या च

यावद्द्वेद्वितयं सूत्रमुददग्दिग्लाञ्छनं तथा ।
एवं मध्येन्दुवच्चिह्नं प्रथमं परिकल्पयेत् ॥८॥

सिद्ध्यर्थमर्धचन्द्राख्यं बिम्बस्यावरमुच्यते ।
अंसाभिधाच्चतुर्थस्य…र्थ…ते…मस्य च? ॥९॥

तं तु कृत्वा नयेत् पश्चाच्छृङ्गं प्राग्वञ्च(?ल)नस्य च ।
एकं तस्माल्लाञ्छ्यमानं द्वितीयं शृङ्गमानयेत् ॥१०॥

कृत्वैवमिन्दुलेखेन त्वर्धेन्दुर्जायतेऽधिकम् ।
सुपूरणीयं रजसा यथा तदधुनोच्यते ॥११॥

सितपीतेन रागेण समं रेखासु [1]पूरयेत् ।
लाञ्छनद्वितयं चन्द्रं किञ्चित् स्यूलासु (?लं तु) मध्यतः ॥१२॥

कृशासु शृङ्गदेशाच्च क्रमाद्गोपुच्छरूपवत् ।
[2]प्रसार्य मध्याच्छुक्लेन तद्गर्भेऽम्बुरुहं लिखेत् ॥१३॥

ब्रह्मस्थानाच्च यत् सूत्रं कृत्वा सं? (?तत्) संप्रसार्य च ।
[3]चन्द्रोदयसमीपं तु यथा चन्द्रं तु संस्पृशेत् ॥१४॥

---

1 ग–घ–पूजयेत्

2 ग-घ–प्रसूर्यमर्धात्

3 क–ख–चन्द्रोथ…समीपं

तद्भ्राम्य पद्मसिद्ध्यर्थं पद्मपत्रायतेक्षणम्।
यजेच्चन्द्रोदरस्थं च नारायणमनामयम् ॥१५॥

भवबन्धक्षयकरं मोक्षलक्ष्मीप्रदं विभुम् ॥१६॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
चन्द्रबिम्बलक्षणो नाम
चतुर्दशोऽध्यायः

*

अथ पञ्चदशोऽध्यायः

श्रीभगवानुवाच—

वैराजीया विभोश्शक्तिर्ब्रह्मतत्त्वेति कीर्त्यते ।
त्रिस्कंधलक्षणं यागं तस्य वक्ष्यामि तेऽधुना ॥१॥

कृत्वा ब्रह्मपदे सूत्रं चतुरश्रस्य सत्तम ।
क्षेत्रार्धं पश्चिमाद्भागाल्लाञ्छयेदर्धचन्द्रवत् ॥२॥

ततो वै पूर्वदिङ्मध्यं सूत्रं कृत्वा(?स्त्र)त्मयत्नतः ।
नयेत् पश्चिमदिङ्मध्ये तेन सूत्रेण लाञ्छयेत् ॥३॥

समीपाद्यातु[1]दिग्. वायोश्चतुरश्रपुरं ह्ययम ।
सूत्रद्वयमुदग्याम्ये संस्थितं कमलोद्भव ॥४॥

[2]दिग्यात्वन्ते तु तत् सूत्रं त्रिकोणं व्यजने ततः ।
प्राग्वदुत्पाद्य [3]मध्ये तु····कोणेपर ? ॥५॥

ताभ्यामभ्यन्तरं कुर्यात् तृतीयभ्रमसिद्धये ।
यथा सूत्रत्रयोपेतं स्यात् त्रिकोणचतुष्टयम् ॥६॥

स्कन्धत्रयक्रमेणैव सौम्ययाम्यं तु पश्चिमे ।
सूत्रपातं ततः कुर्याच्छिन्ने कुद्धे? तु तन्तुना ॥७॥

---

1. क-ख-दिक्साधो
2. ग-घ-दिश्यात्वङ्के कृतं
3. ग-घ-मध्ये तु त्रिकोणं

स्कन्धाभ्यां सौम्ययाम्याभ्यां सौम्यापाभ्यां तथैव च।
[1]याम्यापाभ्यां तु संस्थाभ्यां सूत्राणां तु तेन तु ॥८॥

एवमास्फालितैस्सूत्रैरंशकानां शतद्वयम्।
शतार्धं च शतान्येष (?षडन्येषां) जायते त्र्यंश (व्यस्त्र) रूपिणाम् ॥९॥

शोभान्वितानि द्वाराणि कोणानि त्रीणि पौष्कर।
भागपङ्क्तिद्वयेनैव वक्ता? (?भक्ता) तु भ्रमणीशुभमू (?भा) ॥१०॥

पङ्क्त्या तु साधयेत् पीठं सांशपङ्क्त्या तु पङ्कजम्।
इत्येतां कल्पनां कृत्वा लोपयेत्तदनन्तरम् ॥११॥

दशकांशं दशानां तु दिङ्मध्याचारसिद्धये।
बाह्यपङ्क्तौ तु वै सप्त [2]त्रेधा च… चतुर्दश ॥१२॥

त्रीण्यन्ये योनिरूपाणि लोपयेदंशकानि च।
सप्तैतानि बहिः पङ्क्तौ लोपनीयान्यतोऽन्तरात् ॥१३॥

कर्णार्थं त्रीणि [3]कोणस्था (?ष्ठा) नि द्वे योन्येको?ग्नि? (?कमग्नि
पुरवद्) च द्विज।
एवमाग्नेयपुरवदित्येते चांशका दश ॥१४॥

संशोध्य द्वारसिद्ध्यर्थं कुर्याच्छोभाद्वयं ततः।
पश्चात् द्वये तु द्वारस्य [4]त्रिंशत् षट्कोण? पौष्कर ॥१५॥

---

1. क–ख–याम्यावाभ्यां
2. ग–घ–त्रेधानि च
3. ग–घ–कोणस्थानि (कोणानि?)
4. क–ग–घ–त्वंशत् षट्

योनिवद्बाह्यपङ्क्तौ तु एवं [1]पञ्चतदशान्तरात्।
त्रीण्यग्निपुररूपाणि मार्जयेद् द्वेऽथ योनिवत् ॥१६॥

न्यब्यते शोभनं शोभं ततः कोणं तु शोधयेत्।
[2]स बाह्याभ्यन्तराभ्यां तु पङ्क्तिभ्यां तु त्रिंशदंशकम् ॥१७॥

द्वारद्वयं वा कृत्वाऽन्यत् [3]प्राग्वच्छोभोपगं द्विज।
[4]अंशकानां तु दशकं शेषं कोणं तु शोधयेत् ॥१८॥

वीथीसंसिद्धये चैव पङ्क्त्येका या प्रकल्पिता।
भागास्तत्रैव पञ्चा म? लोपयेत् परितो द्विज ॥१९॥

वीथ्यन्तर्गतपङ्क्तौ तु कुर्यात् पीठं सुलक्षणम्।
पञ्चत्रिकोणानि दिक्षु?…ब्रत त्तत्र मार्जयेत् ॥२०॥

[5]हुताशपुरवत् त्रीणि [6]द्वेऽन्त्य (?न्य) योन्योपमानि च।
अंशषट्कं तु वै ब्रह्मन् प्रतिकोणं तु मार्जयेत् ॥२१॥

पञ्च (?श्चं) पीठान्तरे कुर्याच्छिष्टैष्षोडशकोष्ठकैः।
पृथक् सम्पूजनार्थं तु ह्येतल्लक्षणलक्षितम् ॥२२॥

---

1. क–ख–पञ्चतदन्तरात्
2. क–सबाह्याभ्यन्तरं तं तु
3. क-ख–प्राग्वत् शोभावकं
4. क–ख–अंशकानां इत्याद्यर्धत्रयं गलितम्
5. क–ख–हुताशपुरश्च
6. ग–घ–देन्ये योन्योपमानि च

कुर्याद् द्वारा च शक्तौ तु मण्डलं यन्मयोदितम्।
स लुप्तश्चतुरश्रं तु युक्तं रेखात्रयेण तु ॥२३॥

नवाध्वरस्य यागस्य यदाऽङ्गत्वेन वै व्रजेत्।
लुप्तवीथिं तथा कुर्याद्द्वारादिपरिभूषितम् ॥२४॥

मुक्तारेखात्रयेणैव चतुरश्रं पुरान्वितम्।
त्रिकोणं पूर्ववत् पूर्वं क्षेत्रं कृत्वा द्विसप्तधा ॥२५॥

विभज्य सुसमैर्भागैस्सूत्राण्यस्फाल्य पूर्ववत्।
अथ मन्त्रविशेषस्स्याद्दंशकानां तु मार्जयेत् ॥२६॥

शोभान्वितानि द्वाराणि भागैः पूर्वोदितैर्द्विज।
[1]श···न्यंशकसव्येन कुर्यात् कोणत्रयं ततः ॥२७॥

पूर्ववत् पीठकोणेषु भागपङ्कं तु मर्दयेत्।
दिक्त्रयादवशेषेण [2]शोधयेदंशकानि च ॥२८॥

पीठान्तर्वर्तिनिश्वासैरवशिष्टैस्तु पङ्कजम्।
लक्षणाद्यं समं कुर्यात् कुर्याद्वा पीठवर्जितम् ॥२९॥

अथवा षोडशांशोत्थां [3]पीठवत्युज्झितां लिखेत्।
यथा तु संकटं न्यस्य पद्मानां चाथ वक्ष्यते। ॥३०॥

---

1. क–ख–श···न्यंश ग–घ–शयशेन्यंश
2. ग–घ–शोषयेदंशकानि च
3. क–ख–पीठवदुज्झितां

द्वाराणि सुसितेनैव पाण्डुरक्तेन चोत्तरम् ।
[1]कृष्णवर्णोन्तः दिग्भागं रञ्जनीयं च तेन वा ॥३१॥

रक्तारुणेन तद्बाह्यमीशादौ वा सितादिना ।
हुतभुङ्मारुतस्सूर्यः पीठकोणत्रये स्थिते ॥३२॥

पूर्वमारुतविप्रेन्द्रदिक्त्रयेऽथ श्रुतित्रयम् ।
[2]सौम्ये च दक्षिणे चैव ऋग्यजुस्सामसंज्ञितम् ॥३३॥

संपाद्यैवं तदन्तस्थं ब्रह्मतत्त्वं तु योजयेत् ।
परिवारावृतं ब्रह्मन् भक्त्या भोगैश्च याज्ञिकैः ॥३४॥

तदर्पितं मनः कृत्वा सुवाचैव परिग्रहम् ।
समाप्नोति शुभान् कामान् मोक्षार्थी च परं पदम् ॥३५॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
त्रिकोणबिम्बलक्षणो नाम
पञ्चदशोऽध्यायः

---

1. क–ख-तूर्णवर्णोन्त
2. ग–घ–सौम्याप्यदक्षिण

*

अथ षोडशोऽध्यायः

श्री भगवानुवाच—

श्रृणु ब्रह्मन् प्रवक्ष्यामि यागं कूर्मोदरं तु यत्।
सप्तमं नवनाभस्य विष्णोः संपूजनाय च ॥१॥

ऐशान्यां [1]दिशि वा कुर्याच्चक्रं कूर्मस्य सर्वदा।
रजसा चोल्लिखेत् तस्माद् विभागोद्योतितेन च ॥२॥

विभज्य दशधा क्षेत्रं सूत्राण्यास्फालयेत् ततः।
[2]साध्यते शतमेकं तु कोष्ठकानां द्विजोत्तम ॥३॥

वायव्यांशं समारभ्य यावदीशानगोचरम्।
पङ्क्त्येका (?कां) कोष्ठकानां तु ऐन्द्री दिक्स्थां तु मार्जयेत्। ॥४॥

कृत्वा ब्रह्मावधौ सूत्रं संप्रसार्य क्रमेण तत्।
[3]उदग्याम्यतृतीयस्य यावत् सूत्रस्य सन्निधिम् ॥५॥

स्थानं तस्मा[4]न्नयेच्चोदग् लाञ्छयमानं तु संगमम्।
अस्य मध्याच्चतुर्थस्य यद्येतत् पञ्चमस्य च ॥६॥

अनेन विधिना कुर्यात् (कूर्मस्य) पृष्ठलाञ्छनम्।
याम्योदक् सप्तमस्याथ मध्यसूत्रस्य संगमे ॥७॥

---

1. ग–घ–दिथि वै
2. ग–घ–सिध्यते
3. क–ख–उतयाम्य ग–उदयाम
4. क-ख–ग–घ–नयेच्छोदह्यां

निधाय सूत्रं [1]प्रग्वत्तया (?प्राग्वत्तत्) स्तृतीयोपगं (?तृतीयप्योपगं) न्यसेत्।
तत्सूत्रं लाञ्छयेद् याम्ये यावन्मध्यस्य पञ्चमे ॥८॥

भुजात् षष्ठे तु साध्यांशे कूर्मपृष्ठं तदा भवेत्।
अथ षष्ठस्य वै मध्या[2]द्दंशाख्यात् सप्तमस्य तु ॥९॥

निधाय संगमे सूत्रं मीलयेद्ब्रह्मलाञ्छने।
समास्फाल्य तु लाङ्गूलं संसिद्ध्यर्थं तु पौष्कर ॥१०॥

लाङ्गूलस्य ततश्चार्धं सूत्रं कुर्याच्च संगमे।
आधारात् पञ्चसंख्यस्य [3]भुजादष्टमकस्सुकैः (?स्थ वै) ॥११॥

प्रसार्य ऋग्यजुः सामबाहुः सप्तमकं स्पृशेत्॥
लाञ्छयमानं नयेत् तस्मान्मध्यात् तुर्यस्य मीलयेत् ॥१२॥

अथ पुच्छाग्रकं सूत्रं कृत्वा [4]सिद्धिं समानयेत्!
चतुर्थस्य तु वै मध्याद् भुजादष्टमकस्य च ॥१३॥

तस्मान्नये[5]ल्लाञ्छितेन यममध्यस्य पञ्चक (?म) म्।
कृत्वैवं च ततः कुर्याल्लाञ्छनं [6]कर्णदेशतः ॥१४॥

---

[1] क-ख–सूत्रं मप्रग्वत्तया घ–सूत्रं प्रागुक्तया

[2] मध्यद्दंशा सप्त···

[3] क–ख-सजास्तमकस्सुकैः

[4] ग–घ–सिद्ध्यंशमानयेत्

[5] क–ख–मयं बद्धस्य

[6] कण्ठदेशतः अनयोः कोशयोः

मध्यते सौ (?तस्तु) तृतीयस्य पञ्चमस्य भूजामिधात्।
सूत्रमन्त (?न्तः) स्थितं कृत्वा संमुखं संप्रसार्य च ॥१५॥

मध्यमा (त) पञ्चकं (?मं) यावल्लाञ्छ्यमानं नयेत् ततः।
अतो भागे (?धोभागे) तु कर्णस्य नोर्ध्वें तु कमलासन ॥१६॥

यावन्मध्यचतुर्थस्य लाञ्छनं लयमेति तत्।
आधाराधारदष्टस्य (?धोऽष्टमस्य) प्रद्योतत् (?प्रध्यूर्ध्वात्)
सप्तमस्य च ॥१७॥

सूत्रमन्तर्गतं कृत्वा तन्मानेन प्रसार्य च।
यावन्मध्याच्चतुर्थं तु तस्मात् संल्लाञ्छ्य मार्जयेत्। ॥१८॥

[2]ब्रह्माभिधात् पञ्चमस्य [3]सूत्रस्याधान चो (?मु) द्धृतम्।
कर्णसिद्धिर्भवत्येषा पात (?द) सिद्धिमतः शृणु ॥१९॥

द्वयं पादार्धये (?के) नैवप्रस्तं जानुद्वयं द्वयम्।
[4]पार्श्वस्य साधनार्थं च विधिं वक्ष्याम्यतः परम् ॥२०॥

मध्यसूत्रत्रयं यस्य (?यस्यास्य) याम्योदग्दशमस्य च।
कुर्यात् संध्यंशगं सूत्रं [5]तेन (?ना) ध्वानं च म(सं) स्पृशेत् ॥२१॥

---

[1] कर्णकण्ठशब्दयोरक्षररेखायां विवेको न भवति क-ख-संचाल्य

[2] क-ख-आत्माकिधात्

[3] क-ख-सूत्रस्यायान

[4] ग-घ-पश्यस्य

[5] सर्वत्र अशुद्धम्

प्रेरयेल्लाञ्छयमानं तु मम यत्तन्निबोधतु।
ध्रुवाभिधाच्चतुर्थस्य स्कन्धाख्याद् दशमस्य च ॥२२॥

अग्रवत् पश्चिमं जानुं तत्संख्येषु च तन्तुषु।
एतच्चिचत्त (?च) द्वये सिद्धे [1]क्रोडजान्वेकता भवेत् ॥२३॥

जानोरधःस्थिते कोष्ठे चरणं तत्र कल्पयेत्।
संसूत्र्य तच्चतुर्धा वै भक्त्या पूर्वं द्विजोत्तम ॥२४॥

[2]अर्धेषु प(ञ्च) कास्त्राणि तत्र पञ्च तु साधयेत्।
भागपङ्क्तौ [3]ह्यधस्थायां मध्यभागद्वयेन तु ॥२५॥

अर्धेन्दुं प्रथमं कुर्यादधो वक्त्रं च पौष्कर।
बाह्यैकादशसूत्रस्य शृङ्गे द्वे तस्य मीलयेत् ॥२६॥

तत्समौ द्वावर्धचन्द्रौ विधिनानेन लाञ्छयेत्।
ताभ्यां वै लाञ्छयमानाभ्यां विशेषोऽयं प्रदर्श्यते ॥२७॥

सूत्रदातपाद [4]कोष्ठात्तु स (आ) द्यमध्यबहिर्भवेत्।
पादपार्श्वस्थसूत्राभ्यां [5]मध्ये ताभ्यां द्विजान्तरे ॥२८॥

---

[1] क–ख–कोसजा

[2] ग–अन्धेषुपंतखास्त्राणि–घ–अन्तेषुपंतखास्त्राणि

[3] क–ख–तस्थाय

[4] कोष्ठात्तु ह्याद्यमध्य

[5] क–ख–मध्यतस्य

नखद्वयत्र[1]येणैव प्रस्तमग्नान्न इश्यते।
पादा[2]द्दूर्ध्वस्थिते मह्ये (?ध्ये) विलेख्यं नखसंमितम् ॥२९॥

अर्धेन्दुजानुसिद्ध्यर्थं ध्रुवासूत्रं तु पश्चमे।
साधनं पादजानुभ्यामुक्तं श्रृणु मुखस्य च ॥३०॥

षोढा कर्णोर्ध्वगं भागं कृतं सर्वत्र सूत्रयेत्।
भागपङ्क्त्या च ते ध्वस्ते ह्यर्धचन्द्रद्वयं लिखेत् ॥३१॥

भागद्वयद्वयस्यान्ते ह्यधो वक्त्रसमं द्विज।
ताभ्यां भागद्वयं मध्ये चन्द्राभ्यां संपरित्यजेत् ॥३२॥

अधः स्थिते (?तं) भागपङ्क्त्यामंशाभ्यां तु द्वयेन तु।
अर्धेन्दुमूर्ध्ववक्त्रं च पूर्ववल्लाञ्छयेत् समम् ॥३३॥

अर्धेन्दुचिह्नशेषेषु भागेषु मुखमध्यतः।
दर्शयेत् सुसमां रम्यां स (?सि) ता (?तां) श्रो श्रे (?र्णि)
द्विजाभिधाम् ॥३४॥

वक्त्रमध्यगतेनैव सूत्रेण [3]रसनां लिखेत्।
दन्तान्तर्वर्तिनीं चैव नातिदीर्घां न वामनाम् ॥३५॥

वक्त्रादन्तस्थ भागस्य [4]वर्तिमुल्लिख्य मानतः।
तद्भागात् तुर्यभागेषु तन्तुना नेत्र सिद्धये ॥३६॥

---

1. ग–घ–येनैव ग्रस्नमक्ष्नान्न दृश्यते
2. ग–घ–स्थिते मर्हे
3. क–ख–रचनं
4. ग–घ–धृत्तिमुल्लिख्य

लोचनांशस्य[1] यो भागः समीपे चैव वर्तते।
श्रवणस्य तु तत् स्थानं यथा सिध्यति तच्छृणु ॥२७॥

तुर्यसूत्रस्य वै मध्यान्मध्ये सू (?ध्यसू) त्रं निबो (?रो) धयेत्।
संमुखं लोचनस्था (?स्थ) स्य तद्वदे (?द्वे) त्रि[2]तयस्य च ॥२८॥

।
सूत्रं कृत्वाऽर्धभागेम....
विविधान्विज (?विधिनान्वित) मित्येतच्छ्रोत्रमास्फालनाद् भवेत् ॥२९॥

बदरीपत्रवत् तूष्णी (?) विधिनाऽनेन जायते।
कह्लारं षोडशांशैस्तु मध्येऽस्य परिकल्पयेत् ॥४०।

कृत्वैवं मार्जयेत्[3]पश्चादङ्गावयववर्जितम्।
अधस्ताल्लोचनस्याथ त्विषै काले (?) तु निर्मिते ॥४१॥

क्षेत्रान्तं विततं पश्चा द्रागजालेन रञ्जयेत् :
पाण्डुरक्तेन रागेण सूत्रयुक्तं तु लाञ्छनात् ॥४२॥

पुरणीया (?यं) च रेखाभिर्व्यक्तयेऽभ्येति तत् तथा।
तत्तद् भागकरूपेण रागेणात्युज्ज्वलेन च ॥४३॥

पूरयेदर्धचन्द्राणामन्तरं परितः क्रमात्।
सितासितेन सूत्रं तु सुसितेन द्विजालिखेत् ॥४४॥

---

[1] क–ख–ये भागाः ग–घ–यो भागाः

[2]. क–ख–दयस्य च

[3]. क–ख–पश्चात्···येववर्णितम्

सन्ध्याभ्यां तुल्यरागेण जिह्वामास्यं च रञ्जयेत्।
द्विजान्तराणि रक्तेन रागेण व्यक्त (?क्ति) मानयेत् ॥४५॥

संदर्शयेच्चासितेन तस्य नासापुटद्वयम्।
वैडूर्यतुल्यरागेण कुड्यबाह्यं तु छादयेत् ॥४६॥

शकि (?शक्र) नीलोपमेनाथ वीथ्योद्यं (?ध्याद्यं) तु प्रदर्शयेत्।
[1]सर्वं तुर्याश्रपर्यन्तं प्राग्वत् संपूर्य पङ्कजम् ॥४७॥

एवं संपाद्य संपूज्य मध्ये तु गरुडासनम्।
भोगमोक्षप्रसिद्ध्यर्थं विभवेन विपश्चितः ॥४८॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
कूर्मबिम्बलक्षणो नाम
षोडशोऽध्यायः

---

1. क-ख-सर्वं तु यस्य

*

अथ सप्तदशोऽध्यायः

श्रृणु ब्रह्मन् प्रवक्ष्यामि तवानह (?नवनाभस्य) चाष्टक (?म)म् ।
शङ्खोदरमहायागं यजनार्थं नृकेसरेः ॥१॥

क्षेत्रं [1]द्वात्रिंशधाल्पान्यं (?स्फाल्य) [2]सर्वदिग्गह्य तत्समम् ।
[3]पत्रयेदर्धसूत्राणि [4]त्रिंशद् ब्येकाधिकानि च ॥२॥

सूत्रसंख्या [5]कृता ह्येषा त्वंशसंख्यां निबोधतु ।
सहस्त्रे (?स्त्रं) तत् तथा विंशत्यपरं च चतुष्टयम् ॥३॥

[6]तन्मध्ये पाञ्चजन्याख्यं विम्बं कुर्यात् [7]सुलक्षणम् ।
सूत्राणि कुर्यात् प्रागादौ भक्त्या (?क्त्वा) पूर्वं द्विजोत्तरम् ॥४॥

अर्धेन्दुवन्नस्वस्त्रीणि (?नवा स्त्राणि (?नवा स्त्राणि) तत्र पश्चात्तु
साधयेत् ।
भागपङ्क्त्या ह्यधस्स्थाया मध्यभागपथेन तु ॥५॥

अर्धेन्दुं प्रथमं कुर्यादधोवक्त्रं च पौष्कर ।
मध्यसूत्राच्च सङ्गस्यान्याति (?स्य यान्ति) प्राक्पश्चिमानि च ॥६॥

---

1. द्वात्रिंशधास्फाल्य इति स्यात्
2. ग–घ–सर्वंदिग्गुह्यतः
3. पातयेत् इति स्यात्
4. ग–घ–त्रिंशद्वै ञ्यधिकानि च
5. क–ख–कृतान्येषा
6. ग–घ–तन्मध्यात्
7. ग–घ–सलक्षणं

उक्तानुक्तेषु विम्बेषु ह्येष एवमिति (?विधिः) स्मृतः।
प्रसंख्यानेव (?नं च) सूत्राभ्यां सर्वेषां [1]सत्यविक्रमम् ॥७॥

उत्तराद्दक्षिणा यैस्तु स्पृष्टसूत्रैस्तु सेतुवत्।
तान्युदग्दक्षिणामध्यप्राक्प्रत्यक्स्थानि तद्बहिः ॥८॥

उदग्भ्राम्यमृतं? यस्य मध्यसूत्रस्य सङ्गमे।
निधाय सूत्रमध्येऽरं पूर्वदिश्यां च वै द्विज ॥९॥

न्यङ्गमानेन सूत्रेण चाच? श्रृङ्गद्वयं श्रृतु तत्।
लयं नयेत् तृतीयस्य सूत्रस्यात्? [2]सापिधस्य च ॥१०॥

सिध्यमुखम···स्येवं येन चासौ लयं व्रजेत्।
भवेच्छब्दोदयं येन सम्यरस्ते? समीरणे ॥११॥

पश्चात् संसाधनीयं च सुशुभं भुवनत्रयम्।
मध्यसूत्राच्चचतुर्थस्य याम्यादेक्पश्चिमस्य च ॥१२॥

[3]मध्येंऽशे प्रेरयेत् सूत्रं मध्याक्षा षो? दकं नयेत्।
लाञ्छयित्वाऽर्धचन्द्रं तु दिग्भागे चोत्तरोत्तरम् ॥१३॥

मध्यसूत्राच्च षष्ठस्य याम्योदङ्नवमस्य च।
सङ्गमे स्थापयेत् सूत्रं [4]नयेन्मध्याष्टदष्टगम् ॥१४॥

---

1. सत्यविक्रम इति पौष्करसंबोधनं स्यात्
2. क-ख-साविघस्य च
3. ग-घ-मध्यांशे रोधयेत् सूत्रं मध्यात् षष्ठोदकं
4. ग-घ-नयेन्मध्यान्नदष्टकं

[1]सख्वं? तदर्धे द्वितयं···सौम्य दिग्द्विज।
याम्योत्तरेषु सूत्रेषु यच्चतुर्दशमं यथा ॥१५॥

मध्यमान्नवसंख्या स्यात् सूत्रं संस्थाप्य सङ्गमे।
तत् स्थानादानयेत्तद्वै यद्वा दशममध्यमात् ॥१६॥

ततोऽर्धशशिनं दद्यात् तृतीयं सोमदिग्गता (?तम्)।
[2]सूत्रवाप (?पात) मतः कुर्याद् द्विविधं येन तच्छृणु ॥१७॥

यत् स्मृतं पञ्चदशमं सूत्रं याम्योत्तरं तथा।
[4]मध्यामद् द्वादशमं यच्च ताभ्यां संरोध्य सङ्गमे ॥१८॥

सूत्रं नयेद्वारुणाशामध्यमास्फालयेत् ततः।
भूयस्त्वनेन विधिना दक्षिणस्यां दिशि द्विज ॥१९॥

अर्धचन्द्रत्रयं कुर्यात् सूत्रं संपातयेत् तथा।
[5]अतश्चाभ्यन्तरे भागे सानम (?मध्यमं) शृणु सत्तम ॥२०॥

[6]यागदक्षिणदिग्भागे शङ्खाकृतिक्रमात् भवेत्।
शुभाय पञ्चदशमं सूत्रं [7]याम्येऽन्तगं तथा ॥२१॥

---

1 ग–घ–सचं तदर्धे···द्वितीयं

2, ग–घ–सूत्रपात

3· क–ख–यस्स्मृतं पञ्चदश···

4. क–ख···द्वादशमं

5. क–ख–अतश्चाभ्यन्त···

6. क–ख–···दिग्भागे

7. ग–घ–याम्योरगं

[1]मध्यमान्नवमं नाभ्यां सूत्रं कृत्वा तु सङ्गमे। [redacted]
तस्मात् प्रसार्य तत् सूत्रं यावन्मध्याच्च [2]सत्तम (?सप्तमम्) ॥२२॥

[3]मत्स्यवल्लाञ्छना (?नं) कार्या (?र्यं) वादीका? तत्र तेन च [redacted]
प्राक् सिद्धं चन्द्रश्रृङ्गाभमस्य श्रृङ्गं तु मीलयेत् ॥२३॥

बाहुपञ्चदशाख्येन मध्यसूत्रस्य चाष्टमे।
सन्धानो (?ने) स्थापयेत् सूत्रं क्रमात् तेन चतुर्दशी (?शे) ॥२४॥

[4]संस्पृशेद्बाहुसूत्रं च तस्मात् स्थानात्तु लाञ्च (?ञ्छ) येत्।
अर्धचन्द्रमधोवक्त्रं मध्ये सूत्रद्वयस्य च ॥२५॥

तदीयमुत्तरं श्रृङ्गं मत्स्यश्रृङ्गस्य मीलयेत्।
अनेन विधिना सम्यङ्नाभ्यावर्तं भवेत् स्फुटम् ॥२६॥

नाभेरधोगतं कुर्यात् करग्र (?ग्रा)हं सुलक्षणम्।
तत् साधनं समासेन श्रृणु वक्ष्याम्यतः परम् ॥२७॥

सप्तमस्य तु वै मध्याद्बाहुपञ्चदशस्य च।
कृत्वा मध्यगतं सूत्रं तत्क्रमेण प्रसार्य च ॥२८॥

यावन्मध्यमसूत्रस्य [5]निषादाः (?ष्ठाद्यं) पश्चिमे दिशि।
[6]आस्फ (?स्फा) लयेच्च तत् सूत्रं पाणिग्राहप्रसिद्धये ॥२९॥

---

1. मध्यमानमं ताभ्यां
2. 'सप्तमम्' इति स्यात्
3. क–ख–यस्य वल्या
4. क–ख–संस्पर्शे...त्रं च
5. ग–घ–निष्टादां पश्चिमे
6. ग–घ–आस्फालयन्ति

भुजा(?मध्या)त् सप्तदशस्याथ स्तम्भादष्टक्रम (?मक)स्य च ।
[1]सन्धौ संरोध्य वै सूत्रं प्रागवन्नीत्वा तु पातयेत् ॥३०॥

मध्ये सूत्रद्वयं स्यात्तु कुर्यादर्धेन्दुसञ्चयम् ।
प्रमाणं भासते तेषां तस्मात् क्षेत्रक्रमेण तु ॥३१॥

[2]नाभावधस्तु शशिना लाञ्छनेन द्विजोत्तम ।
यवभागेऽर्धचन्द्रेन्दु (?न्दुं) भ्रामयेद्भागसन्निधिम् ।३२॥

येनातिकृष्णं न भवेत् प (?पी) तकं [3]वृद्धिबिम्बकम् ।
संपन्नं ला (?न्नला) ञ्छनस्याथ शृणु संख्यस्य कल्पनम् ॥३३॥

पञ्चकं चोल्लिखेन्मध्ये कोष्ठकानां शतानि तु ।
भुवनत्रयसंलग्नदक्षिणोत्तरगं तु यत् ॥३४॥

[4]यत् सूत्रत्रितयं यत्नान्मुखमर्धेन्दुवद्भवेत् ।
भुवनद्वितयं चास्य क्रम (?मात्) स्या द्वर्तुलायतम् ।.३५॥

स बाह्याभ्यन्तरस्यातो मार्जनीयं तु कोष्ठकम् ।
अव्यक्तं व्यज्यते येन चतुरश्रस्य मध्यमम् ॥३६॥

[5]व्यूहं यदा विना (?विना यदा)कुर्यात् तदाऽस्य परिकल्पयेत् ।
द्वारशोभोपशोभानि द्वि द्वि केनांशपङ्क्तिता (?ना) ॥३७॥

---

1. सन्ध्या संरोध्य
2. ग–घ–नाभावतेस्तु
3. ग–घ–बुद्धिबिम्बकम्
4. ग–घ–वज्रसूत्रत्रयं
5. क–ख–व्यूहं यभा विना

द्वे चतुष्षट् तथा चाष्टौ [1]द्वार (?रे) सर्वाङ्गलादिका (?सर्वान्
गलादिकान्)।
सप्तपञ्चत्रिरेखं (?कं) च लुम्पेच्छोभोपशोभयोः ॥३८॥

द्व्यंशा (?द्व्यशी) त्यष्टाधिकां (?कं) चैव कोणात् कोणं तु वै ततः।
प्रस्तौ पूर्वापरौ द्वारौ किञ्चिच्छोभासमन्वितौ ॥३९॥

अखण्डितं भवेच्छेषं प्रागुक्तं वि (।कवि) धिना तव (?तः)।
कुर्याद्वीध्यादिकं सर्वं लुप्तचक्रचये सति ॥४०॥

रागेण रञ्जयेत् पश्चाद्यथा तदिह कथ्यते।
पाण्डरारुणकेनैव लाञ्छनात् सूत्रमिश्रिताः (?ताव्) ॥४१॥

क्रमेण पूरणीयाश्च [२]संरेखासु (?स्तु) च सर्वदिक्।
पाण्डरेण तु रागेण गोक्षीरसदृशेन तु ॥४२॥

दर्पणोदरवन्मध्यात् पूर्यं पद्मं यथा पुरा।
वक्त्रमध्येऽस्य वेधं तु कृष्णेन रजसा समम् ॥४३॥

[३]स्वेच्छया विधिवत् कुर्यात् सुवृत्तं सुन्दराकृति।
वैडूर्यसदृशेनाथ कृष्णेन परिरञ्जयेत् ॥४४॥

---

1. ग–घ–द्वारसंसा गलादिका
2. ग–घ–सरेखासु
3. क–ख-स्वेवश्चा

[1]बिम्बमद्य द्विजश्रेष्ठ एवं कृत्वा तु पूजयेत् ।
शङ्कोदरमध्ये तु ध्यानसक्तो (?क्तं) नृकेसरिम् ॥४५॥

सर्वकामप्रसिध्यर्थं कैवल्यप्राप्तये तथा ।

.... ॥४६॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
शङ्कबिम्बलक्षणो नाम
सप्तदशोऽध्यायः

---

[1] ग-घ–बिम्बाद्या द्विज

*

अथ अष्टादशोऽध्यायः

श्री भगवानुवाच—

अथ ते संप्रवक्ष्यामि यागे (?गं) तु कलशोदरम्।
यत्र [1]यज्ञाङ्गभृद्देवं पूजयन्तीह साधकाः ॥१॥

[2]आचत्वारिंशधा क्षेत्रं भङ्क्त्वा सूत्राणि पातयेत्।
अंशकानां सहस्रं तु [3]विद्धि तत्र शतानि च ॥२॥

[4]षडंशमानं कथितं सूत्रपातं निबोधतु।
प्राक्प्रत्यक्संस्थिता (त्) सूत्रा ‘त) चत्वारिंशत् तथा परम् ॥३॥

सूत्रमेकमुदग्याम्ये तद्वदेव प्रकीर्तितम्।
सौम्ययाम्यैक[5]विंशत्या मध्यसूत्रस्य पञ्चकम् ॥४॥

निधाय संभ्रमेत् सूत्रं मध्यात् सप्तदशं नयेत्।
तस्मात् स्थानादर्धचन्द्रं लाञ्छयेत् सौम्यदिग्गतम् ॥५॥

मध्यमात् पञ्चमाख्यस्य [6]याम्योदङ्नवमस्य च।
[7]श्रृङ्गैकमर्धचन्द्रस्य तस्मिन् बन्धो (?सन्धौ) निरोधयेत् ॥६॥

---

[1] ग–घ–यज्ञाङ्गहृद्देवं
[2] क–अचत्वारिंशते क्षेत्रे भक्ते ग–घ–अचत्वारिंशधा क्षेत्रे भक्ते
[3] क–विधि
[4] क–षडङ्गमानं
[5] क–विंशस्य
[6] ग–घ–याद्योतं नवम
[7] क–शृङ्गै··मध्य

दोस्त्रयस्त्रिशसंख्यस्य [1]पञ्च (?पञ्चमं) मध्यमस्य च ।
[2]सन्ध्यंशे चापरं श्रृङ्गं निरोध्यं दक्षिणे तथा ॥७॥

निधाय सङ्गमे सूत्रं तस्मात् तत्तत् प्रसार्य च ।
[3]यावन्मध्याद् द्विसप्तस्य सन्धितो दशमस्य च ॥८॥

इत्युक्तं लाञ्छनं पूर्वमपरं कथयामि ते ।
मध्याद्याग (?गा) न्तसूत्रस्य अंशी तच्चाष्टमस्य च ॥९॥

कृत्वा सन्धिगतं सूत्रं तस्मात् स्थानात् प्रसार्य च ।
शरवद्दा (?द्धा) द्वितीयस्य समीपं चैव पौष्कर ॥१०॥

तस्माच्चु लाञ्छ्यमानं तु नीलत्वा (?त्वात्व) म्भस्य मीलयेत् ।
लाञ्छनद्वितये सिद्धे विधिनाऽनेन सत्तम ॥११॥

वक्त्रं करिकराकारं सिध्यते जलनिर्गत (?म) म् ।
वृत्तं तस्याग्रतः कुर्याद् [4]भागेनास्ती स्ति ते (?नांशत्रये) न च ॥१२॥

रुचिमन्त्रेण व (?वा) स्त्रेण सर्वमन्त्रगणेन वा ।
सर्वध्वो (?र्वाधो) ध्वानयेत् तस्मान्मध्यसप्तदशां (?शं)नयेत् ॥१३॥

तस्मात् तदर्धचन्द्रं तु लाञ्छयेत् सौम्यदिग्गतम् ।
मध्यात् पञ्चमसंख्यस्य याम्योदङ्नवमस्य च ॥१४॥

---

1. ग–घ–पञ्चमे मध्य
2. क–सद् व्यंशेचावरं
3. घ–'यावन्मध्य' 'इत्युक्तं' 'मध्याद्याग' इत्याद्यर्धत्रयं गलितम्
4. ग–घ–भागेनोस्तिसितन च

शृङ्गेद (?ङ्गक) मर्धचन्द्रस्य तस्मिन् सन्धौ निरोधयेत्।
दोस्त्रयस्त्रिंशसंख्यस्य पञ्चमे मध्यमस्य च ॥१५॥

सन्ध्यंशे (?शो) परिशृङ्गानि निरोध्यं दक्षिणे तथा।
सा लाञ्छ्यमर्धचन्द्रं तु कुम्भस्स्यात् कलशस्य वै ॥१६॥

कल्पनीयास्तथा [1]वारः पश्चादस्याप्यनिर्गतः (?मः)।
मध्यान्नवमसूत्रस्य सप्तविंशस्य दोर्द्विज ॥१७॥

सन्धौ कृत्वा प्रसार्येदं मध्याद्वै पञ्चमं स्फृ (?स्पृ) शेत्।
मत्स्यवल्लाञ्छ्यमानं तु नीत्वा तस्यास्तु सङ्गमम् ॥१८॥

दोरेकचत्वारिंशस्य मध्याद्वै नवमस्य यत्।
वायुवारुणदिङ्मध्ये लाञ्छनं संप्रकीर्तितम् ॥१९॥

तत्तद्वारुणनैर्ऋत्यां मध्ये कुर्याच्च लाञ्छनम्।
आधारः सिध्यते [2]चास्य कण्ठमानेन चोच्छ्रितः ॥२०॥

साधनीयं ततः कण्ठं भारयुक्तं मनोहरम्।
मध्याद्दशमसूत्रस्य प्रत्यो (?प्राच्यो) दक्प्रथमस्य च ॥२१॥

निधाय सङ्गमे सूत्रं मध्यादेकादशं स्पृशेत्।
लाञ्छ्यमानं नयेद् सिद्धिं द्वितीयस्य [3]भुजाविधा ।२२॥

---

[1] ग-घ-पारः

[2] क-ख-ग-घ-चस्य कर्ण

[3] ख-ग-घ-भुजाभिधा

मध्याद्…………तत्सूत्रं कमलेक्षण।
अथ यूपान्नवाख्यस्य याम्योदग्द्वितयस्य च ॥२३॥

कृत्वा वै सङ्गमं तेन मध्याद्वै दशमं स्पृशेत्।
मत्स्यवत्तन्नयेत् सूत्रं सन्ध्यांशात्तन्निबोध मे ॥२४॥

मध्या[2]न्नवमसंज्ञस्य सत्वस स्त्रियस्य च तत्?।
अनेन विधिना तेन मुखमस्य तु सिध्यति ॥२५॥

नवमस्य च वै स्तम्माद्वाहुतप्तैकमस्य च?।
निधाय सङ्गमे सूत्रं स्पर्शं मध्यात्तु पञ्चमम् ॥२६॥

[3]मत्स्यवल्लाञ्छ्यमानं यन्मत्स्यवत् सङ्गमं नयेत्।
यद्वै? भुजतृतीयं स्यान्नवमस्य तु वै ध्रुवम् ॥२७॥

एवमुत्तरदिक्कुर्याल्लाञ्छनं दक्षिणे तु वा।
[4]सुव्यक्तं सिध्यते कण्ठं कुम्भस्य [5]सालोचनम् ॥२८॥

अस्याम्बुवाहमस्यैव? कार्यमाग्नेयदिग्गतम्।
दोस्त्रयोदशसंख्यस्य मध्यात् सप्तदशस्य च। ॥२९॥

---

1. क–'मध्याद्' इत्याद्यर्धं गलितं
2. ग–घ–न्नवमसंज्ञस्त्वसंस्तृतीयस्य…वत्
3. ग–घ–समास्याल्लाञ्छ्यमानं
4. सर्वत्र 'स्वत्तं' इत्यस्ति 'सुव्यक्तं' इति स्यात्
5. ख–ग–घ–स्याललोचनम्

निधाय सङ्गमे सूत्रं तस्मात् तत् संप्रसार्य च ।
यवमध्याद् द्विसप्तस्य सन्धितो दशमस्य च ॥३०॥

पातयित्वा तु तत् सूत्रं ततो लाञ्छनमारभेत् ।
संवोत् (?स्तम्भात्) सप्तदशाख्यस्य सप्तमस्य भुजाविधात् ॥३१॥

कृत्वा सूत्रं सन्धिदेशे सङ्गमं तत् समानयेत् ।
यत्र बाहुत्रये यत्र ध्रुवात् सप्तदशस्य च ॥३२॥

[1]स्थानं तत् स्याल्लाञ्छ्यमानं संमील्यास्फालितस्य च ।
इत्युक्तं लाञ्छनं पूर्वमपरं कथयामि ते ॥३३॥

मध्यात् प्रागुक्तसूत्रस्य अंशतश्चाष्टमस्य च ।
कृत्वा संधिगतं सूत्रं तस्मात् स्थानात् प्रसार्य च ॥३४॥

[2]शरद्वौ (?शरवद्वौ) घ द्वितीयस्य समीपं चैव पौष्कर ।
तस्मात्तु लाञ्छ्यमानं तु तु तिलत्वाभस्य? मीलयेत् ॥३५॥

लाञ्छनद्वितये सिद्धे विधिनाऽनेन सत्तम ।
वक्त्रं करीकराकारं सिध्यते जलनिर्गमम् ॥३६॥

वृत्तं तस्य ततः कुर्यात् भागेनोर्ध्वस्थितेन च ।
रुचिमन्त्रेण वाऽस्त्रेण सर्वमन्त्रगणेन वा ॥३७॥

---

1. क स्थानात्
2. क–शरद्वौ···द्वितीयस्य

[1]सर्वध्वेध्वाप्तये स्मानं (?सर्वाध्व प्राप्तये स्थानं) ज्ञातुमिच्छति योऽर्थिषु।
समस्तविन्धुतप्रातः? [2]सशीयां लब्धयेऽस्य च ॥३८॥

संमार्ज्य मध्ये मन्त्रे तु सर्ववस्तुषु सर्वदा।
हिंसका ध्वंसते सप्त पातालगतिसिद्धये ॥३९॥

समयानां तु दोषाणामखिलानां तु शान्तये।
साम्बुवाहमदं विप्र [3]कुर्यान्न ह्यत्र पूजयेत् ॥४०॥

स्थितं सूत्रद्वयं वक्त्रे याम्योत्तरगतं तु यत्।
प्रथमामपि भुवं च स्थापनीयेन मार्जयेत् ॥४१॥

पूर्वाद्यारभ्य भागस्य (द्वे द्वे) पङ्क्ति(क्ती) द्विजाधिप।
तया वृत्तद्वयं (?ये) कुर्यात् [4]कण्ठसूत्रं यथा भवेत् ॥४२॥

कुर्याच्छतचतुष्केण कोष्ठकानां तु मध्यतः।
दलाष्टकयुतं पद्मं नवशिष्टं तु शोधयेत् ॥४३॥

भागपङ्क्तित्रये बाह्याद् द्वारदिक्क (?द्वारादीन्क) लक्ष्य शङ्खवत्।
द्वे चतुष्क् क्रमादंशौ द्वाराच्छोभोपशोभयोः ॥४४॥

एकांशस्त्रीण्यतः पश्चात् (?पञ्च) सप्तविंशत्यथ शृणु (?थास्त्रिषु)।
चतुष्कमुपशोभान्या (?थं) विदिक् [5]शोभगणं तथा ॥४५॥

---

1. क–ख–···ध्वोध्याप्तये···स्मानं
2. ख–ग-वशिधा घ–वशिथालब्धये ह्यथ
3. ग–घ–कुर्यान्यिन्यत्र
4 क–कर्णसूत्रं
5. ग–घ–शोभा····गणं तथा

जायतेऽनेन विधिना द्वारैः पूर्वापारं विना।
संपूर्य (?र्यं) रजसा पश्चादथ तत् कथयाम्यहम् ॥४६॥

लाञ्छनानि सवृत्तानि पत्राण्यत्युज्ज्वलेन च।
रजसा रक्तवर्णेन हेमाभेन तदन्तरम् ॥४७॥

नृपोपलनिभेनैव त्वरुणेन सितेन च।
प्रपूरणीयं कण्ठस्थं [1]क्रमाद्वृत्तगणं ततः ॥४८॥

ऊर्ध्वस्थं जलजातस्य वृत्तविद्रुमरूपिणा।
रागेण रञ्जयेत् सर्वं कृत्वैवं लक्षणान्वितम् ॥४९॥

चतुरश्रस्य मध्ये तु वराहं संयजेत् ततः।
सप्तद्वीपाधिपत्यार्थी निष्कामो ह्यथ शक्तिमान् ॥५०॥

वृत्तादीनां च बिम्बानां या मध्ये परिकल्पना।
भागैरम्बुजसिद्ध्यर्थं नवपीठ [2]विना तु सा ॥५१॥

यद्येकस्मिन् द्विज क्षेत्रे वृत्तादीन् परिकल्पयेत्।
तेषामन्तर्गतं कुर्यात् कुर्यात् (?पश्चात्) कमलसञ्चयम् ॥५२॥

प्राक् परि[3]ज्ञाय चात्यल्पं बिम्बं निर्वृतिपङ्कजम्।
[4]पश्चाद्वै तेन मानेन शेषं पद्मगणं लिखेत् ॥५३॥

---

1. क–विना
2. क–विना ...
3. क–ज्ञाय चा ... बिम्बानिवृत्त ग–घ–बिबा निर्वृत्ति
4. ख–पश्चाद्वैतानि

इत्युक्तमरविन्दाक्ष यत् त्वया [1]चोदितो ह्यहम्।
नवमण्डलगर्भं च नवद्वारपुरोपमम् ॥५४॥

भक्तानामारुरुक्षूणां प्रायश्श्रेयस्करो (?ं) नृणाम्।
नैतस्मादपरं चान्यदस्माच्चाहं (?) तु मन्यते ॥५५॥

यागानां चैव सर्वेषां प्राधान्यत्वेन वर्तते।
तदवाच्यमभक्तानां शठानां चात्मवैरिणाम् ॥५६॥

नास्तिकानां तु पापानामन्यदर्शनसेविनाम्।
[2]क्रमक्रियोज्झितानां च द्विजातेर्द्विषतामपि ॥५७॥

एषामन्यतमानोऽपि (?नां हि) वक्तव्यं वै प्रजापते।
नवगर्भस्य यागस्य विधानं शास्त्रचोदितम् ॥५८॥

यस्त्विमं पूजयेत् पश्चात् स्वशक्त्या विभवेन वा।
सोऽनन्तं फलमाप्नोति ऐहिकामुष्मिकं शुभम् ॥५९॥

पठ्यमानस्य वै यस्य याति [1]वाग्विभव (म) क्षयम्।
येनापि च सकृद्दृष्टो महायागश्च पूजितः ॥६०॥

---

1. ख–चोदितोस्म्यहम्
2. क–कि · कियो
3. अत्र 'वाग्मित्वमक्षयं' इति चेत् साधु

तस्य जन्मसहस्रोत्थ [1]मेनसं विलयं व्रजेत् ।
क्रमाद्यास्यसि देहान्तं [2]तेनेत्थं स्था (?याग) गणस्य च ॥६१॥

तस्मात् पूज्यमिदं शक्त्या द्रष्टव्यं पूजनं विना ।
यागसंज्ञं शुभं ब्रह्मन् ब्रह्मप्राप्तिफलप्रदम् ॥६२॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
नवनाभलक्षणो नाम
अष्टादशोऽध्यायः

---

[1] क–ख–मेनसां

[2] ग–घ–तेन त्वं

*

अथ एकोनविंशोऽध्यायः

पौष्कर उवाच—

लक्ष्मीनाथ ममाचक्ष्व हेतुना केन हीयते ।
येनातिसुदृढो [1]भावस्त्वयि चात्र सदैव हि ॥१॥

[2]धाम (?याम)) या (?था) श्रित्य शाठ्येन [3]महार्हमपि लीलया
[4]द्रष्टव्यं (?दृष्टवा) वा पूजितं वै (?चैव) दूरादपि [5]नमस्कृतम् ॥२॥

प्राप्यते चक्रवर्तीनामाधिपत्यं तु पौष्कर ।
सकामैर्भगवानत्र ब्रह्म नारायणात्मकम् ॥३॥

विना सद्भक्तिभावेन त्विष्टं? विप्राचिरात्ततः र
हेरा ततस्तु मूलानां वन्दनीयामपरेषु च ॥४॥

[6]सिद्धितश्श्रद्धया यैस्तु त्वर्पितश्चानलान्तरे ।
[7]संस्कृता परया [8]भक्त्या ते पूज्यत्वं गतादिह ॥५॥

---

1. ग–घ–भावस्त्वथ चात्र
2. क–ख–यामयाश्रित्यः
3. ग-घ–महार्थमपि
4. ख–दृष्टं वा घ–दृष्टं वै वा
5. क–तमस्तुतम ग-घ -तमस्कृतम्
6. क–सिद्धितच्छुद्धया ख–सिद्धितच्छृद्धया
7. क- वस्तुता ग–संस्तुता
8. क–भक्त्या पूज्यत्वं

ब्रह्मादित्येन्दुरुद्राणामयोनां (?) सिद्धसन्ततेः।
सद्यागयाजी मनुजो यावद्देहे[1]ऽवतिष्ठति ॥६॥

तावदस्य फलं भूयो जीवमुक्तस्य मे शृणु।
संपूर्णायुश्च भवति [2]ह्यपमृत्युविवर्जितः ॥७॥

नीरुजो हृष्टतुष्टश्च बलवानप्यकण्टकः।
प्राप्नोत्यनुपमैश्वर्यं वल्लभस्सार्वकालिकम् ॥८॥

पुत्रदारांस्तथा बन्धून् [3]सभृत्यबलवाहनः।
विवेकधर्मसंयुक्तो वृद्धिं याति क्षणात् क्षणम् ॥९॥

करोत्यत्र महायागं संकल्पादेव केवलात्।
लभते विपुलां कीर्तिं सध्दर्मेणाभिवर्धते ॥१०॥

कर्मणा मनसा वाचा यत् प्रागशुभमार्जितम्।
आबाल्यात् तस्य तत् सर्वं नाशमायाति तत्क्षणात् ॥११॥

कि पुनर्योऽत्र निष्णातस्सर्वभावेन सर्वदा।
चतुर्वर्गफलार्थी वै साधुमार्गे व्यवस्थितः ॥१२॥

अतीताद्वर्तमानाच्च [4]ह्येष्यादखिलात् कुलात्।
तदीया ब्रह्मलेकं च नरकस्थाश्च यान्त्यपि ॥१३॥

---

[1] क-देहं पतिव्रत
[2] क-ह्यप मत्य विवजयेत्
[3] क-ख–समृत्याबलवाहता
[4] क–घ–माना च ददेव्या

यानैश्चंद्रप्रतीकाशैर्द्योतयद्भिर्दिशो दश।
[1]स्तूयमानश्च गन्धर्वैर्गीयमानश्च किन्नरैः ॥१४॥

वीज्म (ध्य) या (?मा) नश्च चमरैरप्सराभिः समन्ततः।
अयमेव महात्मासौ [2]देहपातादनन्तरम् ॥१५॥

स कायाः कामचारि स्यात् सर्वत्र भगवानिव।
प्राग्भुक्ता चाणिमादीनि स्वेच्छयाऽवतरेत् पुनः ॥१६॥

जात्युत्कर्षं समाश्रित्य प्रभावात्तस्य कर्मणः।
कुले सतां च सिद्धानां देशे धर्मपरे शुभे ॥१७॥

[3]जातस्तमाच्छ्रिया युक्तो धीमान् सत्यपराक्रमः।
प्रवर्तनार्थमन्येषां भविनां करुणापरः ॥१८॥

भुञ्यमानस्तु विषयानविरुद्धान् सदैव हि।
ज्ञानकर्मरतः सम्यङ्मतिमान् सुप्रसन्नधीः ॥१९॥

तिष्ठेद्यथेष्टं संसारे रागनिर्मुक्तमानसः।
अन्ते भूतमयं [4]देहं त्यक्त्वाऽस्ते वासुदेववत् ॥२०॥

सकृदप्यर्चितो देवो नवाब्जे मण्डलोत्तमे।
[5]विद्याबीजे समुद्भूते विद्यामात्रे विनिर्मिते ॥२१॥

---

1. क–ख–ग–घ–स्तूयमानैश्च गीयमानैश्च
2. ग–घ–देव पादादनन्तरम्
3. ग–घ–जात तस्याश्रया
4. क–अन्ते तु पातयेत्
5. क–ख–विद्याबिम्बे

विश्वात्मा मूर्तिभेदस्य सत्यानन्दस्वरूपधृक् ।
विरजस्कैरसुक्तैस्तु मन्त्रैर्ब्रह्मप्रकाशकैः ॥२२॥

न भूयस्संभवस्तस्य भवेऽस्मिन् भयसंकुले ।
आरम्भावं (?आरम्भे एव) कामस्य नौष्ठिकस्यापवर्गिणः ॥२३॥

पौष्कर उवाच—

मूर्तयस्तु मया सम्यक् परिज्ञाताः पुरात्र [1]याः ।
ज्ञातुमिन्छामि विद्याख्यं मन्त्राणां लक्षणं प्रभो ॥२४॥

यैः पञ्चकल्पना कार्या पद्मैर्निर्वर्तितैः प्रभो ।
ब्रह्मप्रकाशकानां तु मन्त्राणामथ लक्षणम् ॥२५॥

यैरुद्दिष्टं महायागे नवाब्जे पूजनं तथा ।

श्रीभगवानुवाच—

सर्वकामप्रदातव्यं (?त्र्न्यं च) इच्छाधारानिभं तव ।
महासमूहविभव क्षेत्रभूतास्पदेति च ॥२६॥

[2]मध्यपद्मे पदानां च नवकं परिकीर्तितम् ।
तत्त्वगर्भ (?र्भं) जगद्बीजं क्षारते क महात्मने ॥२७॥

[3]विद्यात्स्वरूपं निखिलमव्यक्तं [4]त्रिगुणेन वै ।
शब्दब्रह्ममसंख्येयं [5]भगवामाग्यहामयः ॥२८॥

---

1. क-ख-पुरात्रयैः
2. ग-घ-मध्यपद्मपदानां च
3. विद्युत्स्वरूप
4. ग-घ-त्रिगुणे तु वै
5. क-भगवाभावमहाप्रथम् '

प्रकृते बहुमूर्तेऽथ प्रधानालम्बने तथा।
पादं वै ब्रह्मसोपानं तृतीये कमलेऽब्जज ॥२९॥

[1]संकल्पसिद्धिविषयानथ वस्तुप्रकाशक।
अविनाश महाबुद्धे व्यूहादष्टगुणा यतः ॥३०॥

मायामयेऽन्ते कमले चतुर्थे तु पदं स्मृतम्।
गुप्त प्रत्यक्ष नीरूप सर्वाधार सुखास्पद ॥३१॥

प्रजापते जीवकोश लिङ्ग[2]पुर्यष्टके ति (?च)।
दिग्देशकालप्रकटात् [3]चिद्बुद्धेर्बुद्धिगोचर। ॥३२॥

[4]धर्मोदये तु····रिति [5]सर्वेच्छापरिपूरकः।
[6]परिमाणो विश्वरूपं वा स्पष्टे मम्बुजेत्यमी ॥३३॥

सदातनोऽप्यपूर्णश्च [7]भद्रसर्वाभगास्सता।
नानास्वरूप [8]शब्दादेर्बहुभेदो ततोऽब्जज ॥३४॥

---

1. क–संकल्पसिद्धविषयात्
2. ख–ग–घ–पुर्यंष्टके दिवैः
3. क–ख–चिद्ब्‌द्धेः प्रतिगोचराः।
4. क–दर्भोदधेतु...रिति
5. ग–घ–परिपूजकः
6. ग–घ–परिमाणे
7. ख–सर्वंभगास्पद, ग घ–भद्रसर्वाभगस्सदा
8. ग–घ–दब्दादे बहुभेदे

[1]प्रभवच्चिद्य ब्रह्मेति सप्तमेति [2]क्रमाक्रमैः।
व्यक्ताव्यक्त ततो माये विद्ये [3]व्यक्तविकासके ॥३५॥

[4]पुरो...च्छिन्नसंतान अष्टमे कमले पदात्।
भूतभव्य भविष्याथ परिमाण विजृम्भिताः ॥३६॥

महाचक्रमहावर्ता सिद्धे सिद्धफलप्रदा।
इति विद्यापदानां च स्वरूपेण प्रकाशितम् ॥३७॥

अथ ब्रह्मपदानां च लक्षणं चावधारय।
सकृद्विभागता सद्ब्रह्म सुप्रतिष्ठित अनाहतः ॥३८॥

महा विभूषतानन्द ध्रुतमित्योऽमि (दि) ताक्षर।
अज संपूर्णषाड्गुण्य अचिन्त्याद्भुत केवल। ॥३९॥

सर्वशक्ते असंकीर्ण सुशान्त पुरुषोत्तम।
शाश्वताचल सर्वेश निर्विकार निरञ्जन ॥४०॥

[5]स्वभाव वासुदेवस्य [6]निस्तरङ्गे स्त्रिपौष्कर।
उपादेयमनौपम्य [7]सुप्रकाशास्थिरामृत ॥४१॥

---

1. ग–घ–मभवच्छाद्य
2. ग–घ–क्रमः क्रमैः
3. क–ग–व्यक्तिविकासकः
4. ग–घ–प्ररो...च्छिन्नसंताने
5. क–ख–पंसुदेवस्य
6. ग–घ–निस्तरङ्ग इति साधु–
7. क–ख–संप्रकाश

[1]अग्राह्यानन्त चिद्रूप हंसेति तदनन्तरम् ।
[2]अव्ययातर्क कूटस्थ निर्मलापार सद्बृहत् ॥४२॥

सर्वातिशायिनी यत्र इत्यब्जे पद्ममेऽब्जज ।
पुण्डरीकाक्ष संबुध्द परिपूर्णगुणोज्झित ॥४३॥

अकलङ्क असङ्कल्प [3]ज्ञेयापरिमित श्रिया ।
[4]सदानन्दापतीहीनि बीजं हन्यपलायन ॥४४॥

अनन्त संमितस्सर्वं ज्ञानज्ञेय सनातन ।
विकासित्वैथसैर्यक्ष परमानन्द भास्वर ॥४५॥

स्वच्छन्दगमनालोक नित्यतृप्त निरञ्जज ।
लोकनाथ अनिर्देश्य प्रशान्त परमेश्वर ॥४६॥

निष्कम्प निर्विकल्पे कं महाधर्म [5]महामतम् ।
इति ब्रह्मपदानां च लक्षणं संप्रकाशितम् ॥४७॥

यैस्स्मृतैः पूजितैर्वा तैर्ब्रह्म संपद्यते पुमान् ॥

पौष्कर उवाच—

नष्टासिद्धिप्रदाः पूर्वं कथिता मूर्तयस्तथा ।
मन्त्रासिद्ध्यस्यास्य किमत्रार्थंप्रयोजनम् ॥४८॥

---

1. ग–ख–अग्राह्यानन्द
2. अतर्क्य इति साधु
3. क–ख–ज्ञेयापरिमिति
4. –ग–घ–पतिहिनि
5. ग–घ–महात्मन्

श्री भगवानुवाच—

कर्षणादिप्रकृष्टस्य [1]विज्ञानेनान्वितस्य च।
केवलाब्जाब्जसंभूतं तथा रूपफलात्मह ॥४९॥

[2]तत्वैर्ज्ञानानुसिद्धिश्च फलभावनया विना।
ऊर्ध्वंतो देहविन्यासो विदधादच्युतं पदम् ॥५०॥

प्रवृत्तिश्च निवृत्तिश्च कर्मचैतद् द्विधाऽब्जज।
जयन्ति भोगैकरताः प्रवृत्तेन तु कर्मणा ॥५१॥

परितृप्तास्तुसम्भोगैः [3]निवृत्तेनाचरन्ति च।
सर्वदा षड्गुणैश्वर्यं फलेन हि स सिध्यति ॥५२॥

तानि संशुध्दभावानां भावसंसिध्दभाविनाम्।
विद्याब्रह्ममयाख्यैस्तु नित्यमेव तथाऽब्जज ॥५३॥

प्रवृत्तिफलदा मन्त्रा यैर्विद्या[4] तपचर्यते।
कर्मणा केवलेनैव फलमिच्छति योऽचिरात् ॥५४॥

शृणु तेन यथा कुर्यात् त्वाधाराधेयकल्पने।
सर्वकामप्रदाद्यैस्तु पादैः कल्प्य कजावलीम् ॥५५॥

कर्णिकादौ यथासिद्धिं [5]प्रवृत्तिदशगोचर।
पादानां नवकेनैव [6]मधिष्ठायां तु मध्यमम् ॥५६॥

---

[1] क–ख–विज्ञानेनोज्झितस्य
[2] क–ख-तत्त्वज्ञानानुसिद्धिश्च
[3] क–ख–निवृत्तो नाशयन्ति
[4] ग-घ–विद्या तव चर्यंते
[5] क–ख–प्राक्प्रन्त्रिदशगोचरा
[6] क–ख–मनिष्यायां तु

[1]ततास्त्विन्द्रपदं स्या (?पदस्थाच्च) च्च पद्मादीशपदावधि ।
मध्यपद्मक्रमेणैव नवकं नवकं न्यसेत् ॥५७॥

पादानां कर्णिकादौ तु व्यधिष्ठातृव्यपेक्षया ।
एवं विद्यामयं पद्मं व्यूहं निष्पाद्य सर्वदा ।.५८॥

अराधनार्थं मूर्तीनां भोगमोक्षफलाप्तये ।
सांप्रतं [2]भोगयागार्थं पादपूजाक्रमेण तु ॥५९॥

[3]सकृद्विभागपूर्वैस्तु पदैः सद्ब्रह्मवाचकैः
प्रणवादिनमोन्तैस्तु अर्घ्यपुष्पादिनाऽर्च्यते ॥६०॥

क्रमेण प्रभवेनैव तल्लक्षणमथोच्यते ।
मध्ये [4]मध्यगते पद्मे [5]प्रापदं (?प्राक्पदं) विनिवेश्य च ॥६१॥

प्रभातयष्टुष्वान्याद्या पादादाग्नेयदिग्दलम् ।
यद्भ्रमं विधिना येन प्रागुक्तं [6]न तु तादृशम् ॥६२॥

अत्रापि नित्यसंसिद्धं प्राग्भागं च समाश्रयेत् ।
पद्मानां पद्मपत्राणां पादपूजाविधौ सदा ॥६३॥

---

[1] क-ख—ततस्त्वीन्द्रपदम् ।

[2] ग-घ—भोगयोगार्थम्

[3] ग—घ—संक्रुद्विभात

[4] क—ख—मध्ये मध्ये गते

[5] क—ख प्राचदम्

[6] —ग—घ—न तु तामृतम्

ततोऽवतार्य संपूज्य स्वेच्छया तत्र मूर्तया (?यः)।
[1]एकमूर्तिर्द्विमूर्तिश्च त्रिमूर्तेन्तमयावति ॥६४॥

मध्ये पद्मो (?द्मात्) समारभ्य यावदीशानपङ्कजम्।
विद्यातत्त्वप्रदानं तु पूजनं प्राहरेत् ततः ॥६५॥

स्वाहान्तं प्रणवाद्यानां मध्यपद्मादितः क्रमात्।
कर्णिकादौ समारभ्य पू (?म्) तैंरग्रच्छदात्तु वै ॥६६॥

तत्प्रागपेक्षया यावत् प्रादक्षिण्येन मध्यगम्।
अनेनैवाब्जसंभूत न्यायेन कमलाष्टकम् ॥६७॥

मध्यपद्मस्य यागाभ्यां बाह्यस्थ पूरगीय च।
सर्वगा मध्यमा मूर्तिस्सर्वतोऽक्षिशिरोमुखम् ॥६८॥

भावयित्वाऽथ विन्यस्य यावता यत्र कुत्रचित्।
आवाह्यान्यत्र विन्यस्य मूर्तयस्तस्य संमुखाः ॥६९॥

अथार्चावसरे प्राप्ते मूर्तेर्मूर्तेः क्रमेण तु।
संमुखीकरणं कुर्यादात्मना सह पौष्कर ॥७०॥

एवमुक्तं [3]सकामानां वेदन्यासं तु चार्चनम्।
[4]कैवल्यं यः क्रियात् पूर्वमभ्यर्थयति साधकः ॥७१॥

---

1. -ग-घ-एवं मूर्तिद्विमूर्तीश्च त्रिमूर्तेन्तवधापति
2. -क-एवमुक्तं समानानोम्
3. -क-ख-एवमुक्तं समानानाम्
4. ग-घ-वैकल्यम्

[1]पदमन्त्रैस्तु विद्याख्यैः प्राग्वत्पद्मजकल्पना ।
निष्पाद्याप्यययुक्ता वै ततो मोक्षापि ततैः ॥७२॥

क्रमेण पूजनं कुर्याद्यजेन्मूर्तिगणं ततः ।
भूयो मध्यस्थपद्माच्च कुर्याद्ब्रह्मवदर्चनम् ॥७३॥

भ्रमणेनाभ्यचाख्येन तस्यापि शृणु लक्षणम् ।
अविद्याख्यव[2]दाद्यात् प्रागुक्तमखिलं च यत् ॥७४॥

व्यत्ययं विद्धि तत्सर्वं सविधानं तु ।

पौष्कर उवाच—

वासुदेवादिमूर्तीनां नवानां कथितं पुरा ।
पूजार्थं नवपद्मं तु सबिम्बं मण्डलोत्तमम् ॥७५॥

इदानीं नयतस्तस्मान्मध्ये चाग्निं यथास्थितम् ।
एकद्वित्रिचतुष्पञ्चमूर्तयस्तु [3]तथेच्छया ॥७६॥

कथ (?थं) नवानामब्जानां पूजनीयं ममादिश ।

श्रीभगवानुवाच—

बिम्बपीठादिसंयुक्तं नवाब्जमण्डलं हि यत् ।
पुरा प्रोक्तं तु वै तस्मिन् स्थासाश्च नवमूर्तयः ॥७७॥

---

[1] क–घ-पदमध्यैः

[2] अविद्याख्यपदादाद्यात् इति स्यात्

[3] ग–घ–यथेच्छया

साङ्गास्सपरिवाराश्च न्यस्तव्याश्च सकृत् सकृत्।
बिम्बं विधानपीठादि द्वाराद्यै र्नवभिर्युतम् ॥७८॥

वृत्तं रेखागणेनाथ सर्वैस्तैरुज्झितं तु वा।
[1]नवाब्जं मण्डलं कृत्वा यथासंपत्तिविस्तृतम् ॥७९॥

विद्याब्रह्ममयैर्मन्त्रैर्निमित्तं पूजितं तथा।
साधारमेकमूर्तादौ मूर्तीनां विध्दि तद्द्विज ॥८०॥

स त्याप्तौ सन्निधानं च नवमूर्तेर्विशेषतः।

पौष्कर उवाच—

नवमूर्तेर्मया ज्ञातं पुरा चात्र निरोधनम्।
एकमूर्तेस्समारभ्य अष्टमूर्त्यवसानकम् ॥८१॥

अथ मन्त्रं जगन्नाथ विन्यासं तु विधीयते।

श्रीभगवानुवाच—

षडङ्गमेकमूर्तिं च ह्येकैकं नवकं न्यसेत्।
नवानां कर्णिकानां तु तदङ्गानि दलेषु च ॥८२॥

द्विमूर्तेः प्रथमा मध्ये द्वितीयाष्टासु वै क्रमात्।
[2]त्रिमूर्तेर्दिक्चतुष्केऽथ[3] द्वितीयां विनिवेश्य च ॥८३॥

---

1. ग-घ-नवाब्जमण्डलम्
2. क-ख-दिक्चतुर्थात्प्राक्
3. अत्र क–ख–कोशयोर्ग्रन्थो गलितः अर्धचतुष्टयात्मकः प्रत्युत गलितस्य तुरीयार्धस्य द्वितीयः पादः प्रमादादत्र संयोजितः यथा त्रिमूर्ते दिक् चतुर्थात् प्राक् आग्नेयमम्बुजद्वयं इति।

विदिक्ष्वष्टचतुष्केषु तृतीयायां समन्वितः।
प्राक्प्रत्यगाभ्यां पद्माभ्यां चतुर्मूर्तेर्वरं न्यसेत् ॥८४॥

तृतीया याम्यसौम्याभ्यां चतुर्थी कोणकेणु च।
पञ्चमूर्तेर्द्वितीयाथ प्रागाग्नेयाम्बुजद्वये ॥८५॥

तृतीया याम्यया त्वब्जे चतुर्थी वरुणानिले।
उदगीशगताभ्यां तु पद्माभ्यां पञ्चवि (?वि) न्यसेत् ॥८६॥

षण्मूर्तेरीशदिग्पद्मे द्वितीयां विनिवेश्य च।
तृतीयां पूर्वसौम्याभ्यां वह्निवायुगतेषु च ॥८७॥

पञ्चमं पश्चिमे याम्ये षष्ठी निर्ऋतिनिर्गते।
ईशपूर्वस्थपद्मानां सप्तमूर्तेस्तु या परा ॥८८॥

तृतीयाग्निपदस्थे च चतुर्थी दक्षिणे कजे।
रक्षो वारुणपद्माभ्यां पञ्चमा कमलोद्भव ॥८९॥

वायव्येऽथ उदक्पद्मे शेषमूर्तीश्च विन्यसेत्।
ईशप्रागग्निपद्मेषु यात्वाप्यानिलकेषु च। ॥९०॥

द्वयेऽनिले सौम्ययाम्ये अष्टमूर्तेस्सदाब्जज।
अङ्गीकृत्य पदन्यासमिहोक्तं द्विविधं तु वै ॥९१॥

संकल्पविहितं मन्त्रं सव्याप्तान्वया यजेत्।
शशि ब्रह्म समाप्नोति स्वादुष्टादमिरीप्सितम् ॥९२॥

इदमुक्तं समासेन सामान्यं मूर्तिपूजनम् ।
वक्ष्ये विशेषविन्यासं नवात्वन्यत्र मण्डले ॥९३॥

स्थितसंचारभेदेन पुनः पुण्येन पद्मज ।
विन्यस्य कोटरोर्ध्वे च आदिमूर्तिं च मध्यतः ॥९४॥

तदीयमथलाखीनं स्वस्थानेऽङ्गगणान्न्यसेत् ।
ततः पत्राष्टके पूज्यं क्रमात् संकर्षणादिकम् ॥९५॥

अथ प्राक्पङ्कजे स्वोर्ध्वे यजेत् संकर्षणं द्विज ।
वासुदेवादिकं कृत्वा तच्छेषं मूर्तिसप्तकम् ॥९६॥

तथैवावरणत्वेन यजेत् पत्राष्टकं क्रमात् ।
एवमेव वराहान्तं क्रमान्मूर्तिगणं यजेत् ॥९७॥

किन्तु कोटरय तस्य मन्त्रमूर्तेर्महात्मनः ।
विनिवेश्यादिमूर्तिं च समासात् तालकेतुवत् ॥९८॥

एवं हि मूर्तिनवकमब्ज•••च्छे न वशं न्यसेत् ।
संसारभयभीतं तु सर्वकामफलाप्तये ॥९९॥

पादानां च विलोमेन यथोद्दिष्टं पुरार्चनम् ।
वाराहात् वासुदेवाधि नाथ फलवशाद्भवेत् ॥१००॥

मूलमन्त्रस्य मूर्तीनां सामान्ये गगने सति ।
मूर्तीनां तु तनुन्यासं प्राप्तादङ्गगणात्तु वै ॥१०१॥

---

1. क–ख–मम नवत्वन्यत्र

असामान्येषु वैतेषु मालानां प्राङ्निवेशनम् ।
[1]कृत्वाऽथ पञ्च सप्त च (?प्तैव)तृतीये विनिवेश्य च ॥१०२॥

[2]द्वाविंश पञ्चसप्तस्तु तत्राद्यं च प्रभात्मकम् ।
[3]साकारं परमं चैव नामध्यानोपलक्षितम् ॥१०३॥

अपरं कमले स्वे स्वे एकपद्मेऽथ पौष्कर ।
पद्मन्यासप्रयोगेण दलमलक्षितो तु वा ॥१०४॥

न्यस्तव्यमर्चनीयं च नानाध्यानोपलक्षितम् ।
प्रभवस्थितिसंहारन्यासमूर्तियुतस्य च ॥१०५॥

साङ्गस्य मन्त्रनाथस्य न्यासमापेक्षितं द्विधा ।
सिध्दयेऽर्चनपूर्वाणां कर्मणां नित्यमेव हि ॥१०६॥

मूर्तिन्यासस्तु विहितः [4]प्राङ्मूलाङ्गगणात्तु वै ।
यस्माद्वै मन्त्रवेत्तॄणां षाड्गुण्यफलदास्तदा ॥१०७॥

अणिमाद्यां प्रयच्छन्ति तदाङ्गानि महात्मनाम् ।
मूर्तिभ्यस्त्वविविक्तं यन्मन्त्रेशगुणजं फलम् ॥१०८॥

तदङ्गानि प्रयच्छन्ति [5]मदमस्फुटमञ्जजः ।
स्थित्यर्थं बहिरङ्गत्वं क्वचिन्मूर्तिभिराश्रितम् ॥१०९॥

---

1. ग–घ–कृत्वाथ सप्त पञ्चश्च मूर्तयो विनिवेश्य च
2. ग–घ–द्विविंशसप्तपञ्चस्तु तत्राद्यम्
3 क–ख–ककारच···वनाम
4. घ–प्राङ्मूलां गगनात्तु
5. क–ख–मन्त···स्फुट मन्त्रमस्फुटमिति स्यात्

अनुग्रहार्थं भक्तानां भोगमोक्षाभिलाषिणाम्।
भक्तानां [1]भविनां नाथ ह्यन्तरङ्गत्व (स्त्व) मेव हि ॥११०॥

स्वयमङ्गीकृतं विप्र तेषां संसारशान्तये।
एवं न्यस्यार्चयित्वा तु कुर्याद्भक्तिपुरस्सरम् ॥१११॥

विशेषपूजनं तन्मे गदतश्चावधारय।
हिरण्यमानं रजतैस्सौवर्णैः कमलोत्तमैः ॥११२॥

पद्मरागमहानीलवज्रैर्वैडूर्यभूषितैः।
सत्प्रवाल[2]महामुक्ताफलसन्तिच्छपूजितैः ॥११३॥

ततोऽन्यैस्सुशुभैः पुष्पैर्यथाकालोद्भवैर्यजेत्।
तुषार[3]क्षारवल्मीकमलयारुणवासितैः ॥११४॥

सुगन्धैर्मधुरैर्धूपैः [4]पट्टवस्त्रानुलेपनैः।
केयूरकटकैश्चित्रै[5]र्मुकुटैः कङ्कणैस्तथा ॥११५॥

महार्हैस्सुशुभैर्हारैरङ्गुलीयकनूपुरैः।
संपूज्य परया भक्त्या नवाब्जोदरगं विभुम् ॥११६॥

---

[1] भक्तानां भविमानार्थम्
[2] घ–महानील···फलसंतिच्च
[3] ग–घ–क्षोरवल्लीक
[4] ग–घ–पट्टवस्त्रं तु
[5] क–ख–मंकुलोकङ्कणैः

व्यजनैश्चामरैश्छत्रैर्दर्पणैश्शयनैर्ध्वजैः ।
घण्टाभिः किङ्किणीयुक्तैः रिंथ (?सि) तैश्छत्रैर्वितानकैः ॥११७॥

नानावर्णपताकाभिरर्धचन्द्रैस्सुबुद्बुदैः ।
गोभिरश्वैर्गजैर्यानैर्बहुभिर्बहुभूषणैः ॥११८॥

[1]प्रतिग्रहैः पादपीठैः पादुकाभिरुपानहैः ।
घृतादिकैर्महादीपैरच्छिन्नैरर्चयेध्दरिम् ॥११९॥

कुसुमप्रग्रहैश्शुभ्रैर्मधुपर्केण वै ततः ।
[2]षड्ऋतुप्रभवैर्दिव्यैर्नैवेद्यैः पावनैः फलैः ॥१२०॥

पवित्रैश्शीतलैस्स्वादुयुग्मगन्धैश्च [3]पानकैः ।
गुळखण्डाचितैर्भक्ष्यैर्बहुभिर्घृतपायसैः ॥१२१॥

सरसाभीरसालाभिः पयसा सुशृतेन च ।
श्रध्दापूतेन मनसा [4]यष्टव्यमजमव्ययम् ॥१२२॥

हेमराजलताम्रोत्थपात्राणि विततानि च ।
हिरण्यतिलसच्छालिरसा बीजान्वितानि च ॥१२३॥

सफलानि सुपूर्णानि मन्त्रार्थं विनिवेश्य च ।
लवङ्गतक्कोलैलात्वक्कर्पूरपरिभावितम् ॥१२४॥

---

[1] पतद्ग्रहैः इति स्यात् ।

[2] ग–घ–सर्वसाप्रभवैः ।

[3] क–ख–ग–वानगैः घ–पानहैः

[4] ग–घ–यष्टव्यजय

जातिपूगफलोपेतं [1]सुसुगन्धान्वितं बहु ।
प्रद्यात्प्रणतश्चान्ते [2]ताम्बूलं जगतः पतेः ॥१२५॥

नानावाद्यविशेषैश्च नृत्तगीतस्तवादिकैः ।
परितोषं नयेत् सम्यक् पुण्डरीकाक्षमव्ययम् ॥१२६॥

यद्यदिष्टतमं किञ्चिन्मनसः प्रीतिदं महत् ।
[3]वाप्य? मविरुध्दतत्तव् सर्वं प्रकल्पयेत् ॥१२७॥

कुम्भमण्डलमध्यस्थमन्त्रमूर्तें जनार्दन ।
अथ त्वत्प्रीतये दानैः [4]हेमानाननगरा (?मरला) दिकैः ॥१२८॥

तन्मयानर्चयेत् तद्बुद्धिशुद्धेनान्तरात्मना ।
नवाब्जे मण्डले ह्यस्मिन्नाब्रह्म [5]भुवनादिकम् ॥१२९॥

पिबतिष्ठत्यनाहूतं मन्त्राख्यावरणाद्बहिः ।
मन्त्राभिमन्त्रितवलैस्सा? दकाक्षय··· ॥१३०॥

आत्मनोश्चोपराधाय? या यज्ञानां? तु सिध्दये ।
अस्यादूरतरे यावद्रलयो मन्त्रसंस्कृताः ॥१३१॥

कीर्तिनाथस्य यागस्य [6]वरदोपरि तद्द्विज ।
यान्ति सिध्दास्तथा मन्त्रे मन्त्रेशैरखिलैर्युताः ॥१३२॥

---

1. ग–घ–सुसुगन्धच्छदम्
2. ग–घ–तांबूलीम्
3. ग–घ–वापिमपिविरुद्धतं च, ख–वाप्यमविरुध्द
4. ग–घ–हेमकानगरा
5. ग-घ-भुवनान्तिकम्
6. ग–घ–परदोषपरिद्विज

भुवना भुवनेशाश्च नत्वा स्तुत्वेश्वरैस्सह ।
देवता वसवस्साध्या अग्नयो वायवस्तथा ॥१३३॥

[1]कुट्याद्यङ्गादयः कालो भूतभव्यभवात्मकः ।
[2]नक्षत्राश्चाखिलास्तारा राशयश्चाखिलग्रहाः ॥१३४॥

आदित्या मारुता रुद्रा [3]मर्त्यास्तु च तथाश्विनो ।
विश्वे देवास्सप्तर्षयः पितरो मुनयस्तथा ॥१३५॥

गन्धर्वाप्सरसाङ्गस्थाः किन्नराश्चारणोरगाः ।
देवा विद्याश्च मनवः [4]स्वाहा सिध्दा स्वधा ध्रुवा ॥१३६॥

धर्मस्सरस्वती सोमः स्वः प्रजापतयो युगाः ।
[5]ऋक्सामसूक्ताश्छंदांसि लोकाश्चैव दिशो दश ॥१३७॥

[6]द्वीपा नद्यः तदस्थित्वा ससमुद्रा च मेदिनी ।
पर्वतास्तरवो वल्यो रसाश्चौषधयोऽखिलाः ॥१३८॥

---

1. ग-घ-तुग्द्याद्यङ्गातयः
2. ग-घ-नक्षात्राद्यानवस्तारा
3. ग-घ-मार्त्यास्तु…तथा
4. क-ख-सा…सिध्दस्वयध्रुवा
   ग-घ-स्वाहा सिद्धस्वयध्रुवा ।
5. ग-घ-मत्साम
6. क-ख-ग-घ-द्युपनस्थोद्यातदस्थित्वा सय्यमुद्राच

क्षेत्राण्यायतनास्सर्वे योगपीठस्यनेकशः।
गावश्चामृतदोह्यास्तु जङ्गमाजङ्गमं च यत् ॥१३९॥

क्रमेण तस्मादेकैकं स्वनाम्ना तर्पयेद्गणम्।
नतिप्रणवगर्भेण भोगकैवल्यमाप्तये ॥१४०॥

*

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
नवनामार्चनो नाम
एकोनविंशोऽध्यायः

अथ विंशोऽध्यायः

श्रीभगवानुवाच—

पूजितेषु च मन्त्रेषु तर्पितेषु विशेषतः ।
[1]विधाम्नि विनियुक्तेषु गणनाथं द्विजोत्तम ॥१॥

विष्वक्सेनाभिधानं यद्विधिदृष्टेन कर्मणा ।
तदर्चने च संपन्ने तर्पणे सविसर्जने ॥२॥

प्राक्सेवनं तदा कुर्यात् तेषां वृत्तसमन्वितम् ।
तथाभिमतसिद्ध्यर्थमर्घ्यपात्रं तु पौष्कर ॥३॥

पौष्कर उवाच—

किमर्थमाह भगवन् विघ्नच्छेदकर प्रभुम् ।
समस्तविघ्ननाथानां परमं कारणं च यत् ॥४॥

विष्वक्सेनस्तु यष्टव्यो भोगभूमौ[2] गतेऽच्युते ।
कैर्द्रव्यौर्विधिना केन कि करोत्यभिपूजितः ॥५॥

श्रीभगवानुवाच—

भविनां बहवो विघ्नास्सद्धर्मविनिवारकाः ।
न यागयद्वापमार्घिर्मन्ये संसारिणाः शुभम् ॥६॥

---

1. ग-घ स्वधाम्नि

2. ग-घ-भोगभूमिगते

तत्प्रवृत्तौ तु ये विघ्नाः प्रोत्साहविनिवारकाः ।
व्यपयान्ति च ते सवे चक्रज्वालाभयार्दिताः ॥७॥

मध्ये [1]नावसरे तेषां भूते वाल्यचये सति ।
[2]तत्सन्तिपानसामर्थ्यात् क्व दोषः क्व विनायकः ॥८॥

क्षुद्राश्छिद्रपरा विघ्नास्सुकर्मनियमे स्थिताः ।
याजिनां फलकालं च प्रवीक्षन्ते बहिर्जिताः ॥९॥

प्रागार्जितेन केनापि कर्मणा द्विज सांप्रतम् ।
[3]अनुभुङ्क्ते फलं यागाद्विविधं [4]चाग्रतस्स्वकम् ॥१०॥

तस्य संरक्षणार्थं तु विष्वक्सेनं तदैव हि ।
काले यागवसानाख्ये द्वितीये वासरेऽथवा ॥११॥

कृत्वा निर्व्याकुलं चित्तं यष्टव्यं फलसिद्धये ।
याग [5]निर्वर्तनाच्छेषै रासनैरर्घ्यपूर्वकैः ॥१२॥

उपचारमयैर्भोगैस्सर्वैराभरणादिकैः ।
नैवेद्यैर्मधुपुपर्काद्यैर्मुख्यमूर्तेर्निवेदितैः ॥१३॥

द्विजप्रदानशिष्टैस्तु स्वयं प्रागनवर्जितैः ।
तथा चर्वन्तरस्थैश्च ह्यपरेद्युर्निवेदितैः ॥१४॥

---

[1] ग–घ–मध्ये नावसरेत्तेषां
[2] क–ख–ग–घ–सत्सन्निधान
[3] तद्भुङ्क्ते न फलम्
[4] ग–घ–त्वाग्रतस्मि
[5] क–ख–निर्वर्तनोच्छोषैरम्लानैः

संस्कृतैरूष्मणोपेतैर्मधुराज्यपरिप्लुतैः ।
तस्मान्मण्डलमध्ये तु प्राग्दत्वा कमलासन ॥१५॥

धर्माद्यनन्तपर्यन्तं पञ्चकं नवकं तु वा ।
सत्त्वेनाच्छादितं पश्चात् केवलानम्बुजं स्मरेत् ॥१६॥

ऐशानसोमदिङ्मध्ये चतुरश्रपुरेऽथवा ।
[1]द्वारशोभाप्रविमुक्ते रेखात्रितयभूषिते ॥१७॥

तदन्तरेऽर्धचन्द्रस्थे कमलेऽष्टदलान्विते ।
साम्राज्ये विनियुक्तं यद्विघ्नाना [2]मच्युतेन तत् ॥१८॥

पूजयेद्विधिना शश्वदभीष्टं साधकोऽश्नुते ।
तस्मान्मन्त्रैस्तदीयैस्तु स्नात्वा पूर्वविधानतः ॥१९॥

प्रक्षाल्य पाणिपादौ वा त्वाचम्य न्यासमाचरेत् ।
तदधिष्ठातृकत्वेन धारणाभिस्स्वविग्रहम् । ॥२०॥

शोधयित्वा पुनर्न्यस्य षडङ्गाद्यङ्करादितः ।
प्राग्वदानंदधामा च ह्यवतार्य तथा प्रभुम् ॥२१॥

इष्ट्वा हृत्पुण्डरीके तु स्वापेक्षानिष्कलात्मकम् ।
[3]तमेव सकलत्वेन यातं ध्यात्वा यजेद्बहिः ॥२२॥

---

1. ग–घ-द्वारशोभाश्च
2. –मच्युतेन तु
3. ग–घ–तेनैव

नवदूर्वाङ्कुराभं च [1]त्वीषत्पीतलकान्तिधृत् ।
चतुर्दंष्ट्रं चतुर्बाहुं चतुर्मुष्कं चतुर्गतिम् ॥२३॥

पूर्णाङ्गं केसरिस्कन्धं पृथूलस्थलराजितम् ।
दक्षिणावर्तनिम्नेन नाभिरन्ध्रेण [2]शोभितम् ॥२४॥

आजानुबाहुं श्रीमन्तं [3]पीङ्गलार्चिर्जटाधरम् ।
द्रवत्कनकपिङ्गाक्षचुबुकं पृथुनासिकम् ॥२५॥

सितदीर्घनखश्रेणिशोभितं कुटिलभ्रुवम् ।
मुक्ताविभूषितं मध्ये[4] महारत्नोपसंस्कृतम् ॥२६॥

कुर्याच्च दक्षिणे [5]पक्षे कृतश्रीवत्समङ्गलम् ।
[6]अमासि···तन्मध्ये [7]कमलालयम् ॥२७॥

द्विगुणं ब्रह्मसूत्रं स्यान्नाभेश्चाभिप्रदक्षिणम् ।
विस्तीर्णगण्डवदनं बालेन्दुकुटिलोपमैः ॥२८॥

नवाक (?वकिं) शुकारुणाभैर्लोमैस्संपूर्णविग्रहम् ।
शोभनेन प्रलम्बेन पृथुना प्रोन्नतेन च ॥२९॥

---

1. क–ख–त्विषट्पतल
2. क–ख–पूजितम्
3. –क–प···जटा ख–अपिश्मश्रु जटा
4. क-ख–रत्नोपसंस्थितम्
5. –ग–दक्षिणे वष तपश्रीवत्स
6. ख-आमासिकोणि···तन्मध्ये ग-घ–अमासितवयोमणि–बितन्मध्ये
7. घ–कमलातहाम्

माणिक्यकुण्डलाद्येन युक्तं श्रोत्रद्वयेन तु ।
मकुटेनोन्नतेन्नैव हाराद्यैरुपशोभितम् ॥३०॥

चित्रकौशेयवसनं विचित्रस्रग्विमण्डनम् ।
प्रलयद्वादशादित्यसहस्रगुणदीधितिम ॥३१॥

ईषदूर्ध्वं तथा तिर्यग्विनिपातितलोचनम् ।
कुन्देन्दुकान्तिदशनं किञ्चिद्विहसिताननम् ॥३२॥

स्वभावसौ[1]म्यममलं मायाक्रोधोपरञ्जितम् ।
सविलासलसत्पादन्यासस्थानकसंस्थितम् ॥३३॥

स्वेनान्तः[2] करणेनैव भावयन्तः परं पदम ।
अङ्गुष्ठेन कनिष्ठान्त[3]मङ्गुलैस्तु लतात्रयम् ॥३४॥

[4]नामयित्वोन्नता चैका घ्राणेन विनियोजिता ।
सद्विघ्नभीतिप्रदया त्वनया मुद्रयान्वितम ॥३५॥

रथाङ्गशङ्खहस्तं च लम्बमानगदाधरम् ।
श्रोणीतटनिविष्टेन सावहेलेन पाणिना ॥३६॥

इत्थं रूपधरं देवमनेकाद्भुतविक्रमम ।
कर्णिकामध्यगं तस्य हृदाद्यामुख्यमन्त्रवत् ॥३७॥

---

1. क–ख–मुन्मीन्नम्
2. ग–घ–करणैरेव
3. ग–घ-त वामपाणौ लता
4. ग–घ–नमयित्वा

पद्मच्छदान्तरस्थां च तदाकारद्युतिं विना।
किन्त्वङ्गानां च सर्वत्र ध्यानमुक्तं सितादिकम् ॥३८॥

गजाननो जयत्सेनो हरिवक्त्रो महावलः।
कालप्रकृतिसंज्ञश्च [1]चतुर्थः कमलोद्भव ॥३९॥

गणराजेश्वरा ह्येते चत्वारश्चण्डविग्रहाः।
आज्ञाप्रतीक्षकाश्चास्य सुश्वेतचमरोद्यताः ॥४०॥

विनायकादयश्चैव विघ्नेशप्रवरास्तु ये।
अमीषां गणनाथानां नित्यमाज्ञानुपालिनाम् ॥४१॥

ईशानादिषु कोणेषु पद्मबाह्यस्थितान्न्यसेत्।
वीक्ष्यमाणा विभोर्वक्त्रं [2]तत्तुल्यस्थानकास्स्थिताः ॥४२॥

तद्वत्कराङ्किताः सर्वे किन्तु मुद्राविवर्जिताः।
ध्यानमेषां पृथग्भूतं शरीरमवधारय ॥४३॥

भीमं द्विपेन्द्रवदनं चतुर्दंष्ट्रं त्रिलोचनम्।
कम्बुग्रीवं चतुर्बाहुं पूर्णचन्द्रायुतद्युतिम् ॥४४॥

हारनूपुरकेयूरमेखलादाममण्डितम्।
नानास्रग्गन्धवस्त्राद्यमनौपम्यपराक्रमम् ॥४५॥

---

1. क-ख-चत्वारः
2. क-ख-तत्तुल्यस्यानके
3. -क-ख-मिषत्कुण्डलिनम्

ध्यायेद्गजाननमतो जयत्सेनं च संस्मरेत् ।
महत्तुरङ्गवदनं पद्मरागाचलप्रभम् ॥४६॥

द्रवच्चामीकराक्षं च अनेकाद्भुतविक्रमम् ।
हरिवक्त्रमतो ध्यायेत् सटाच्छुरितमस्तकम् ॥४७॥

निष्टप्तकनकप्रख्यं घोरघर्घरनिस्वनम् ।
मृगराड्वदनं विप्र कल्पान्तानिलवेगिनम् ॥४८॥

कालप्रकृतिनामानं भावयेदञ्जनाद्रिवत् ।
दंष्ट्राकरालवदनं पिङ्गलश्मश्रुलोचनम् ॥४९॥

[1]झषकुण्डलिनं रौद्रं मीनवन्निम्ननासिकम् ।
गणराजेश्वरा ह्येते महापुरुषलक्षणैः ॥५०॥

संयुक्ताश्चाखिलैर्विप्र त्वापादात्कन्धरादिव ।
यत्किञ्चिन्मण्डनं वस्तु तदाद्योक्तं स्मरेत् त्रिषु ॥५१॥

एतेषामर्चनं कुर्यात् स्वनाम्ना प्रणवादिना ।
नमोन्तेनाब्जसंभूते नानासिद्धिफलाप्तये ॥५२॥

पोष्कर उवाच—

क एषोऽतुलवीर्यो हि यस्य दूरात् द्रवन्ति च ।
विघ्ना निमेषमात्रेण त्रैलोक्योन्मूलनक्षमाः ॥५३॥

---

[1] –क–ख–मिषत्कुण्डलिनम्

श्रीभगवानुवाच—

कालवैश्वानराख्या या मूर्तिस्तुर्यात्मनो विभोः
स एष द्विज देवः स्याद्विष्वक्सेनः प्रकीर्तितः ॥५४॥

स्थित आहवनीयादिभेदेन मखयाजिनाम्।
[1]पतित (?ऋत्वपूतं) हुतमादाय तर्पयत्यखिले जगत् ॥५५॥

एवं मन्त्रमयाद्यागात् [2]सात्त्विकात् ब्रह्मभावितात्।
संप्राप्य [3]गुरुमूर्तेर्वै प्रापणं [4]मन्त्रसत्कृतम् ॥५६॥

अनाहूतामराणां च सर्वलोकनिवासिनाम्।
स्वयं संविभजत्याशु तदनुग्रहकाम्यया ॥५७॥

पौष्कर उवाच—

सर्वासां मन्त्रमूर्तीनां मध्ये मुख्यपरा त्वया।
मूर्तिरेका समुद्दिष्टा वासुदेवाख्यलक्षणा ॥५८॥

तद्दत्तशिष्टैर्निर्दिष्टं विष्वक्सेनस्य चार्चनम्।
यथा [5]पृथक्पृथग्यागो मूर्तीनां साधकः प्रभो ॥५९॥

---

1. –ग–घ–ऋत्वपूतं
2. क–ख–सात्विका ब्रह्मभविनः
3. ग–घ–गुरुदूत्तैर्वै
4. ग–घ–संस्कृतम्
5. यागः साधकः इति साधु

कुर्याद्वा व्यूहभेदेन यन्त्रसंघस्य पूजनम्।
अन्योन्याङ्गानि फालेन मुख्यतन्त्रत्रिकस्य च ॥६०॥

यदि येनार्चितं तस्य कुर्यात् पुष्पादिकेन वै।

श्रीभगवानुवाच—

सर्वत्र सर्वदा विप्र केवलस्य (?त्व) प्रदा (?द) स्य च।
आराध्य मन्त्रनाथस्य प्रागाभूतस्य मध्यतः ॥६१॥

बहिर्व्याहृतये तस्य [1]मुख्यत्वान्नापरस्य च।
परत्वमेव सर्वत्र त्वाराधनवशात् स्थितम् ॥६२।

भावांशकवशाच्चैव नानाकर्मवशादपि।
मन्त्राणां मन्त्रमूर्तीनां व्यूहानामब्जसंभव ॥६३॥

तथैवाखिलतत्त्वाना [2]मौपाधिकमुदाहृतम्।
परत्वमब्जसंभूत न कश्चित्तत्त्वतः परम् ॥६४॥

मुक्तैकं वासुदेवाख्यमध्यक्षान्तं सदोदितम्।
सद्विरूपं चतुर्व्यूहं प्रभवाप्ययलक्षणम् ॥६५॥

समत्वं सति भेदे वै चतुर्णां येऽत्र सर्वदा।
यद्ब्रह्मव्याधिपत्येन [3]पिण्डीकृत्येथ पत्रवत् ॥६६॥

चित्ते ते पूर्णषाड्गुण्य [4]सलक्षण···।
प्रवृत्तिकालादारभ्य त्वात्मकालावसानकम् ॥६७॥

---

1. क ख–मुखयत्वेनापरस्य
2. क–ग–मेवादिक
3. क-ख–पिण्डीकृत्येत पत्रतः
4. -क–तक्षण ख–लक्षणम् ग–घ–लक्षणमनेश्वरम्

यत्रावकाशे विघ्नानां तद्विद्या न कदाचन।
वैभवं देवताचक्रं दूरे तिष्ठति यत्र वै ॥६८॥

समाराधनकाले तु [1]तत्रेन्द्रादिषु का कथा।
[2]तत्र दायान्वयं सिद्धमनिच्छातोऽपवर्गदम् ॥६९॥

आमूलाद्ब्रह्मनिष्ठं च निर्मुक्तमखिलैः परैः।
अन्त एव हि तद्व्यूहे [3]नार्चना विहिता द्विज ॥७०॥

ईषद्रागा तु विद्यानां देवतानां कदाचन।
तथैव विष्वक्सेनस्य गणबृन्दावृतस्य च ॥७१॥

अस्मात् परतराद्व्यूहात् सुसूक्ष्माद्वा सविग्रहः।
गत्यै नित्योदिता···स्तु संयुक्तात् सर्वसिद्धिदा ॥७२॥

मोक्षाद्यभीष्टसिध्यर्थमेकैकं यदि पूज्यते।
द्वितयं त्रितयं वाऽपि भिन्नभावनया द्विज ॥७२॥

तत्र न्यासादिकैर्भागैर्विघ्नारियजनान्तिकैः।
विना न सिद्धिं यद्यङ्गं जायते युगकोटिभिः ॥७४॥

पौष्कर उवाच—

अस्य व्यूहत्रयस्य स्यात् सकाशाच्च सनातनः।
भेदनित्योदिता (?तो) न्यायं (?यो) श्रोतुमिच्छामि सांप्रतम् ॥७५॥

---

1. –क–ख–तत्रेन्द्रादि तथा
2. ग–घ–तत्तदाधामयम्
3. –क–ख-नानाविहितता

श्रीभगवानुवाच—

यदिदं च समुद्दिष्टमनौपम्यमतीन्द्रियम् ।
संशान्तपरमानन्दं स्वरूपं च सदोदितम् ॥७६॥

सौदामिनीचयार्काग्निपूर्णचन्द्रायुतद्युति ।
सूक्ष्मसंज्ञं द्वितीयं [1]स्यात् तदुदेत्यस्तमेति च ॥७७॥

लाञ्छनाम्बरवर्णाद्यैर्यदत्योन्यैः पृथक् पृथक् ।
[2]कालेन [3]कृतकृत्यत्वं मुक्तो रोगादिकैर्मलैः ॥७८॥

[4]प्रभवेन समायुक्ता प्रत्यस्तमितसर्वदा ।
मुनिसङ्गे परे धाम्नि विकल्पगगना द्विज ॥७९॥

पौष्कर उवाच—

त्वया मण्डलयागेषु विष्वक्सेनार्चनादिकैः ।
[5]… … … … …
[6]… … … … …
नामनाशागणं सर्वं ध्वंसयन्ति सदैव हि ॥८०॥

तस्माद्ददाति योऽन्येषां स्वयमश्नाति वाऽधमः ।
मोहादुपेक्षते वाऽपि स याति नरकेऽ[7]धमः ॥८१॥

---

1. ग–घ–पत्तदुदेत्यस्तमेति च
2. क–ख–कुलेन
3. –ग–घ–कृतकृत्यर्थम्
4. विभवेन
5. अत्र–पौष्कर प्रश्नस्य शेषभागो लुप्तः
6. अत्र भगवदुत्तरस्य आदि भागः गलितः
7. –क–ख–वाधमम्

आश्रयोर्थतनाकार्यः परिवारस्सदैव हि।
तस्या द्धिदेवतेन्द्रस्य तद्देवस्य तथैव हि ॥८२॥

स्वयं सङ्कल्पितस्य प्राक् शासनेनापि तस्य वा।
कृतस्य श्रद्धयाऽऽनन्दनानारूपस्य पौष्कर ॥८३॥

[1]दधिभक्षफलाद्यस्य देवान्नस्य विशेषतः॥

पौष्कर उवाच—

देवद्रव्यं तु किं नाथ देवस्वं च किमुच्यते।
[2]गणान्नं च निषिद्धं च भक्तानां भक्तवत्सल ॥८४॥

श्रीभगवानुवाच—

यत् कोशे विधते किञ्चित् पत्रालङ्कारपूर्वकम्।
लग्नं च भवमूर्तौ तत् प्रसादेन ममान्तरे ॥८५॥

विपणे वा तदीये च देवद्रव्यं तु विद्धि तत्।
नगरग्रामपर्यन्तविषये गोगजादयः ॥८६॥

शालिसस्येक्षुपुष्पाद्या दासीदासाः कुटुम्बिनः।
सत्संबन्धं च [3]वाणिज्यं सुपुत्रपशुबान्धवम ॥८७॥

देवस्वं च विरुद्धं यत् सिद्धानामपि पापकृत्।
स्वदत्तं परदत्तं वा यत्नात् तत् परिवर्जयेत् ॥८८॥

---

[1] क–ख–पद्पक्षः ग–घ–दधिपक्ष
[2] क–ख–गणं च न निषिद्धं च
[3] क–ख–तत्संबन्धं च व···पुत्र पशुबान्धवाः

[1]दोषदं चापि माद्यस्मा दक्षय्यनरकप्रदम् ।
प्राक् प्रवृत्तमतस्तस्मिन् निबन्धा देवतागृहे ॥८९॥

प्रयत्नात् पोषणीयं च योति नूनमया [2]यथा ।
प्रवृत्तकार्याकरणाद्वैष्णवायतनेषु च ॥९०॥

प्राप्नोति सुमहद्दोषं राजा राजपदेषु च ।
[3]यथा तद्विपुला कीर्तिस्तथा चेहाक्षयं [4]सुखम् ॥९१॥

देहान्ते शुभमाप्नोति प्राक्प्रवृत्तस्य पालनात् ॥

पौष्कर उवाच—

दानं संप्राशनं प्रोक्तं [5]देवान्नस्य पुरा त्वया ।
तस्याधुना जगन्नाथ निषेधः कथ्यते कथम् ॥९२॥

श्रीभगवानुवाच—

प्राक्साधितं च यागार्थं देवतानां प्रयत्नतः ।
तत्सन्तर्पणपर्यन्तं यावद्देवान्नमुच्यते ॥९३॥

अन्यथा भक्षणं तस्य यदि मोहात् कृतं द्विज ।
प्रायश्चित्तशतैश्चीर्णैश्शुद्धिर्भवति मानवः ॥९४॥

---

1. क–ख–दोषा…ञ्चापि…माद्यस्मात्
2. ग–घ-कामस्मात्
3. ग–घ–यद्धनविपुला
4. शुभम्
5. ग–घ–देवतास्य

मन्त्रसन्तर्पणादन्ते याजिनां यजतां वर ।
गर्वबुद्धिविमुक्तानां भक्षणं सर्वशुद्धिकृत् ॥९५॥

पावनं शुद्धिदं पुण्यं [1]भूतिभृत्यभिवृद्धिदम् ।
भक्षणं यद्यपि प्राप्तं नैवेद्यस्य च सर्वदा ॥९६॥

गुर्वादीनां तथाऽन्येषां भक्तानां तत्त्वतोऽब्जज ।
तत्रापि साधकानां च निषिद्धं वन्दनं विना ॥९७॥

अथ वासादृतेऽन्यत्र नित्यनैमित्तिकार्चने ॥

पौष्कर उवाच—

हेतुना केन भगवन् निषिद्धं साधकस्य च ।
मन्त्रपूतं तु नैवेद्यमत्र मे संशयो महान् ॥९८॥

श्रीभगवानुवाच—

नाप्रार्थितं गृहीतव्यं पुष्पमात्रं कदाचन ।
स वै मन्त्रेण विभवाद्ग्राह्यं केचिद्द्विगाजिना ॥९९॥

नैवेद्याद्यखिलानां च भोगानां भावितात्मनाम् ।
गुरुणा [3]प्रार्थना कार्या मन्त्रेशस्य पुनःपुनः ॥१००॥

---

1. ग–घ–भूमिभृत्यभि
2. ग–घ–विभवोदग्रात्
3. क–ख–प्रार्थनां कुर्यात्

स सर्वतस्स्वतन्त्रत्वात् तत्सिद्धत्वान्न दोषभाक् ।
लब्धान्तरे यथा मन्त्री नृपेन्द्रात् सर्व [1]मध्यगे ॥१०१॥

स न रूष्यति वै तस्य एवं मन्त्रेश्वरो गुरोः ।
फलपर्यवसानं च सेवार्थं यस्समुद्यतः ॥१०२॥

न तेन प्रार्थना कार्या स्वल्पेऽप्यर्थे नृपस्य च ।
संप्रयच्छेत् प्रसन्नश्चेत् स्वयं तुष्टमयो यदि ॥१०३॥

[2]प्रसादमिति वै ब्रूयात् शिरसा [3]चाभिनन्दयन् ।
नाभिं कुर्याच्च मेधावी महार्थफललंपका ॥१०४॥

[4]एवं मन्त्रव्रतपरो यमाचरति साधकः ।
अचिरात् सिद्धिमाप्नोति मन्त्रमूर्तेः प्रसादतः ॥१०५॥

पौष्कर उवाच—

आराध्यमूर्तेर्मन्त्रस्तु [5]नैवेद्यस्य जगत्पते ।
विनियोगं [6]महाज्ञानमपि शिष्टस्य का गतिः ॥१०६॥

श्रीभगवानुवाच—

मण्डलावयवेशानां [7]ब्राह्याधारसशक्तिषु ।
गुर्वादिकालनाथानां दत्तं याद्विभक्ते सति ॥१०७॥

---

1. ग–घ–मध्यते
2. क–ख–प्रस–वै ब्रूया···चाभि
3. –ग–घ–चाभिनन्द्य यत्
4. क–ख–एवं मन्त्रावृत
5. क–ख-नैवेद्यस्तु
6. –क–ख–महा···नमपि
7. -ग–घ–बाह्या····शशक्तिषु

[1]दद्यात् तद्ब्रह्मचारीणां भक्तानां भावितात्मनाम् ।
हृदयादिदिगन्तानामङ्गानां यन्निवेदितम् ॥१०८॥

श्रियादि [2]मूर्तिकान्तानां तथा व्यूहाख्यमूर्तिषु ।
विहितं पुत्रकाणां तद्दानकर्मणि सर्वदा ॥१०९॥

चक्राद्यायुधजातस्य मन्त्रोपकरणस्य च ।
भोगस्थानावतीर्णस्य यत्तत् [3]सामाधिना स्मृतम् ॥११०॥

गणचक्रदिगीशास्त्रद्वास्थानां [4]क्षेत्रियस्य यत् ।
दत्तं तत् क्षेत्रियादीनां वैष्णवानां विभज्य च ॥१११॥

एतद्विसर्जनात् पूर्वं विहितं कमलोद्भव ।
प्रतिषिद्धं च सर्वेषां मन्त्र [5]चक्रे विसर्जिते ॥११२॥

यस्मादायान्ति भूतानि कोटिशस्समनन्तरम् ।
विष्णुपार्षदपूर्वाणां तादर्थ्येनाब्जसंभव ॥११३॥

[6]पवित्रता न तद्वीर्या भ्रात्वा संभूषयन्ति च ।
जलजानां परीवारसत्त्वानामनुकम्पया ॥११४॥

---

1. क–ख–विद्यात्
2. ग–मूर्तकान्तानाम्
3. ग–संर्मथिनां घ–विभूतिनाम्
4. क–ख–क्षेत्रियस्य–इत्याद्यर्धचतुष्टयं गलितम्
5. क–ख–क्षेत्रविसर्जने
6. ग-घ–पवित्रतान्त तद्वीर्या

दत्तशिष्टमतस्सर्वं दत्तं वाऽप्यन्ययाक्षयम् ।
सम्भृत्य च निक्षिप्य ह्यगाधेऽम्भसि यत्नतः ॥११५॥

[1]अर्चासंरुद्धमन्त्राणां दत्तस्य विहितं सदा ।
दानं तदाश्रितानां वै भूतानां पूर्वरूपिणाम् ॥११६॥

तत्सेवकानां च तथा नृत्तगेयरतात्मनाम् ।
प्रार्थयन्त्यपि भक्तानां विप्रग्रामनिवासिनाम् ॥११७॥

तस्मान्मन्त्रेश [3]दृक्पूतं नैवेद्यं पावनं परम् ।
कुरुते कायशुद्धिं च तच्छुद्ध्या [4]काललाघवम् ॥११८॥

निर्मुक्तचित्तदोषाणामचिराद्भवते शुभम् ।
यद्प्येवं महत्व तस्य तथाऽपि कमलोद्भव ॥११९॥

प्रदानाच्चोदनाच्चैव श्रेयांस्त्यागो हि पूर्ववत् ।
न येन लोभो लोकस्य दोषस्योपरि संभवेत् ॥१२०॥

भवेत् तल्लोभमुक्तानामतीव विमला मतिः ।
या[5] या वेत्ति पलप्राप्तिफलदं कर्म शाश्वतम् ॥१२१॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
विष्वक्सेनार्चनो नाम
विंशतितमोऽध्यायः

*

---

1. ग-घ–सं रुद्ध
2. क–ख–ग–प्रार्थयन्त्यभि
3. क–ख–दिवपूतम्
4. कुलाघवम्
5. यथा वेत्ति फलप्राप्ति

अथ एकविंशोऽध्यायः

पौष्कर उवाच—

देव त्वया [1]शक्तिचयः पुरा तु समुदीरितः ।
तस्याहं श्रोतुमिच्छामि सविन्यासं च लक्षणम् ॥१॥

श्रीभगवानुवाच—

सर्वसंपत्प्रदा लक्ष्मीः पुष्टिः परमसिद्धिदा ।
कान्तिः [2]प्रभा मतिः शक्तिः क्रियेच्छा महिमोन्नतिः ॥२॥

स्वधा[3]विद्याणिमा माया मूर्तिर्ह्रीः [4]श्रीः कला द्युतिः ।
निष्ठा ऋज्वी रुचिः चेष्टा शोभा शुद्धिर्विभूत्यतः ॥३॥

वृत्तिर्व्याप्तिर्गतिः सुप्तिर्भागा वागीश्वरी रतिः ।
[5]सिद्धिर्नतिः प्लुतिः क्रीडा संपत् कीर्तिः शिखा मतिः ॥४॥

गायत्री चापि मर्यादा [6]सृष्टिः चेत्यब्जसंभव ।
पूर्वमात्मगुणत्वेन मन्त्रदेहं [7]स्मरेद्धिया ॥५॥

---

[1] क–ख–शक्ति तथा ग–शक्तितयो घ-शक्तितयोपरासक्तस
[2] ग–घ–प्रभामितिश्शक्तिः
[3] क–ख-विद्यारणीमया
[4] क-ख–मूर्तिह्_रीः श्रीस्तुलाद्युतीः
[5] क-ख–सिद्धि……क्रीडा
[6] ग–घ–सृष्टिश्चेत्यब्ज
[7] क–ख–स्मरेच्छ्रिया

आभिरापूरितं कृत्स्नममूर्ताभिः सदैव हि ।
एतत् सामान्य [1]संयोगं शक्तिश्चक्रस्य (?चक्रं च) पौष्कर ॥६॥

सह मन्त्रगणेनैव विशेषमधुनोच्यते ।
आदि [2]मूर्तिन्न (?म) सन्तुष्टं (?ष्टा) दक्षिणोत्तर (?रं) विन्यसेत् ॥७॥

लक्ष्मी [3]पुष्टिद्वयाख्यं [4]यद्यत्नेनावकराश्रयम् ।
अष्टादिक्ष्वष्टकं न्यस्येत् केसराग्रात् श्रुतक्रमात् ॥८॥

दलमध्ये हृदादीनां बहिर्वा सिध्द्यपेक्षया ।
आसां [5]मुख्यांशमध्ये तु [6](विन्यसेत्) परं पदम् ॥९॥

यथेष्टं लभते भोगमङ्गसङ्गाद्बहिः स्थितम् ।
शेषव्यो [7]मावृतादूर्ध्वं बद्धपद्मासनात्तु वै ॥१०॥

पर्येयाः परियोगेन वीक्षमाणाः परं प्रभुम् ।
पृथग्यागावतीर्णानां मन्त्राणामेवमेव हि ॥११॥

शक्त्यष्टकं च न्यस्तव्यं लक्ष्मीपुष्टिद्वयं विना ।
तच्छिष्टदेवता व्यूहं [8]प्राग्व (?क्प) दं परिवृत्तकम् ॥१२॥

---

1. क–ख–संयोगं…पौष्कर
2. ग-घ–मूर्तिन्नसंसष्ट
3. क–ख–दाच्छयाख्यम्
4. क–ख–यत्नेनावत्तरा घ–यत्नेनावत् कराश्रियम्
5. क-ख–आसां मुख्येंशमध्ये
6. ग–घ–विनासं स्यात्
7. क–ख–व्योमाहृतादूर्ध्वं शुद्धपद्मा
८. ग–घ–व्यूहं प्राग्वदम्

अष्टपत्रं विनाऽन्यस्मिन् [1]पद्मे केसरसन्तते।
मूलदेशे यथा याति कर्णिकोपममष्टकम् ॥१३॥

एवं चाखिलयागानां न्यासः स्याद्देवतासु च।
मुक्त्वैकं मिश्रचक्रं तु शारदं कमलोद्भव ॥१४॥

तत्राष्टकं तु कह्लारे शेषा (।ष) चक्रे बहिः खवत्।
ध्यानमन्त्रं क्रमाद्ब्रह्मन् कथयामि यथास्थितम् ॥१५॥

रक्तपङ्कजवर्णाभा लक्ष्मीर्नीलाम्बुजेक्षणा।
दुग्धौघधवला पुष्टिरानन्दकलितानना ॥१६॥

[2]कान्त्याद्युन्नतिपर्यन्त*मष्टकं स्फटिकामलम्।
**यच्चतुस्त्रिंशकं विप्र शक्तीनां शुभलक्षणम् ॥१७॥

अन्तरान्तरयोगेन ध्यायेत् कनकसन्निभम्।
[3]पद्मरागोद्धतं किञ्चिदनौपम्यगुणान्वितम् ॥१८॥

प्रसन्ननयनाः सर्वाः प्रसन्नवदनाम्बुजाः।
रूपलावण्यसौभाग्यैरन्योन्येन समन्विताः ॥१९॥

[4]सर्वा माल्याम्बरधराः सर्वालङ्कारमण्डिताः।
चन्द्ररश्मिप्रतीकाशवालव्यजनचिह्निताः ॥२०॥

---

1. क–ख–पत्रे केसर
2. कान्ताद्युन्नीति
* कान्तिः प्रभा मतिः शक्ति क्रिया इच्धा महिमोन्नतिः
** स्वधादिसृष्टयत्त
3. ग–घ–पद्मरागेर्धतम्
4. ग–घ–सर्वमाल्या

[1]वामहस्तेन चान्येन ध्यायेदभिमतार्थदाः ।
[2]मन्त्र ?वत्क्रम (?प्र) चारिण्यस्तद्वत् सर्वफलप्रदाः ॥२१॥

समाराधनकाले तु भक्तानामनुकम्पया ।
वैश्वरूप्यं समाश्रित्य [3]दिक्षु दृक्पातयन्ति च ॥२२॥

एवं बहिर्व्याप्तयो सहमन्त्रार्चनाब्जज ।
विन्यासमर्चनं ध्यानं देवीसंसिद्धमन्त्रिणम् ॥२३॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
परिवारलक्षणो नाम
एकविंशोऽध्यायः

*

---

1. ग–घ–वामहस्ते च सर्वासां ध्यायेदभिमतान्वितम्
2. क–ख–मन्त्रवत्क्रम
3. क–ख–दिक्षु द्रवतयन्ति

अथ द्वाविंशोऽध्यायः

पौष्कर उवाच—

सम्यग्वेदितुमिच्छामि त्वत्तोऽहममरार्चित ।
हिताय साधकेन्द्राणां तदध्याराहिचासनम् ॥१॥

सरहस्यमसङ्कीर्णं [1]साधितैव ?यथास्थितम ॥

श्रीभगवानुवाच—

आधेयमब्जसंभूत [2]स्वेऽविकारे स्वरूपिणि ।
[3]स्वयमाद्यन्तयोरु (?रु) द्धं सूत्रे [4]मणिगणा यथा* ॥२॥

प्रागाधारात्मना चैव विश्वाकारतया ततः ।
नानामन्त्रात्मना ह्यूर्ध्वे निस्तरङ्गो हि तत्त्वतः ॥३॥

अभ्यस्तवासनानां च कर्मिणां कर्मशान्तये ।
तदिच्छाविष्कृतानां च भोगकैवल्यसिद्धये ॥४॥

अनाद्यविद्याविद्धानामियत् तेषां हि वस्तुनि ।
नाथोर्ध्वे न त्वदृष्टीनां तत्त्वतो वाऽथ पौष्कर ॥५॥

---

1. 'साधिदैवम्' इति साधु
2. ग–घ–स्वे विकारोर्ध्वरूपिणि
3. क–ख–सधर्माद्यन्तयोरुद्धम्
4. ग–घ–मणिगणो यथा

* cf गीता···७.७

[1]न तिर्यग्ब्रह्मपूर्वे च न हेयादिविकल्पना।
या विशेषविकल्पैस्तु प्रत्यस्तमितलक्षणा ॥६॥

शक्तिर्भगवतो विष्णोः साधाराख्याऽभिधीयते।
प्राग्वदासनसामर्थ्यं बीजमादाय चेच्छया ॥७॥

अव्यक्तव्यक्तरूपा च यथाऽऽदित्यकदम्बकम्।
भाविप्रसरधर्मत्वाद्विश्वबीजचयस्य च ॥८॥

[1]साम्प्रतं संभृताङ्गस्य कूर्मसंज्ञाऽभीधीयते।
यो विश्वं निर्दहत्यन्ते कालवैश्वानरात्मना ॥९॥

दैवतं यस्य भगवान् कूर्मात्मा लोकपूजितः।
अजहद्भगवच्छक्तिः सामर्थ्यं पुनरेव तत् ॥१०॥

अनन्तं सविल्पानां यद्विश्वाङ्कुरमव्ययम्।
नयत्यूर्ध्वं यथा कूर्मो ग्रीवां स्वात्मनि संहतम् ॥११॥

शेषाख्यं [3]फणिदैवत्यं तदनन्तं हि गीयते।
आश्रयं बीजभूतानां चतुर्णां च महामते ॥१२॥

तद्वन्धविटपस्तस्माद्व्यक्तिमभ्येति पूर्ववत्।
भूरात्मा भगवान् यस्मिन्नभिमानाख्यदेवता ॥१३॥

---

1. ग–नतिर्यक् वृष्टपूर्वं च
2. क–ख–सांप्रतं प्रहृताङ्गस्य
3. पणिदैवत्यम्

फलं रसात्मकं तस्माद्व्यक्त्यमृतलक्षणम् ।
यस्याभिमानिकं रूपं क्षीरार्णवमनश्वरम् ॥१४॥

तस्मादनन्तरत्नोत्थं कान्ति कमलमब्जज ।
व्यक्तं यस्य च वै शक्तिर्नित्या दहनलक्षणा ॥१५॥

तदनन्तदलं विद्धि दिव्यं विकसित सितम् ।
परपूर्वेण भेदेन [1]चैकद्वित्रिगुणात्मना ॥१६॥

स्थित्वा [2]बुद्धिविकारैस्तैः सह चाष्टाभिरब्जज ।
[3]यत्राथ देवतात्वेन वाग्विकारा मृ (?ऋ) गादयः ॥१७॥

तथा कालविकारा ये चत्वारः कृतपूर्वकाः ।
तत्र रूपं हि सर्वेषां सत्तामात्रपरं स्मृतम् ॥१८॥

[4]व्यक्तिकारणध्यानाभिः साङ्गाभिरपरं तु तत् ।
तृतीयमभिमानाख्यं देवता देहलक्षणम् ॥१९॥

तस्माद्वै वायुदैवत्यं स्पर्शतन्मात्रमेव च ।
जाता यस्य स्फुटा व्यक्तिर्नानाचक्राङ्गलक्षणम् ॥२०॥

तस्मादाकाशदैवत्यं शब्दमुत्पन्नमब्जज ।
सर्वाङ्गसंहता चक्र[5]वृत्तिर्यस्यामलं वपुः ॥२१॥

---

[1] ग–घ–वैकद्वित्रि
[2] क-ख–वृद्धिविकारैस्तु
[3] ग–घ–यत्राहिदेवतात्वेन वाग्विकारान्मृगापयः
[4] क-व्यक्तिकरण···नभिः ख–व्यक्तिकरणथानाभिः
[5] ग–घ–चक्रव्यक्तिर्यस्य

गीयते व्योमवृत्तं तत्र प्रधानकमलालयम् ।
यस्यान्त (:) स्थानि भूतानि यस्मिन् सर्वं प्रतिष्ठितम् ॥२२॥

तस्मादुन्मेषपूर्वं हि महत्प्रलयपश्चिमम् ।
प्रवर्तते कालतानं भेदकृत् सर्ववस्तुषु ॥२३॥

वाङ्मात्रेणैव भिन्नस्य ह्यभिन्नस्यैव तत्त्वतः ।
ज्ञानादिगुणवृन्दस्य ब्रह्मणश्चतुरात्मनः ॥२४॥

नित्योदितत्वान्नित्यत्वाद्व्यापकत्वात् परं पदम् ।
पूर्णत्वात् षड्गुणत्वाच्च न कालो लब्धगोचरः ॥२५॥

शब्दादादित्यदैवत्यमहङ्कारं महामते ।
[1]मनश्चादित्यदैवत्यमहङ्कारमभूत् ततः ॥२६॥

बुद्धिप्रकाशदैवत्या व्यक्तानन्दात्मनो विभोः ।
दलादिकर्णिकान्ता या सूर्यपूर्वादिकल्पना ॥२७॥

प्रधानकमलस्यैषा मूर्तिर्गुणमयी स्मृता ।
बुद्ध्यादीनां च तत्त्वानां कारणं यदनश्वरम् ॥२८॥

अव्यक्ताख्यं महाबुद्धे ह्यभिन्नगुणमूर्तिभृत् ।
स्वगुणानधरीकृत्य स्वप्रतिष्ठं प्रवर्तते ॥२९॥

अध्यात्मलक्षणा वृत्तिः सर्वाः संहृत्य वै हृदि ।
उत्पद्यन्ते हि चैतस्माद्भावाः सर्वे द्विजोत्तम ॥३०॥

---

[1] अनन्त

विपद्यन्तेऽत्र वै भूतास्तस्मात् पद्मं परं त्विदम् ।
चिदादित्यकलाजालं ग्राह्यग्राहकलक्षणम् ॥३१॥

संक्रान्तं यत्र स्वं धाम स्वसामर्थ्यं च [1]चेत्यपि ।
विमलाख्या विमलता [2]ज्ञानशक्तिर्ज्ञताब्जज ॥३२॥

प्रभवाख्या प्रभवता सत्यसंज्ञा च सत्यता ।
नित्याख्या नित्यता चैव प्रकाशाख्या प्रकाशता ॥३३॥

अनन्तता ह्यनन्ताख्या कला कमलसंभव ।
सहानुग्रहशक्त्या वै ज्ञेयाऽनुग्रहता परा ॥३४॥

द्विचतुष्कं कलानां यत् स्वप्रतिष्ठं हि वर्तते ।
[3]संवर्तते परं चैव पुनरेव निवर्तते ॥३५॥

परापरविभागेन [4]कलास्त्वेतार्चिता (श्चिदा) त्मनः ।
प्रोक्ताः कमलसंभूत यासामानन्त्यमुत्तमम् ॥३६॥

स्वशक्त्याधिष्ठितं कृत्वा स्वस्वभावस्वभावया ।
ग्राह्यग्राहकरूपाय एवमव्यक्तपुष्करम् ॥३७॥

समास्ते केवलं शुद्धमीषत्काललवं द्विज ।
सामान्येनैव यो भूत्वा सांप्रतं शक्तयः कलाः ॥३८॥

---

1. ग–घ–चैवहि
2. क–ख–ज्ञानशक्त्यब्जता
3. ग–घ–संवर्तनेपरम्
4. क–ख–कल्पास्त्वेतार्चिता

[1]अस्मितालक्षणं धर्मं स्विकं सम्यङ्गिरस्य च।
प्रवर्तते तन्निरासादानन्दमतुलं द्विज ॥३९॥

स्वप्रकाशमनौपम्यं तमिच्छेन्मन्त्रमव्ययम्।
[2]परिच्छेद्या दिगाद्यैस्तु प्रकाशाकाशवर्तिनी ॥४०॥

कृत्वाऽऽश्रित्य कलामूर्तिं समनन्तरमब्जज।
विहाय मध्यदेशं च प्रकाशगगनात् ततः ॥४१॥

धृतिशक्त्यासने स्वेऽथ उपविश्य यथासुखम्।
विद्यादेहेन सूक्ष्मेण भूत्तदेहानुकारिणा ॥४२॥

अथानन्दकदम्बं तद्यत् स्वरूपं पृथक्कृतम्।
रञ्जयेच्छास्त्रदृष्टेन व्यवहारं गतेन च ॥४३॥

स्वकेनालम्बनेनैव देवतालक्षणेन च।
[3]ज्ञानानात्? सुस्थितान् पश्येदुदितान् [4]सुहृदादिषु ॥४४॥

लाञ्छनाभरणादीनि यथा न्यस्यानि विग्रहे।
[5]स्वस्थानेष्वथ वै तस्माद्ववदाता हृदादयः ॥४५॥

यथाशास्त्रक्रमेणैव यजेत विधिना ततः।
एवमासनदाने तु परस्मात्तत्त्वसन्ततिम ॥४६॥

---

1. क–ख–अस्मिन् विलक्षमन्धर्मात्मकम्
2. ग-घ–परिच्छेद्यदिगाद्यैः
3. (घ) ज्ञानानान्
4. ग–घ–स्वहृदादिषु
5. ख–स्वस्थानेष्वधिवै

उदितां प्रलयं कुर्यात् करणे तदधिष्ठिते।
निवृत्ते पुरुषार्थे तु चान्तर्वा बहिरब्जज ॥४७॥

क्रमान्मन्त्रगणं स्मृत्वा यातं मन्त्रेश्वरे लयम्।
मन्त्रशक्तिं स्वसङ्कल्पशक्त्या वाऽथ शमं नयेत् ॥४८॥

सह सङ्कल्पशक्त्या वै विद्यामूर्तिं स्वकां ततः।
स्वकल्पसु लयीकुर्यात् कलाजालं तथाऽऽत्मनि ॥४९॥

प्राग्वदानन्दसन्दोहपरिपुष्टस्तु जायते।
सृष्टिक्रमेण संहृत्य त्वाधारं यत् पुरोदितम् ॥५०॥

ज्ञानिनां विगलन्त्येषां स्वभावात् तत्त्ववेदिनाम्।
निष्कलानां महाबुद्धे निष्पन्नानां सुकर्मणि ॥५१॥

विकासमेति चान्येषां नित्याकाररतात्मनाम्।
मन्त्रक्रियारतानां च नानात्वेन समात्मनाम् ॥५२॥

धृतमच्युतशक्त्या वै ह्यपरि[1]च्युतसत्तया।
सद्विकल्पस्वरूपं च विश्वासनमिदं द्विज ॥५३॥

विधृतं विभुना व्याप्तं स्वसामर्थ्येन यद्यपि।
तत्रापि तच्छरीराणां जीवानां तन्निवासनम् ॥५४॥

स्वशक्त्याऽनुगृहीतानां तमाक्रम्य महामते।
नानामन्त्रात्मना त्वास्ते तस्मिन् नानाविधात्मनि ॥५५॥

---

[1] क-ख-च्युतशक्तया

संपूर्यमवि (?हि) तानां वै व्रजत्यर्चार्धं (?र्थं) सिद्धये।
कर्मणा स्वल्पबुद्धीनां [1]स्वरूपं न जहाति वै ।।५६।।

व्रह[2]यज्ञोत्पलाद्यस्तु [3]दनावृन्दन्तु पौष्कर।
प्रभवज्ञोपलाद्यद्वि… … … … … ।।५७।।

अनुग्रहपरो मन्त्रस्त्वेवमब्जज चाच्युतः।
निजयत्स्वमहत्सत्तां (?नियमात्स्वामजहत्सत्तां) ज्ञानादिगुणलक्षणाम् ।।५८।।

निश्रेयसपदप्राप्तिपर्यन्तं कालवर्तिनाम्।
विनियोगावसाने तु तेऽपि चायान्ति वै सह ।।५९।।

विलयं वासुवे (?देवे वै) तेषां क्रीडार्थमेव च।
समारोप्य स्वविज्ञानमन्येषां भवशान्तये ।।६०।।

एवं परा मन्त्रिविभो? स तु सर्वेश्वरस्य च।
स्थिता कमलसंभूत भूतयोनिविमुक्तये ।।६१।।

पौष्कर उवाच—

निष्क्रियस्य विभोर्नाथ त्वच्युत [4]स्याव्ययात्मनः।
कथं मन्त्रात्मभावेन विविक्तमुपपद्यते ।।६२।।

---

1. ग–प्र–स्वरूपं तं जहाति
2. ग–घ–प्रहयज्ञोपलाद्यस्तु
3. ग–तनावन्दं तु घ–दन्विवृन्द्रं तु
4. क–ख–स्याप्यथात्मनः

श्रीभगवानुवाच—

तृणानां हि यथाऽऽदाने [1]नारीश्वा (?च) सं? प्रवर्तते।
स्वशक्तिः पुष्यरागस्य [2]मणेर्विकसनेऽपि च ॥६३॥

तद्वद्भगवतो विष्णोः परस्य परमात्मनः।
प्रवर्तते शक्तिचयो यस्य मन्त्रस्य गं (?स्वं) वपुः। ॥६४॥

कर्मात्मकत्वाधादाय पुनरेव निवर्तते।
साऽच्युताख्या महाशक्तिः शान्तसंविन्मया पुरा ॥६५॥

एवं कर्मात्मतत्त्वस्य विद्यासंपालितस्य च।
स्थितिः संप्रतिबुद्धस्य [3]इन्द्रियार्थासु शक्तिषु ॥६६॥

यथा ह्यनिल [4]पूर्णानां द्रुतौ स्थित्वा सुशिक्षितः।
प्रतरत्यतिसंक्षिस्था (?प्तो) नष्टम (?सं) व्याकुलेन्द्रियः ॥६७॥

सत्त्वशिक्षितबुद्धेर्वै व्यक्षुब्धे (?ब्धें) हसि पौष्कर।
वर्तते त्वधरीकृत्य व्यूर्ध्वें त्वाकुलचेतसः ॥६८॥

[5]एवं संप्रतिबृद्धस्तु (?स्य) शक्तयश्चेन्द्रि [6]यान्तराः।
भावमन्त्रक्रियाणां च समर्था न्यक्करोति च ॥६९॥

---

[1] घ–नारीश्वसंप्र
[2] ग-घ–मणिर्विकर्षणेपि च
[3] क–ख–इन्द्रियासु च
[4] अनिलपूर्णायां दृतौ इति साधु
[5] क–ख–स एवं प्रति
[6] ग–घ–श्चेन्द्रियान्तरः

शुद्धसंविन्मयश्चास्ते निस्तरङ्गसमुद्रवत् ।
आमूढत्वाद्विजा (?दा) नन्दपरिस्पन्दं स्वकं पुनः ॥७०॥

शक्तिभिस्तु समारोप्य वेधवेदकतां भजेत् ।
इत्येवमुत्तमाधारस्वरूपं हि धरास्थितिः ॥७१॥

[1]जायते तत्परिज्ञानात् कर्मणां कर्मसंक्षयः ।
उदयाव्ययसंस्थानमन्तर्यागत्वदेव च ॥७२॥

नित्यमेवं हि मन्त्राणां (?चरतां) [2]वायुमूर्तिनाम् ।
मध्यदेशं समावृत्य मध्यमार्गेण संविशेत् ॥७३॥

सुव्यक्तो (?क्ते) रन्तरीभूतमात्मानं खे पुरोदितम् ।
ध्रिये धृतविधि (?धृति) यावदेतद्वै शासनं पुरा ॥७४॥

बहिस्तदनु सा वृत्तिर्भेदानां यजनाय च ।
... ... ॥७५॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
आधारासनलक्षणो नाम
द्वाविंशोऽध्यायः

*

---

[1] क–ख–ज्ञायमेतत्परिज्ञानात्

[2] क–ख–चद्मनोवायु ग–च ऋतेवायु घ–चरुतोवायु

अथ त्रयोविंशोऽध्यायः

श्रीभगवानुवाच—

एवमाधारसंस्थानं कृत्वा तदनु विन्यसेत् ।
आकजक्षेत्रदेशाद्वै यावद्धारावनि क्रमात् ॥१॥

[1]आधेयाधारकत्वेन तदधिष्ठातृदेवता ।
अपेक्षाप्राग्वशेनैव दिग्विदिक्षु यथाक्रमम् ॥२॥

ऐश्वरं पौरुषं प्राच्यां प्राजापत्यं तृतीयकम् ।
तत्राद्यमपवर्गादिसाधने [2]कर्मिणां हितम् ॥३॥

तत्सिद्धिसाधनत्वेन सर्वेषां चाकरं स्मृतम् ।
प्रयाति चाङ्गभावं तु मन्त्रिणामप्यमन्त्रिणाम् ॥४॥

प्रसिद्धं सिद्धकामानां तृतीयममलेक्षण ।
स्वबुद्धिशक्त्या ह्यागसिद्धये उक्तमब्जज ॥५॥

स्वमन्त्रं व्यक्ततां नीतं यत्तत्वे नित्यसंमुखम् ।
भूतसामर्थ्यमूर्तेर्वै चित्तेः सकरणस्य च ॥६॥

वस्तुत्वेन फलत्याशु त्वसमाम्मात्रवेदिनः? ।
भक्तिश्रद्धावशेनैव सन्निरुद्धो [3]भवानि यत् ॥७॥

---

1. ग–घ–आर्याचारकत्वेन
2. ग–घ–कर्मणाम्
3. ग–घ–भवादिवत्

एवं मन्त्रार्क [1]दृप्रश्मिजालेनाभासितं हि यत् ।
ततः संकल्पमाद्यं हि नित्यनिश्चयचेतसाम् ॥८॥

मन्त्रैकशरणानां तु [2]बहिरप्यर्चने हितम् ।
अन्तर्वा बहिरब्जोत्थ आ (?मा) धाराद्दिगुदक् स्थितम ।९॥

निपतत्यंशुजालं च यत्र तत् पौरुषं स्मृतम् ।
भगवान् [3]भूतभावानामात्मदैवत्ययाजिनाम् ॥१०॥

गुणा [4]बहुभिदश्चासु बहिरन्तर्यथैश्वरम् ।
यन्निश्चयीकृतं पूर्वं तत्प्रसिद्धिवशात्त्वपि ॥११॥

सुप्रसिद्धं च तद्वृत्ति तृतीयं हि महामते ।
रुचिदिग्वीक्षमाणानामेकद्वारादिकात्मनाम् ॥१२॥

देवतायतनानां च नमतानां महामते ।
शेषादिशयनानां च धूपादीनां निवेशने ॥१३॥

धर्मादिलक्षणे कार्या तद्वशादासनी स्थितिः ।
इन्द्रादि लोकपालानां यज्ञादीनां तथैव च ॥१४॥

प्रयोजनवशेनैव मन्दमध्यपरायणैः ।
कलशस्थं च कुण्डस्थं यन्त्रस्याराधनस्य च ॥१५॥

---

1. क–ख–दृग्वह्निज्वालेन
2. ग–घ–बहिरव्यच्यते
3. ग–घ–भावभूतानां
4. ग–घ–गुणावहि तिहाच्चाशु

एवमेवमनुष्ठेयं लोकेशानस्य पूजनम् ।
वनेऽत्र गहने विप्र सद्भूधरगुहान्तरे ॥१६॥

भूगृहे बलिभूमौ वा लोकधर्मरतात्मनाम् ।
लोके शासन [1]शास्त्रार्थं मन्त्राणां संस्थितिं सदा ॥१७॥

[2]सममन्त्रस्य दृष्टया वै कार्या कमलसंभव ।
अतत्व (ज्ञ) वद [3]ब्जोत्थ मन्त्रतत्त्वज्ञमाचरेत् ॥१८॥

नगरायतनादीनां सुस्थिराणां च सर्वदिक् ।
एवं ज्ञात्वा पुरा सम्यग्दिग्विदिङ्नियमं तथा ॥१९॥

सुयोग्यतावशेनैव [4]स्वस्यान्तःकरणाय च ।
समाचरेत् ततो न्यायं (?सं) मण्डलानां यथा शृणु ॥२०॥

सदैव शक्तिभात्रेन सद्रूपात्मनि वर्तते ।
स्थूलसूक्ष्मद्वयं विप्र त्वेवं सत्वात्मना सह ॥२१॥

व्यक्तिशक्तिसमूहं तु सूक्ष्मात्मन्यनुवर्तते ।
सत्ताख्येन [5]स्वरूपेण संयुक्ता सूक्ष्मदेहिनाम् ॥२२॥

---

[1] क–ख–शास्त्राख्य
[2] ग–घ–सद्यमन्त्रस्य
[3] क–ख–दब्जार्यं
[4] क–ख–स्वस्यान्त्यकरणाय च
[5] क–स्वरूपेण...

6स्थूलात्मन्यब्जसम्भूत संस्थिता सर्वदैव हि।
ऊह्येऽत्र विहितो वाऽपि बहिरन्तर्व्यपेक्षया ॥२३॥

पद्मावनिसमीपे तु पक्षन्यासो विधीयते।
द्विधा सत्तात्मकं रूपं रूपं सर्वस्य (?वंस) देवहि ॥२४॥

समीपे यागभूमौ तु विहिता न्यासकर्मणि।
बृहद्रूपं (?पा) तु सर्वेषामन्योन्यारागता द्विधा ॥२५॥

मण्डलीयेषु पीठेषु यस्मादब्जसमुद्भवा।
बाद (?पा) गात्रकबिंवानां द्विविधा वर्तते स्थितिः ॥२६॥

स्वेनोपदान्वितस्पष्टा? सुस्पष्टाऽन्या च केवला।
एवं ज्ञात्वा पुरा सम्यग् यथावदमलेक्षण ॥२७॥

पूर्ववन्मण्डलानां तु पर्यन्तन्यासमाचरेत्।
सर्वदा सर्वयागानां दलाद्व्योमदलान्तरे ॥२८॥

शब्दे प्रकाशमात्रं तु स्वदैवत्यं न्यसेद्ध्रुवम्।
व्योमबाह्ये त्वपीठानामग्निकोणादितो न्यसेत् ॥२९॥

[2]युगस्वभावमूर्तिं च धर्माद्यं हि चतुष्टयम्।
तन्निविष्टं तथा भूतं [3]तद्व्यत्ययगुणं हि यत् ॥३०॥

---

1. क–ख–"स्थूलात्मनि" इत्यादि "दैवत्यं न्यसेद्ध्रुवम्" इत्यन्तं सार्धं श्लोकषट्कं गलितम्
2. ग-घ–ज्ञानस्वभाव
3. ग-घ–तद्व्यत्ययगणम्

[redacted] Sa Rashtriya -RajivGand ERI mpus

[1]सह ऋक्पूर्वसामान्यं कालभेदेन चान्वितम्।
ततो देशे सपीठानां [2]तदुद्देशं तथैव च ||३१||

तदै (?वै) व [3]शब्दाकाशं तु चतुर्था (?धा) त्वेव ए(?मे)व हि।
शरदिन्दुकलासारकान्तिभूतं तु विन्यसेत् ||३२||

पीठानामष्टबिम्बानां प्रादक्षिण्येन योजयेत्।
आग्नेयादौ [4]चतुष्कार्थे ईशकोणावसानकम् ||३३||

धर्मज्ञानं च वैराग्यमैश्वर्यं कमलोद्भव।
प्रागादावृत्तरान्तं तु त्वधर्ममलेक्षण ||३४||

[5]अज्ञानं च त्ववैराग्यमनैश्वर्यमनन्तरम्।
चतुःखण्डे तु वै पीठे केवले पूर्ववन्न्यसेत् ||३५||

[6]धर्माद्यैश्वर्यमूलं तु यथोद्दिष्टक्रमेण तु।
बाह्यतश्चोपपीठे तु व्योमभावो (?बाह्यो) पलक्षणैः ||३६||

चतुष्टयभ्रमाद्यं तु [7]पादन्यासादनन्तरम्।
पीठानामेकबिम्बोत्थं गात्राणां कमलोद्भव ||३७||

---

1. ग–घ–सहान्यत्पूर्वं
2. ग–घ–तदुद्देशे
3. ग–घ–शब्दकोशं तु
4. ग–घ–चतुष्कं तु
5. क–ख–अज्ञानं च अवैराग्य
6. ग–घ–धर्माद्यैश्वर्यनिष्कं तु
7. क–ख–पादा···दनन्तरं

द्विबिम्बचरणानां तु तत्र चाभ्यन्तरे क्रमात्।
व्यत्ययैः सहधर्माद्यैः प्राग्वद्वेधास्ततो बहिः ॥३८॥

[1]गात्रकेषु कृताद्याश्च चत्वारश्च यथाक्रमम्।
साङ्घ्रिणा गात्रकाणां तु बिम्बमध्यात् तदात्मनाम् ॥३९॥

पूर्वापराभ्यां बिम्बाभ्यामाग्नेये तदनु न्यसेत्।
परापरविभागेन धर्मस्तत्रैव तद्बहिः ॥४०॥

दक्षिणोत्तरभागाभ्यामैश्वर्यं [2]द्विज शक्तिदम्।
उदग्दक्षिणयोस्तत्र ह्यधर्माख्यं च रूपभृत् ॥४१॥

प्राचीपूर्वापराभ्यां तु [3]अधर्मं च द्विरात्मवत्।
[4]युगं हि कृतनामाख्यमात्मना (?नो) दक्षिणोत्तरे ॥४२॥

याम्ये प्राक् पश्चिमे त्रेता ह्यज्ञानं दक्षिणोत्तरे।
वारुणे त्वप्यवैराग्यं द्विधा प्राक्पश्चिमे न्यसेत् ॥४३॥

सोत्तरे दक्षिणे भागे द्वापरं विनिवेश्य च।
उत्तरे तु ह्यनैश्वर्यं [5]दिग्द्वये दक्षिणादितः ॥४४॥

बिम्बद्वये तु प्रागाद्यैर्वि[6]धान्यकलिकं ततः।
त्रिबिम्बचरणे पीठे पञ्चबिम्बे तु गात्रके ॥४५॥

---

1. क–ख–गात्रक्षेषु
2. क–ख–त्विचशक्ति
3. क–ख–भ्यां तु…
4. …नामाख्य
5. ग–घ–दिश्यये
6. क–ख–विधानकलिकम्

अभ्यन्तरेषु पादानां धर्मास्तद्बहिरस्य च।
सूक्ष्म (लक्षणरूपाश्च) साधारास्तु कृतादयः ॥४६॥

गात्रकेषु त्वधर्माद्या न्यस्तव्या मूर्तिलक्षणाः।
अथैकबिम्बपीठाग्रे पञ्चबिम्बे तु गात्रकम् ॥४७॥

यथा तदनु सार्धेन एकाग्रमवधारय।
स्वक्षेत्रेषु च धर्माद्या न्यस्तव्या व्यक्तलक्षणाः ॥४८॥

मध्यतो गात्रबिम्बानामधर्माद्यास्तथाविधाः।
तस्य सव्यापसव्याभ्यां बिम्बाभ्यां कमलोद्भव ॥४९॥

एक एव द्विधा चैव ऋग्वेदं सूक्ष्मलक्षणम्।
ततः सत्तास्वरूपं तु कृतं तदुपपक्षयोः ॥५०॥

एवं दक्षिणदिग्भागे [1]यजुस्त्रेतायुगान्वितम्।
प्रत्यक् प्राग्द्वापरं ह्युदक् [2]त्वथर्वा(?र्वे)युगनी (?वान्) कलिः ॥५१॥

द्विबिम्बचरणानां तु पीठानां कमलोद्भव।
द्विबिम्बगात्रकाणां तु विन्यासमथ मे शृणु ॥५२॥

मन्त्र (?ध्य) बिम्बेषु पादानामग्ने [3]रीशपदावधि।
परस्वरूपा धर्माद्या [4]बहुस्थूला कृतादयः ॥५३॥

---

1. क–ख–ग–घ–यदुस्त्रेता
2. क–ग–साथर्वयुगः कलिः
3. क–ख–मग्नेः श्रीश
4. क-ख–बहु···ला

मध्ये (?ध्य) बिम्बेषु गात्राणां धर्माद्या परमात्मकाः ।
तत्पक्षयोस्तु साकाराः श्रुतिसञ्ज्ञा द्विधा द्विधा ।५४॥

द्विबिम्बचरणे पीठे तदन्यत् पञ्चबिम्बके ।
[1]परस्थली (स्थूल) विभेदेन धर्माद्यास्त्वायतेषु च ॥५५॥

ततोऽधर्मादयः स्थूला मध्यतो गात्रभूमिषु ।
पञ्चावनिसमीपे तु मध्यबिम्बस्य पक्षयोः ॥५६॥

सत्तास्वरूपद्वित्वेन न्यसनीया ऋगादयः।
[2]एवमाकृतिमन्येऽपि बहिः प्राग्वद्द्वयोरपि ॥५७॥

कृतादयस्तु साकारा[3]श्चा (?त्र्या) त्मना द्व्यात्मना न्यसेत् ।
चतुर्बिम्बेषु पादेषु पीठेष्वेव महामते ॥५८॥

[4]अन्यत्र पञ्चबिम्बेषु न्यासक्रममथोच्यते ।
तत्र धर्मादयस्तावत् परसूक्ष्ममयाः क्रमात् ॥५९॥

सर्वान्तरस्थ (?स्था) तद्बाह्ये प्रत्यग्रे तु पदे पदे ।
ताभ्यां तदनु बाह्यस्थां बिम्बाभ्यां विनिवेश्य च ॥६०॥

[5]स्थूलत्वेन ततो भूयस्तथा रूपा युगास्तथा ।
न्यस्तव्या युग्मयोगेन स्याच्चतुर्णां यथाऽष्टधा ॥६१॥

---

1. ग-घ-परस्थूलीविभेदेन
2. क-ख-एनमाकृतिमन्त्येपि
3. क-ख-द्वामनाच्चात्मना
4. क-ख-अन्यपत्रं च
5. क-ख-'''लस्सोततो

साकारस्तु ह्यधर्मात्मा गात्रकाणां हि मध्यतः।
[1]समं व्यूह्य क (जे) सम्यक् पक्षबिम्बमपि (?धि)
स्थितम् (?तः) ॥६२॥

[2]वा (?न्या) साभाव (?वाद्) द्विधैकैकं पुनरप्यत्र पूर्ववत्।
[3]त्रि प्रकारा द्विधावस्था ऋग्वेदाद्यास्ततो न्यसेत् ॥६३॥

गात्रकेष्वष्टबिम्बेषु चतुर्बिम्बेषु चाश्रिषु।
[4]विन्यासं (तेषु) चाब्जोत्थ (?त्थं) यथा तदवधारय ॥६४॥

आरभ्यान्तरबिम्बाद्यैर्बाह्यबिम्बान्तमङ्घ्रिषु।
परसूक्ष्मविभक्तेन ततो धर्मादयः क्रमात् ॥६५॥

तत्रैव पक्षदेशाभ्यां कृता युग्मयुतो (?तो) गतः (?ताः)।
मुखसेनावहा मूर्तिलक्षणा विनिवेश्य च ॥६६॥

स्थूलभूतस्वधर्माद्या गात्रकाणां तु मध्यतः।
पत्रसूक्ष्मात्मना तेषां बिम्बमध्यबहिः स्थिते ॥६७॥

स्थूलात्मा सर्वेऋग्वेदमेकं [5]तत्पक्षयोर्द्विधा।
पुनः सूक्ष्मात्मना चैव न्यसेत्तदुपपक्षयोः ॥६८॥

---

1. ग–घ–समं व्यूहकासम्यक् पक्षबिबमाधिस्थितः
2. ग–घ–द्वाह् वभाव
3. क–ख–त्रि ··· काराद्विधाव्यवस्था ···वेद्यास्ततो
4. क–ख–विन्यासं····चाब्ज····यथा
5. क–ख–तच्चक्रयोः

भूत (?ता) स्तद् बाह्यसंस्थाभ्यां [1]पादाभ्यां तत्पदात्मनाम् ।
एष (?तत्) ए (?तदे) व हि तद्विप्र न्यसनीयं प्रयत्नतः ॥६९॥

एवं दक्षिणदिग्भागादुदङ्निष्टं द्विजोत्तम ।
अथर्ववेदपर्यन्तं यजुर्वेदादिकं न्यसेत् ॥७०॥

[2]दृक्श्रोत्रपाणिपादानां करणानां यथैव हि ।
[3]सत्वैवाकातुश्च? वै (?सत्वग्वागादिकाश्चैव) विश्व (?श्वं) तथैतेषां
द्विते? ततः (?तत्तथैवेषां स्थितिस्ततः) ॥७१॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
आसनदेवतान्यासो नाम
त्रयोविंशोऽध्यायः

*

---

1. क-ख-पाद्याभ्याम्
2. क-ख-दिक्श्रोत्र
3. सर्वत्र विकृतान्यक्षराणि

अथ चतुर्विंशोऽध्यायः

श्रीभगवानुवाच—

पूर्वापराभ्यां द्वाराभ्यां [1]सुपर्णं सत्यविक्रमम् ।
न्यसेद्वै [2]सर्वे (सं) थानां तत्र [3]पृष्ठगते (?तं) विभोः ॥१॥

ईषत् तद्द्वारमाश्रित्य [4]हेमदण्डं (च) मन्दिरे ।
संमुखं सम्मुखे द्वारि भूगतं विधृताञ्जलिम् ॥२॥

दक्षिणोत्तरभागाभ्यां द्वाराभ्यां कमलोद्भव ।
गदाचक्रे ज्वलद्रूपे विन्यस्ते तत्परायणे ॥३॥

चण्डादीनां पुराष्टानां [5]चतुर्द्वारगतो स्थितः (?तिः) ।
प्रकाशितावग (?ह्यव) स्थानां सेव (?वा) यागेषु भूगताः ॥४॥

क्रमेण तु गतं तेषां [6]शोभाष्टगतमष्टकम् ।
शोभाष्टकयुते यागे वज्रनाभादिकं हि यत् ॥५॥

उपशोभाष्टकार्थानां यागानामथ तद्गतम् ।
न्यस्तत्र्यमष्टकमिदं तृतीयं क्रमशो द्विज ॥६॥

---

1. ग–घ–सुपत्यस्सत्य
2. ग–घ–सर्वथाधानाम्
3. ग–घ–तत्रपृष्ठगतम्
4. क–ख–हेमदण्डं ममाथिरे ग–घ–हेमदण्डममन्दिरे
5. क–ख–द्वारगतो
6. क–ख-शोभाष्टगणमष्टकम्

लोहिताक्षो महावीर्यस्त्वप्रमेयः सुशोभनः।
वीरहा विक्रमो भीमः शतावर्तस्तु चाष्टमः ॥७॥

त्रयोऽपि शोभानुगत [1]मन्यशोभाष्टकं द्विज।
तत्राष्टकमिदं चान्यच्चतुर्थं क्रमशो न्यसेत् ॥८॥

अनिवर्ती महावर्तो [2]नागहा सर्वजित् स्थिरः।
जयन्तो [3]भयकूर्मादि त्वष्टमं कमलोद्भव ॥९॥

उपद्वारेषु यागानामिदं षोडशकं क्रमात्।
प्रदक्षिणेन प्राग्भागाद् द्वौ द्वौ चण्डप्रचण्डवत् ॥१०॥

दृढव्रतो बहुशिरा महाकायो महाबलः।
जितक्रोधो दुराधर्षो महोत्साहस्त्रिविक्रमः ॥११॥

अनिलो दुष्टहाऽर्चिष्मान् [4]सर्वदृग्दुरतिक्रमः।
विषमो गहनो मेधः षोडशैते मयोदिताः ॥१२॥

चतुरश्रेषु यागानां वह्नेरीशपदावधि।
चतुष्टयमिदं विप्र न्यसनीयं यथाक्रमम् ॥१३॥

[5]ऊर्जितश्चामृताङ्गस्तु सर्वाङ्गः सर्वतोमुखः।
कोणानामेकबिम्बानामित्युक्तं कमलेक्षण ॥१४॥

---

1. क–ख–मन्यथोक्ताष्टकम्
2. क–ख–दर्पहा सर्पहा इति स्यात्
3. ग–घ–भयकुम्भानि (भयकुन्भान्ति)
4. क–ख–सर्पदिग्दुर
5. क–ख–ऊर्जितश्च भृशाङ्गस्तु

[1]द्विविम्बानां सदुद्देशात् तत्पादान्तं बहिः पुनः।
चतुष्टयं योजनीयं न्यासकाले द्विजं महत् (?द्विजोत्तम) ॥१५॥

शुभाङ्गो वरदश्चैव वागीशः शब्दविक्रमः।
विद्धि शङ्खविशेषास्ते सूक्ष्मस्थूला यथाक्रमम् ॥१६॥

इदमुक्तं यदुद्दिष्टं मण्डलानां पुरा मया।
आधारदेवताव्यूहं पीठामरगणान्वितम् ॥१७॥

द्वारेशानुगते (?तौ; साधँ (?र्धम) श्रीणा (?णां) नाथ गणं हि यत्।
सर्वेषामर्चनं[2] विप्रा (?प्र) दाराध्या (?विदध्याद्) हृदयान्वितः ॥१८॥

स्वसंज्ञाप्रणवोपेता नमस्कारपदानुगाः।
या [3]पनस्थूलसूक्ष्माख्या युक्ताऽन्येषां पदेन तु ॥१९॥

आत्मनेतिपदोपेताः स्वाहान्ता होमकर्मणि।
चित्तसम्प्रतिपत्त्यर्थं [4]मा (?र्थंसा) राधारादथाब्जज ॥२०॥

यथाक्रमेण सर्वेषां [5]ध्यानमार्गक्रियामलम्।
[6]शान्त मुज्झिततच्छेषं स्थितमन्तर्मुखं स्थितम् ॥२१॥

---

[1] क-ख-इदमर्धं लुप्तम्
[2] ग-घ-विप्रदाराध्या
[3] क-ख-या पुरः स्थूल
[4] घ-माधारा ··दथाब्जज
[5] ग-घ-ध्यानक्रणियामलम्
[6] क-ख····मुच्झितत ग-घ शान्तमुज्झिततच्छिष्टम्

आधेयोल्लिखिताकारमाधाराख्यं स्मरेत् प्रभुम् ।
कूर्ममुद्रान्वितं कूर्मवक्त्र निष्टप्तरुक्मभम् ॥२२॥

शङ्खपद्मधरं कूर्मं स्वस्तिकेन स्थितं स्मरेत् ।
मुञ्चन्तमनिशं तेजो देहाद्भीषणमुत्कटम् ॥२३॥

तिर्यगूर्ध्वं तदाधारं [1]ज्वलामालमिवोज्ज्वलम् ।
अनन्तशशिसङ्काशमनन्तमथ संस्मरेत् ॥२४॥

सहस्रफणमालाढ्यं सहस्रफणभूषितम् ।
स्वपाणिसंपुटेनैव शोभवत् स्वाङ्ग[2]भूषितम् ॥२५।

सितरविन्दशङ्खाक्षसूत्र [3]चक्रकरान्वितम् ।
[4]पतनाशङ्कबुद्धेर्वै वित्रस्तमनसस्तु च ॥२६॥

मा भैरित्य[5]भयं यच्छन्नाब्रह्मभुवनस्य च ।
[6]निश्शेषरक्तहेमाभां [7]प्रावृट्श्रियमिवोज्ज्वलाम् ॥२७॥

पद्मासनेनोपविष्टां ध्यायेद्बध्दाञ्जलिं धराम् ।
फुल्लकुन्दावदातं च सितस्निग्धजटाधरम् ॥२८॥

---

1. ग–घ–ज्वालामालामिव
2. क-ख–ग-स्वाङ्गभूतलम्
3. क–ख–सूत्रचक्रान्वितम्
4. क–ख–पातानागकयृद्धेर्वै
5. क–ख–त्यभयं य ¨ दा ब्रह्म
6. ग–घ–निश्शेषरत्नहेमाभाम्
7. ग–घ–प्रावृट् करिपोज्वलाम्

ध्यायमानं सितं शङ्खं मुक्तादामैरलंकृतम्।
विस्तीर्णसर्वावयवं विक्षिप्तोरुद्वयस्थितम् ॥२९॥

विक्षिप्तजानुपादं च संस्मर्तव्यं पयोनिधिम्।
[1]सुपीताम्रफलश्यामपाणिपादतलोज्ज्वलम् ॥३०॥

रक्ताक्षं च तदा विप्र कीर्णकेशं सिताननम्।
पद्मासनेनोपविष्टमक्षमालासमाकुलम् ॥३१॥

पद्ममुद्रान्वितं पद्मं सुदीर्घचरणं स्मरेत्।
तुहिनाच्छोपलस्वच्छमुक्ताफलशशिप्रभाः ॥३२॥

मृगेन्द्रस्कन्धवदना धर्म [2]ज्ञानादयश्चतुः।
पद्मरागप्र[3]वालादि सद्दाडिमफलोज्ज्वलाः ॥३३॥

अन्तर्दयोपरक्ताश्च राजराजेश्वरोपमाः।
द्विरष्टवर्षवद्विद्धि चत्वारो धर्मपूर्वकाः ॥३४॥

हेमचम्पकखद्योत हरितालदलोज्ज्वलाः।
वाजिवक्त्रा स्मृताः वेदाः संपूर्णनरलक्षणाः ॥३५॥

[4]एवं वृषेन्द्रवदना युगा ब्रह्मन् कृतादयः।
सुपक्वाम्रातसीपुष्पनीलाब्जशुकसन्निभाः ॥३६॥

---

1. क–ख–सुखित्वाम्र
2. ग-घ-ज्ञानादयच्छदा
3. क–प्रवालादि···लोज्वला ग–घ–प्रवालानिरन्ध्रान्ध्रवलोज्वल
4. क–ख–एवं···वदना

सर्वे सद्वस्त्रस्रक्पुष्पसदलङ्करणान्विताः ।
शङ्खपद्मधराः सर्वे वराभयकरास्तु वै ॥३७॥

आधेयचक्रविन्यस्तमस्तकाः स्वात्मसिद्धये ।
समर्पितान्तःकरणा परस्मिन् मन्त्रकारणे ॥३८॥

युगान्तार्काग्निसङ्काशखगो (?ग) मण्डलमध्यगम् ।
स्वमुद्राव्यग्रपर्णि च वल्गन्तं हेतिराट् स्त (?स्म) रेत् ॥३९॥

[1]चिन्त्यमव्यक्तपद्मं तं हिमहेमाग्निभास्वरम्
शान्तमष्टभुजं सौम्यं संस्थितं स्वस्तिकेन तु ॥४०॥

स्फटिकोपलकान्ति च चिद्घनानव (?नप्रभ) मव्ययम् ।
सर्वशक्तिनिधिं ध्यायेदमूर्ति (?र्तं) चित्प्रभाकरम् ॥४१॥

सर्वेष्वपि भवान्तस्थं तत्राधारात्मना (?नो) विभोः ।
स्वसत्ताभासितं सत्त्वं गुणसत्त्वाद्विलक्षणम् ॥४२॥

निभवं विद्धि विप्रेन्द्र [3]ज्वालौघं कच्छपात्मनः ।
स्वभोगं नाग [4]नाथस्य···क्षितकाञ्चनित्यया (?तप्तकाञ्चनसंनिभम्) ॥४३॥

आसारमामृतं दिव्यं वीच्योघैस्तु समन्वितम् ।
क्षीरोदकीयं विभवं परिज्ञेयमनश्वरम् ॥४४॥

---

1. ग-घ-चित्तमव्यक्त
2. ग-घ-सर्वेष्वपि च भावान्तस्तत्राधारा
3. क-ख-ज्वालोपङ्क्श्चचात्मन
4. ग-घ-नाथस्य भुक्षितः काञ्चनीयथा

[1]बीजकोशं सकिरासं (?केसराढ्यं) कमलस्य दलान्वितम्।
[2]स्वशक्तिनी (?स्वशक्ति) प्रवृत्तीनां मया विभवमप्रकृत्
(?मायाविभवरूपकृत्) ॥४५॥

विमलादिकलाजालं पौरुषं विभवं स्मृतम्।
[3]विभोर्मन्त्रात्मनश्चेदमशेषममरार्चितम् ॥४६॥

[4]आमहन्मन्त्रनाथेभ्यो नानामन्त्रगणं हि यत्।
स्वशक्तिनिचयोपेतं तद्विष्णोः परमात्मनः ॥४७॥

विभवं कमलोद्भूतं ज्ञात्वैवं स्वं यजेत्तदा।
पीठवेदिबहिष्ठानां प्रागुक्तानां द्विजोत्तम ॥४८॥

लोहिताक्षादिकानां तु [5]ध्यानस्यातः परं शृणु।
लोहिताक्षादयश्चाष्टौ वर्णतस्वपतो (?तपनो) ज्वलाः ॥४९॥

ज्वलत्परशुहस्ताश्चा [6]प्य (?भ्य) स्तं मुदितमानसाः।
चतुर्थमष्टकं यद्वै ह्यनुवर्तिपुरस्सरम् ॥५०॥

तदाऽनन्तकरं विद्धि [7]स्वस्य नद्यु (?चाम्यु) दया करम्।
दृढव्रतादयः सर्वे [8]षोडशोपप्रवेशकाः ॥५१॥

---

1. ग–घ–बीजकोशं सकेरासं क्रमस्याश्रमं हि यत्
2. क–ख–···मयाविभव
3. क–ख–···मम···त्मनश्चेदं अशेषपुरार्चितम्
4. क–ख–···महन्मन्त्र
5. क–ख–ध्यानं सातः परम्
6. ग–घ–श्चाप्यास्तम्?
7. क–ख–स्वस्य····करम्
8. क–ख–षोडशो····काः

महामुद्गरहस्ताश्च स्वाश्रयद्युतिलक्षणाः।
ऊर्जिताद्यास्तथैश्रीरा गृहीतमुसलास्तुते ॥५२॥

कान्तितः कोणभूभागा लक्षणात् (?गलक्षणा) कमलोद्भव।
सर्वे चार्वम्बराश्चैव द्विभुजाश्चारुकुण्डलाः ॥५३॥

प्रसन्नवदनाः सौम्यास्त्रैलोक्योद्धरणक्षमाः।
हारनूपुरकेयूरपूर्वैर्द्वा [1](?स्थं) श (?छ) विद्युताः ॥५४॥

तदाज्ञाप्रेक्षकाश्चैव दुष्टदोषोपशान्तिदाः।
बलेन महता क्षिप्तदेवासुरमहोरगाः ॥५५॥

एकवीरासहायाश्च त्वप्रयत्नेन लीलया।
आब्रह्मभुवनं शश्वत् परिवर्तनकृत्क्षमाः ॥५६॥

गदागरुडचक्राणां चण्डादीनां महामते।
यथावदुक्तं हि पुरा भूयः किं कथनेन हि ॥५७॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
आधारासनदेवतालक्षणो नाम
चतुर्विंशोऽध्यायः

*

---

[1] ग-घ-द्वारर्थैशविद्युताः

अथ पञ्चविंशोऽध्यायः

पौष्कर उवाच—

वृत्तिस्थानानि भगवन् त्वच्छासनरतात्मनाम् ।
हितार्थं ज्ञातुमिच्छामि त्वत्सकाशाच्च सांप्रतम् ॥१॥

[1]सत्यव्यूहं च सद्भेदैः सहमूर्त्यन्तरैस्तथा ।
प्रादुर्भावैर्द्विजश्रेष्ठ प्रादुर्भावान्तरैर्विना ॥२॥

[2]यदन्यदेवताकारं तदा सारसलाञ्छनम् ।
निषिद्धं वैष्णवानां च सामान्यानां सदाऽर्चने ॥३॥

किं पुनर्मन्त्रतत्त्वज्ञ तत्पारम्यरतात्मनाम् ।
[3]तदाराधनसिद्ध्यर्थे दीक्षितानां महात्मनाम् ॥४॥

नमस्कुर्याद्विभूत्यंशं दृष्टं वा [4]संश्रुतं स्मृतम् ।
पूजनीयमनुज्ञानमाराध्यानां बहिः क्वचित् ॥५॥

कदाचिद् दृष्टसिद्ध्यर्थं [5]स्वाङ्गमोभिः रचर्चितम् ।
स्वातन्त्र्येणोपचारैस्तु शुद्धस्यैषां न दोषकृत् ॥६॥

---

1. क–ख····भेदैः
2. यदद्यदेवताकारं तदा लाञ्छनम्
3. क–ख–महात्मनाम्
4. क–ख–सधु तम् ग–घ–सशृतम्
5. क–ख–स्वाङ्ग मो····तम्

पौष्कर उवाच—

त्वत्तोऽहं दातुमिच्छामि विशेषेण जगत्प्रभो।
उपादेयादिकं भेदमाश्रयाणां यथार्चितम् ॥७॥

श्रीभगवानुवाच—

उपादेयानि विप्रेन्द्र वृत्तिस्थानानि मे शृणु।
सवाचकानां वाच्यानां सदाराधनसिद्धये ॥८॥

भूतेभ्य[1]स्त्रितयं पूर्वं तत्प्राक्सामान्यलक्षणम्।
चलाचलविभागेन पीठवत्पृथिवी पुनः ॥९॥

हेमादिनानाप (?पा) त्राणां मृत्काष्ठोपलजन्मनाम्।
स्वङ्गास्थिघटितानां च कलशानां तथैव हि ॥१०॥

[2]शुभपर्णपुटानां च गालितं सास्थितं जलम्।
स्थलमल्लककुण्डानां स्थिरसंचाररूपिणाम् ॥११॥

प्रदीप्तो [3]धूमनिर्मुक्तो सेन्धन (?) श्शस्यतेऽनलः।
पूर्वोक्तद्रव्यभेदोत्थे चतुरश्रादिलक्षणे ॥१२॥

केवले भद्रपीठे वा [4]पद्माद्यैर्मध्यतोदि (?हि) ते।
एवं रूपेषु पीठेषु प्रमाणोनेषु चाब्जज ॥१३॥

विविधेष्व [5]प्रणालेषु काश्रयेषूज्झितेषु च।
बृहत्प्रवालसद्रत्नमहामुक्ताफलोपरि ॥१४॥

---

1. क–ख–स्त्रितयं… तत्प्राक्
2. क–ख–शुभवर्णपटूनांच संस्थिताञ्जलिम्
3. क–ख–यूपनिर्मक्तो
4. क–ख–पद्मरद्यै….दिते
5. क–ख–ष्वप्रमाणेषु

सूक्ष्मे तन्निकरे वाऽथ संभवे सति पद्मज।
क्षौमकार्पासकौशेयवस्त्रजाले सितेऽहते ॥१५॥

[1]मार्गे चर्मणि भूमिष्ठे कम्बले कुतपेऽब्जज।
पृथग्भूतेऽथवा चाभि (यु?) क्तलक्ष्मीप्रसारिते ॥१६॥

[2]ग्राम्यैर्वृध्द्गणैः कृत्स्नैस्त्वारण्यैस्तण्डुलैस्तथा।
[3]क्षोदितैर्गन्धसंमिश्रैर्विधिवत् संप्रसारितैः ॥१७॥

गन्धक्षोदैस्तु विविधैस्स्थूलैर्धूपाधिवासितैः।
[4]गर्भैर्वा [5]स्थगितै [6]स्थाना (?तैः) स्थातैः पुष्पैः पत्रैश्च शाड्व
(?द्व) लैः ॥१८॥

स्वतन्त्रैस्सितरक्ताद्यै रागै रेखाविवर्जितैः।
मधुक्षीराज्यदध्यन्नभक्षैः पात्रस्थले स्थितैः ॥१९॥

फलमूलैस्तथा सिध्दैश्शाकैः [7]खण्डैश्च तानितैः।
[8]निवृत्तौ चैत्यसंज्ञे तु मण्डले सप्तमेखले ॥२०॥

---

1. मार्गे चर्मणि कृष्णाजिने
2. ग–ग्राम्यैर्वृध्दागणैः घ–ग्राम्यैर्वृध्दान्गणैः
3. क–ख–क्षौमितैः
4. दर्भैः इति स्यात्
5. ग–स्थगिते
6. क–ख–स्थानापुष्पैः
7. क–ख–कण्डैश्चतादितैः। ग–घ–खण्डेश्चशाद्वलै इति लिखित्वा पश्चात् खण्डैश्च तानितैः इति लिखितमस्ति
8. क–ख–निवृत्तौ च संज्ञे

चतुः शृङ्गे[1] न मे वीख्ये न लिंगे कुलिशोदरे ।
न शूल शृङ्ग[2] कोटीनां दिनत्र्यक्षा (?क्ष) फलेषु च ॥२१॥

करञ्जाद्येष्वपूज्येषु [3]त्वन्येष्वेव हि पङ्कज ।
पुष्पेषून्मत्तकाद्येषु त्वज्ञातेषु विशेषतः ॥२२॥

निन्दितेषु च पत्रेषु कमण्डलुगतेऽम्भसि ।
[4]तत्र (?नेर्योनि) संस्थाप्य संस्थिते मण्डलादिके ॥२३॥

[5]विना शङ्खदलं विप्र तथा शुक्तिकवाटकम् ।
न कपालाकृतौ पत्रे करवे भावदूषिते ॥२४॥

[6]शब्ददुष्टो व (?च) म त्य (?न्य) स्मिन् [7]रक्ते वै स्थण्डिलादिके ।
स्वाश्रयेषु यथा देवै (?वा) श्चातुरात्म्यादयोऽर्चिताः ॥२५॥

निराश्रयैर्नरैर्भक्तैर्नासाद्यास्तेऽर्चनाय च
विनोदितैर्विशेषाख्यैर्हृच्चक्रकमलैः सह ॥२६॥

हितं हितानुज्ञानानामाधाराणां परिग्रहम् ।
कर्मिणां फलकामानां मन्त्रात्मा संप्रयच्छति ॥२७॥

---

1. क–ख–चतुश्शृङ्गा न मे कुलि
2. क–ख–न शूल-दिन
3. क–ख–त्वद्येष्वेवहि
4. क–ख–तत्रश्रोयोनि
5. –क–ख–विनाशवदलम्
6. क–ख–शब्दमुष्टोवमन्यस्मिन्
7. क–ख–नृत्तेवै

सद्यो वृत्तवशात् [1]ब्रह्मन्ननुरूपफलं हि यत्।
सामान्यादप्यसामान्या[2]दामाया (?चामा) द्भूतलक्षणात् ॥२८॥

[3]अचलप्राप्ति (?प्तिं) वा भूतिप्राप्ति (?प्तिं) विप्राविनश्वरीम्।
परिवर्तन [4]रूपा च सा पुनश्चललक्षणा ॥२९॥

सप्रभूताज्जलाद् वृष्टिलाभः समुपजायते।
[5]वृष्टिरल्पतरा चैव [6]यावज्जीवं तु पौष्कर ॥३०॥

[7]नित्यं निरामयत्वं च वह्नेर्वृत्तौ तु मन्त्रिणाम्।
हेमाद्युत्थेषु पीठेषु मन्त्री कमलसंभव ॥३१॥

प्रतिपत्तिगणं श्रेष्ठं नृपेभ्यः सर (?म) मा (?वा) प्नुयात्।
प्रवालाद्यैरधिष्ठानै [8]स्तेजोवृत्तिमनुत्तमाम् ॥३२॥

[9]धृतिं समृद्धिं पूजां च साजि (?र्जि) ताद्द्रव्यसंचयात्।
प्राप्नोत्यारधनाच्छश्वदाराध्या कमलेक्षण ॥३३॥

गन्धाधाराच्च सौभाग्यं कुलाधारान्महत्सुखम्।
संपूजनात्कुशादीनां पृष्ठे वै मन्त्रराट् सदा ॥३४॥

---

1. -क-ख-वशात्-ब्रह्मरूपफलम्
2. क-ख-न्यानामायात्
3. क-अर्धद्वयं लुप्तम्
4. ख-परिवर्तनपाश्च
5. ग-घ-पुष्टिरल्पतरा
6. क-ख-यावज्जीवं तु
7. क-ख-वृत्तौ तु
8. ग-घ-तेजोवृत्ति
9. ग-घ-धृतिस्समृद्धिपूजाम्

ददाति मनसः प्रीतिमतुलाममलेक्षण ।
रागाधारगतो मन्त्रः कामभोगमनुत्तमम् ॥३६॥

संयच्छत्यविरुद्धं च द्रविणेन समन्वितम् ।
मधुक्षीराज्यपूर्वेषु त्वाश्रयेष्वखिलेषु च ॥३७॥

[1]पूजनं मन्त्रनाथस्य दीर्घायुष्यं प्रयच्छति ।
तथैव विपुलां [2]कीर्तिं धर्मनिश्चयक्षमाम् । (?अधर्मनिचयक्षमाम्) ॥३८॥

एतानि पुनरब्जोत्थ [3]संभवानां फलानि च ।
भजन्ति नूनं [4]नानार्थमुद्यमाद्यन्महामते ॥३९॥

देशं कालं तथा [5]द्रव्यं महत्त्वादिव्यपेक्षया ।
याति मोक्षाङ्गभावं (?वं वै) नैष्ठिकानां महात्मनाम् ॥४०॥

सदे (?द्वै) व जीवमुक्तानां [6]भक्तानां भावितात्मनाम् । ॥४१॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
वृत्तिविचारो नाम
पञ्चविंशोऽध्यायः

(समुदितश्लोकसंख्या ४० १/२)

*

---

[1] ग–घ–पूजानान्मन्त्र
[2] ग–घ–विफलां कीर्तिमधमं निचय
[3] क-ख–संपान्ननाम्
[4] ग–घ-नानार्थमुत्तमाद्यं महा
[5] क-ख-भाव्यं महत्त्वादव्यपेक्षया
[6] क–ख-मुक्तानां भावि

अथ षड्विंशोऽध्यायः

श्रीभगवानुवाच—

यद्वृत्तौ विहितं यद्वै देशकालवशाद्द्विज।
अखण्डितं भोगजालं पावनं प्रीतिवर्धनम् ॥१॥

मान्त्रान्तमर्घ्यपूर्वं तु वस्त्रालंकारसंज्ञकम्।
सुसंपूर्णं च तद्भक्त्या श्रद्धया विनिवेद्य च ॥२॥

पुरुषाशनमात्रं तु व्यञ्जनेन समन्वितम्।
प्रापणं [1]परमान्नाद्यमन्नाद्यमतिभूतये ॥३॥

विहितं शुद्धशालिभ्यस्तद्वदेव हि पौष्कर।
लक्षणं लेह्यपेयाख्यशो (?चो) ष्यधानामिधायिनाम् ॥४॥

विधिवत् षड्रसोत्थानां पावनानामथाध्व (?थो वै)तः।
भक्तिश्रध्दावशाच्चैव प्रत्येकस्य [2]त्वनेकता ॥५॥

विशेषयागे विहिता नित्ये वा सति संभवे।
यस्मात्प्रागात्मसात्कुर्याद्भोगशक्तिमनश्वरीम् ॥६॥

व्यक्तां [3]गुर्वादिवक्त्रेण भुनक्ति तदनन्तरम्।
[4]भोगत्वमुपचारस्य भोजनाद्विहितं त्वितः ॥७॥

---

[1] क–ख–परमन्नाद्यमन्यार्थमति
[2] ग–घ–त्वनेकधा
[3] ग–घ–गुर्वादिवक्त्रैस्तु
[4] क–ख–भोग–विहितम्

तस्यां नित्ये यथाशक्ति निमित्ताराधने तु वा ।
श्रद्धापूतेन मनसा प्रीतयेऽतिजगत्प्रभो ॥८॥

निवेदनीयमेकैकं भोगं भोगाप्तयेऽब्जज ।
तत्रासनादिभिर्भोगैर्व्यक्तैर्व्यक्तिस्थमर्चयेत् ॥९॥

द्विरष्टाष्टकसंख्यैस्तु क्रमशो नरनाथवत् ।
मण्डलादौ तु वाऽन्यत्र स्मृत्वा मन्त्रमयं वपुः ॥१०॥

व्यक्तोपयोगभोगोपमूर्तं संयोज्य चेतसा ।
कृत्वा पाणितलस्थं च त्वर्घ्यस्रक्चन्दनादिभिः ॥११॥

विलेपनैरलंकारैर्नेत्रवस्त्रैर्विनाऽब्जज ।
एतानि कर्णिकोर्ध्वें तु योजनीयानि वै विभो ॥१२॥

विनिवेद्य निधायान्ये बलिभूमेर्बहिर्द्विज ।
योक्तव्यमग्निमध्ये तु समिद्भिस्सह सर्वदा ॥१३॥

सर्वाण्यन्नविशेषाणि चन्दनादीनि [1]यान्यपि ।
सदन्तकाष्ठताम्बूल [2]मुत्कटक्षारवर्जितम् ॥१४॥

दाप्यानि लक्षहोमे तु आसनादीनि यानि च ।
मधुलवणपानाम्बु [3]कटुतैलोज्झितानि च ॥१५॥

[4]कृत्वा यागं यथा शास्त्रमग्नौ मन्त्रार्चनं पुरा ।
आज्येन तर्पयेत् पश्चात् घृताक्तैस्सतिलैः फलैः ॥१६॥

---

[1] क–ख–चान्यपि
[2] क-ख–मुत्कटाक्षर
[3] क–ख–कटुतैलान्वितानि च
[4] क–ख–कुरव यागम्

वापीह्रदनदीदेवखातादिषु जलान्तरे।
[1]फलस्रगर्घ्यगन्धैस्तु [2]सतोयाञ्जलिभिर्द्विज ॥१७॥

[3]अर्चनीयं यथा कामं मन्त्रनाथमतन्द्रितैः।
[4]संग्रहे (?हैः) पात्रगं कृत्वा घटे वा (?प्रा) गर्जितं जलम् ॥१८॥

तत्र मण्डलवत्पूज्यं [5]श्रद्धया संभवे सति।
वस्त्रालंकारनेत्रादि विनिवेद्य बहिर्न्यसेत् ॥१९॥

कर्पूर[6]चेन्दनक्षोदं कुङ्कमागुरुभावितम्।
[7]विविधं पुष्पजालं च [8]तत्र साध्यं तु निक्षिपेत् ॥२०॥

धातुपाषाणमृत्काष्ठरत्नौषधिचितेषु च।
सपद्मेषु च पीठेषु चक्रयुक्तेषु वाऽब्जज ॥२१॥

द्वितयेनोपरिष्टात्तु उषितेषु तथैव च।
द्वारायाश्र (?श्याश्रि) तया वीथीपीठैरेवान्वितेषु च ॥२२॥

चतुरश्रादिभेदोत्थनानाकृतिधरेषु च।
एवं वा भद्रपीठेषु केवलेषु द्विजोत्तम ॥२३॥

---

1. ग-घ-फलस्रग्वर्घ्यें स्रगर्घ्यं इति स्यात्
2. क-ख-सतोऽञ्जलि
3. क-ख-इदमर्धं गलितम्
4. क-ख-पात्रं कृत्वा गर्जितम्।
5. क-ख-सात्पूज्यश्र…संभवे
6. क-ख-चन्दन
7. ग-घ-विधाय पुष्प
8. क-ख-तत्र-तु

ध्यात्वा मण्डलवद्देवमर्चनीयं यथाविधि।
मानसैः सूर्याबिम्बस्थं तद्वद्धृत्पुष्करान्तरे ॥२४॥

किंतु तत्र विशेषो यः तन्मे निगदतः शृणु ।
द्रव्याणां भूतजा[1]स्तानां ह्यसंपत्तिर्यदा बहिः ॥२५॥

तदा संकल्पसंभूत [2]मृद्व (?द्रव्यै) रर्चनं कृतम् ।
विलक्षणचिदानन्दप्रकाशवपुषो विभोः ॥२६॥

मूर्तिमन्त्रात्मकं रूपं ध्यात्वा संकल्पसिद्धिदम् ।
संभवे सति भोगानां चिदानन्दकदम्बवत् ॥२७॥

स्मृत्वोच्चरेद् द्विधा मन्त्रं सुविशुद्धेन चेतसा ।
सद्दशैर[3]र्चयेद्भोगैरमूर्तैश्शब्दलक्षणैः ॥२८॥

वृद्धिं समुपयातं तैः स्मरेत्तद्भावितैः क्रमात् ।
ध्यातृध्येयवि[4]भागेन त्विष्टे वै तदनन्तरम् ॥२९॥

विलाप्य स्वं मनोबुध्दौ तद्युक्ता सा परात्मनि ।
आत्मानं तन्मयीकुर्यान्निरस्तकरणैः स्वयम् ॥३०॥

केवलेनास्य रूपेण सर्वशक्तिमयेन च।
चिद्विशिष्टनरेणैव ततोऽब्जज शनैश्शनैः ॥३१॥

---

1. क-ख–जातानां तुभ्यं सपतिः
2. ग–घ–मृद्वक्तैरचंनम्
3. क–ख–भोगैरमृतैः
4. क–तदनन्तरम्

निस्तरङ्गस्थितेनैव स्वतन्त्रत्वं [1]मह [त्र] ये।
स्वचैतन्यं [2]पृथक्कुर्यादिच्छया पुनरेव हि ॥३२॥

बहिर्यागप्रसिद्ध्यर्थं शश्वद्भोगफलाप्तये।
प्राप्त्यर्थं त्वणिमादीनां तथा मन्त्रात्मनाऽऽप्तये ॥३३॥

प्राग्वदाकारवत् स्मृत्वा सप्तलोकसमुद्भवैः।
महद्रूपैः [3]प्रभूतैस्तु चोत्कृष्टतरलक्षणैः ॥३४॥

भोगैर्नृत्तैर्गीतवाद्यैर्जयशब्दाद्यलंकृतैः।
समर्चयित्वा तदनु [4]संस्मृते संस्मृतेऽर्चिते ॥३५॥

बहिस्त्वभिमताधारे विभाव्यः प्रतिरूपितः।
मन्त्रनाथो महध्दाम दर्पणो वृत्तिरन्तगे (?दर्पणोदस्वृत्तगः) ॥३६॥

[5]इत्येतत् श्रध्द वै (?श्रध्दयैव) विं (?वि) षयं नैष्ठिकस्य च।
सुपदे पूर्ववध्दयानं विलाप्यं चारुलक्षणम् ॥३७॥

वाच्यवाचकयोगेन स्वमन्त्रं तेजसां निधिम्
अपसव्येन मार्गेण त्वाकृष्टा [6]हृदयं (?ये) न्यसेत् ॥३८॥

---

1. ग–ह–महत्रये
2. क–ख–पृथक्कुर्याच्चयत्पुनरेव हि
3. ग–घ–प्रवृत्तैस्तु
4. क-ख–संभृते···ते
5. ग–घ–इत्येव बुद्धेवैं विषमम्
6. ग–घ–हृदयात् न्यसेत्

सह स्ववायुना सम्यक् सध्दामाधिष्ठितासने।
सुलक्षणेऽर्चादेशे वा द्रव्यार्थे सर्वतोऽब्जज ॥३९॥

तद्विनान्यत्र मन्त्रेशं [1]तस्मादभ्युदितं स्मरेत्।
व्यक्ताकृतिधरं चैव साङ्गं सावरणं द्विज ॥४०॥

आराधनक्रमेणैव प्रविलाप्य यथा पुरा।
युगपत् सह सर्वेषां संप्रवेशक्रमेण च ॥४१॥

कृत्वा चानुगतां बुद्धिं स्वदेहस्थेन वायुना।
शश्वदाकृष्य बुध्दिस्थं मध्यमार्गेण पौष्कर ॥४२॥

कुर्याच्चैतन्यविश्रान्तं हृदब्जगगनोदरे।
एवं हि त्रिविधं यागं हार्दान्ते समुदाहृतम् ॥४३॥

द्रव्यैर्ङ्गलक्षणैः पूर्वं चिदचित्सदृशैः परम्।
दुर्गतैः सुशुभैः स्वल्पैरङ्गितैः स्थापितैर्बहिः ॥४४॥

तृतीयमब्जसंभूतं [2]क्रमात् तत्प्राप्तिभावनात्।
[3]हृद्यागो यस्तु भोगेशो संयोगान्मोक्षमृच्छति ॥४५॥

संभोगमपवर्गं च तद्वहिर्व्यञ्जनं पुनः।
कर्मसन्यासिनां विप्र कर्मिणां प्रददाति च ॥४६॥

---

1. क–ख–तस्मादप्युदितम्
2. क–ख–क्रमा–प्रान्तनिनावतात्
3. क–ख–हृद्यशो···सायागक्षमृच्छति

[1]आहूतः प्रविशेद्यत्र [2]मन्त्रनाथो हि संमुखः।
तत्प्रागपेक्षया[3] कार्यं धर्मादीनां निवेशनम् ॥४७॥

सांमुख्यं भजते यस्मात् साध (?स) नः परमेश्वरः।
तदासनं हि चिद्रूपं सिद्धमेतत्स्वाहनात् ॥४८॥

तत्पीठवसुधोद्देशं मण्डलादिषु वृत्तिषु।
आत्मनः प्राग्वशाद्वायुकोणादारभ्य पूजनम् ॥४९॥

कार्यं विघ्नेशपूर्वाणां [4]तत्पदारा (?द) प्रभूः पदम्।
वीथौ सविधि (?वीथि) कानां तु यागानामेतदाचरेत् ॥५०॥

बहिर्वारण[5]रेखानां मुक्तानां तु महामते।
युक्तानां [6]न बहिर्दोषैर्निर्यज्ञे चार्चने सति ॥५१॥

एवं रक्षः पदे [7]कुर्यात् स दक्षिणवशात्तु वै।
पूजनं कालनाथानामन्येषां भगवद्वशात् ॥५२॥

[8]आद्वास्यैभ्यस्तु पूजानां पैठीयानां यथाक्रमम्।
लाञ्छनाह (?घ) श्रियादीनां दिक्पती[9]न् वि(?त्वि) ष्टजित्
हितान् ॥५३॥

---

1. क-ख-आहृतो ग-घ-आहृद्यः प्रविशेत्
2. क-ख-मन्त्रनामासि संमुखः
3. क-ख-पेक्षया…दधर्मा
4. ग-घ-तत्पदान्वाग्रभूः
5. ग-घ-रेखानामक्तानाम्
6. क-ख-नवभिर्दोषैः नीयन्तेचार्चने
7. क-ख-कुर्यात् स्य दक्षिण
8. क-ख-आद्वास्थे-नां यथाक्रमम्
9. ग-घ-विष्टजित्

दिक्पालकःवादासृष्टेर्यतस्तेषां स्थितिः स्थिरा।
भगवन्मन्त्रमूर्तीनामनन्तानां महामते ॥५४॥

स्वस्थानस्था नमस्यन्ति पूजयन्ति जपन्ति च।
ध्वजाद्यैरुपचारैस्तु सम्यक् परिचरन्ति च ॥५५॥

कैवल्यसिद्धये शश्वद्बहुभिः सानुगैः सह।
पालयन्ति च भक्तानां बलमोजो ददन्ति च ॥५६॥

ध्वंसयन्ति च विघ्नौघममिशं मन्त्रयाजिमाम्।
संरक्षन्ति फलं मान्त्रं वर्धमानं [1]विलक्षणम् ॥५७॥

अधिकारमनादिं यच्छक्तिभूतं जगत्प्रभोः।
दिक्सिद्धये दशात्मत्वं [2]तद्बत्येषा दशात्म (?भि) का ॥५८॥

कदाचिद्दिक्परिज्ञाने बहिर्भ्रष्टेऽथ हृद्गृहे।
आराध्य पृष्ठतः प्राग्वत् तेषां कुर्यात् समर्चनम् ॥५९॥

एवं दिगन्तरे देशे योगज्ञे तु कृते सति।
सविशेषेऽथ वै नित्ये विष्वक्सेनार्चनं हितम् ॥६०॥

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां
भोगभेदो नाम
षड्विंशोऽध्यायः

*

---

1. वर्धमानं द्विलक्षणम्
2. क–ख–सर्वशेषे""नित्ये

PAUṢKARA SAMHITĀ

TRANSLATION

CHAPTER : ONE

DISCIPLE'S TEST (S'IṢYA-PARĪKṢĀ)

O Lotus-born, when a disciple who has fulfilled his vow, stands in front of the teacher, he should order the disciple so approached as follows, "O son, go and fetch monetory resources required for the equipment of the ritual of MAṆḌALA-worship (Yāga) by the performance of which you will gain peace of mind. The disciple should offer the money so obtained to the worthy teacher who is endowed with many good qualities, at an auspicious time, Having then offered whatever is so obtained, to the teacher (or preceptor), and having addressed to him as "O Master, I have obtained this (amount) due to your grace; well, please accept it; and show compassion on me, who is drowned in the ocean of mundane existence." When pathetic proclaimation like this takes place on his part, the preceptor may proceed to perform the maṇḍala-worship for his sake. (1–5)

Having sketched (the maṇḍalas) according to procedure and having filled with auspicious colours and then decorated with vernillion powder etc., and embelished with (the designs of) water-pots etc., on the ground, with the help of pencils of gold etc., the diagrams may be worshipped; in case however of want of funds, one may be worship with flowers and fruits and the like, always available in forests, obtained with efforts. Having worshipped it (i.e. the maṇḍala), it should be shown to him (i.e. the deciple). Mind that the maṇḍala-pattern is fourfold. The first type is known as Padmodara, i.e. having lotus at the centre. This pattern has twentyfive (lit. denoted by the number of tattvas or the Sāṅkhya-principles) specimens. The second variety is known as Aneka-kaja-garbha i.e. having more than one lotuses at the centre It is also of many sub-divisions. The third type of maṇḍalas is Cakrābja i.e. having an encircled lotus at the centre. Its sub-divisions are also several, O Lotusborn (Brahman). The fourth variety is described as Mis'ra-cakrābhidhāna, i.e. having complex wheels at the centre. This pattern of maṇḍalas is also composed of several sub-divisions. (6–10)

The fourth type of maṇḍalas is said to be one in which when entangled, one is liberated. After this, there is a (federal) pattern known as Nava-nābha i.e. having nine axe (lit. navels). This pattern is marked with various sub-designs. In the case of the devotees, the state of liberation occurs instantly when this pattern is seen, worshipped or imagined inside the fire. When it is only seen, or worshipped duly in a period stipulated; e.g. on the twelth day of each lunar fortnight, then the devotee attains the status of Samayin [initiate] at the end of one year. He attains the status of being Putraka [sonship] by worshipping, seeing or medidating upon (the maṇḍala), at heart, for another year. For him, eligibility is attained by that period (11-14.1/2)

Well, two Vyūhas or designs : the first and the last should be worshipped at the beginning and at the conclusion with devotion, O Twiceborn (Brahman), for a period of one year (?). When the aspirant soul (jantu) has attained the status of sonship [Putrakatva], whose sins are destroyed, the fruits begin to accrue to him on destruction of his sins. Then he should be yoked to or enjoined with the status of aspirantship (Sādhakatva) by the preceptor. He should then be further initiated in that realm after commissioning him in the third category of maṇḍalas (tṛtīya cakrābja-maṇḍala). This category or pattern is to be meditated upon and worshipped with all its sub-varieties, for three fortnights minus five days ([15x3 = 45–5 = 40).

Each wheel should be worshipped until the lotus is being worshipped [?]. O Twiceborn, the fruits of its worship commence gradually in case of the aspirant disciple [16-20]. The preceptor has to show the fourth pattern of the great maṇḍala [mahāyāga] meticulously, to the aspirant. By that he will attain the status of teachership or preceptorship [Ācāryatva]. Having worshipped Him for a period aforesaid, one should medidate upon the sentence [vākya?]. O Brahman the twiceborn, the worship in the maṇḍala–designs may be completed in the remaining days, one by one. Whosoever [i e. the devotee aspirant] performs the worship with the help of maṇḍalas [yāga] for a period of four years, he attains the other end or shore of the ocean of life in the form of worldly existence, which is difficult to be traversed. In case, he carries out the worship in the great maṇḍala design [mahāyāga] having nine vital points or navels [nava-nābha] they become for him torchlight in the form of knowledge [jñāna-dīpa] in this forest of worldly life [saṃsāra-kāntārā]. For the devotees and the god–believers who adhere to faith and restraint, various forms of maṇḍala–worship have been always prescribed. [21–25]

Indeed, the ocean of worldly life is impossible to to be crossed over by any means other than the maṇḍala worship [yāga] He is truly remembered as a preceptor or Guru who safely leads an aspirant over to the other shore which is the object of knowledge [jñeya], by helping him board the boat in the form of the maṇḍala [yāga–pota], being extremely infused with compassion and having no expectation of reciprocation. He is really a guru to be placed on par with Me [matsama], who recognises a devotee to be deep-merged in the ocean of grief and in a state of being [utterly] helpless, uplifts him with the [helping] hand in the form of maṇḍala-worship [25–28].

At the very glance of these yāgas, i.e. maṇḍala-worship, the holy fords or water–places of pilgrimage, holy places inhabited by the Siddhas or the realised souls, the temples or shrines of gods who are adored and worshipped with flowers, clothes and ornaments and the hermitages of great sages, while the holy fire [whose food is the oblation] is being offered oblations alongwith the chanting of the vedic hymns, the evil temptation, the evil mind, perverse thinking, bad intention and bad motive and the infidelity or heresy present in the persons of baffled mind, in the persons with hatred and in the persons who are wicked by intention and in the persons who are non-believers, are ruined forever [29–32].

